
कविकुलगुरू - कालिदास - संस्कृत - विश्वविद्यालयः

॥प्रा. मंजरी॥
॥१॥

श्रीगणेशाय नमः ॥ नत्वा श्रीपुंडरीकाक्षं सर्वपापहरं हरिं प्रयोगपारिजातादीन्निबंधान्धर्मसूत्रकं ॥१॥ मयूरवादीं श्रुहेमाद्रिं प्रायश्चित्तेंदु
शेखरं दृष्ट्वा संक्षेपतः कुर्वे प्रायश्चित्ताख्यमंजरीं ॥२॥ अथ धर्मशास्त्रोक्तानि कानि चित्प्रायश्चित्तान्युच्यंते तत्र शास्त्रोपदिष्टं पूर्णप्रायश्चित्तं
विप्रस्यैव क्षत्रियविट्शूद्राणां पादपादहानिः तदाह विष्णुः विप्रे तु सकलं देयं पादोनं क्षत्रिये स्मृतं वैश्येऽर्धं पादशेषस्तु शूद्रजातिषु शस्य
तइति तत्तद्वर्णस्त्रीणां वृद्धानां रोगिणां व्रतमर्द्धं तत्प्रायश्चित्तार्धं स्त्रीणामर्धं प्रदातव्यं वृद्धानां रोगिणां तथेति तेनैवोक्तेः तथैव बालस्या
पनयनात्सकृत्पादमात्रं पादो बालेषु दातव्यः सर्वपापेष्वयं विधिरिति वचनात् उपनयनोत्तरं षोडशवर्षपर्यन्तमर्धं तदाहांगिराः ॥
अशीतिर्यस्य वर्षाणि बालो वाप्यूनषोडशः प्रायश्चित्तार्धमर्हन्ति स्त्रियो रोगिण एव चेति बालस्य पंचवर्षात्प्राक्नैव किंचित् दरिद्रा
णां प्रवसितानां वार्धं सति संभवे पूर्णमेव आश्रमिणां विशेषमुक्तं तेनैव गृहस्थोक्तानि पापानि कुर्वन्त्याश्रमिणो यदि शौचवच्छोधयेत्प्राक्
मर्वाक्ब्रह्मनिदर्शनादिति यथा शौचं गृहस्थाद्विगुणं ब्रह्मचारिणां त्रिगुणं वानप्रस्थानां चतुर्गुणं यतीनां तथैव प्रायश्चित्तमित्यर्थः गृह
स्थशब्दः स्नातकविधुरादीनामप्युपलक्षकः ब्रह्मचारिणो देवराण्योक्तेः षोडशवर्षोर्ध्वं त न्यूर्ध्वं बालोक्तवत् ब्रह्मनिदर्शनं तत्वज्ञानं ज्ञानो
त्सतसं तत्रं तज्ज्ञस्य त्वप्रायश्चित्तानै नैव नश्यन्ति ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुतेऽर्जुनेति भगवदुक्तेः सर्वत्र यद्यथोक्तप्रायश्चित्तं तत्सकृता
नाभ्यासकरणे विहितव्यं ज्ञानतः करणे द्विगुणं प्रायश्चित्तं अभ्यासे चतुर्गुणं अत्यभ्यासेऽष्टगुणं अत्यन्ताभ्यासे षोडशगुणं गुरुपात ॥१॥

केनिरंतरं चिरकालाभ्यासे पातित्यं तस्य पतितवत्प्रायश्चित्तं पापकर्तुश्च पश्चात्तापं विना नैव प्रायश्चित्ताधिकारः करणेऽपि पापनाशाभावात्
बालानां पश्चात्तापाभावेऽपि तत्प्रायश्चित्तं पित्रादिभिराचरणीयं ।उक्तं च शंखेन ऊनैकादशवर्षस्य पंचवर्षात्परस्य च प्रायश्चित्तं चरेद्भ्राता पिता
वान्यः सुहृज्जनः अतो बालतरस्यास्य नापराधो न पातकं राजदंडो न दातव्यः प्रायश्चित्तं न विद्यते मलमूत्रपुरीषाणां भक्षणे नास्ति किं
चन दोषस्तावत्पंचमाद्वर्षादूर्ध्वं पित्रोः सुहृद्गुरोरिति बालस्यापि मद्यपाने प्रायश्चित्तमुक्तं गौतमेन अनुपेतस्तु यो बालो मद्यं मोहात्पिबेद्य
दि कृच्छ्रत्रयं गुरुः कुर्यान्माता भ्राता पिता पितेति अशक्तानिनां तु माहीनां पश्चात्तापाभावे राज्ञा केन चित्तद्गुणा वा विप्रैर्वा बलात्कारेण लोकव्य
वहारार्थं ते प्रायश्चित्तमाचरणीयं धर्मशास्त्रविदा कुत्रापि गुरुणि पापे लघुप्रायश्चित्ताचरणे योजनीयाः अल्पदोषे स्वयमेव धर्मशास्त्रा
ताविप्रमुखाद्दात्वा १ यश्चित्तं लघु नि गुरु च न वाच्यं यथोक्तमेव कथनीयं ।नतु स्नेहलोभादिना अनुग्रहः कार्यः तथा सति पापं वक्तरि संक्रमेत् ॥ दोषाधि
क्ये तु पर्षदनुमत्यैव प्रायश्चित्ताचरणं क्वचित्तदसंभवे स्वयमाचरणे द्विगुणं प्रायश्चित्तं प्रायोऽल्पदोषे यथोक्तमेव प्रायश्चित्तं दोषाधिक्ये सचैलस्नानपूर्वकं प्रा
यश्चित्ताचरणं पंचगव्यप्राशनं च गुरुदोषे पुनः संस्कारकरणमधिकं दोषतारतम्यप्रायश्चित्ताचरणार्थं विद्वत्संसदि गमनं पापप्रख्यापनं पर्षदनुमत्या प्रायश्चित्तो
पदेशविधानं राजदंडो ब्रह्मदंडः कृच्छ्रादीनां विधिः कृच्छ्रस्वरूपमित्यादि सर्वं मिताक्षरादिग्रन्थेभ्योऽवगन्तव्यं गौरवभयान्नेहोच्यते अथ वक्ष्यमाणक
र्मोपयोगित्वेन द्रव्यमानमुच्यते तत्र सुवर्णमानमुक्तं याज्ञवल्क्येन जालसूर्यमरीचिस्थं त्रसरेणूरजः स्मृतं तेऽष्टौ लिक्षा तु तास्तिस्रो राजसर्षप

 उच्यते। गौरस्तु तेस्त्रयः षड्भिस्तैर्यवो मध्यस्तु तेस्त्रयः। कृष्णलः पंचते माषस्ते ५ तु प्रयष्टिर्मतारनस्यैन बोध्यं। विशेषस्तु तत्प्रकरणे वक्ष्यते। पापिनः ५
 सुवर्णस्तु षोडश। पलं सुवर्णाश्चत्वारः पलानि धरणं दशेति निष्कः सुवर्णाश्चत्वार इति हेमाद्रौ। अथ रूप्यमानं। द्वे कृष्णले रूप्यमाषो धरणं
षोडशैव तत्। शतमानं दशभिर्धरणैः पलमेव त्रिंशि। धान्यमानं भविष्ये। पलद्वयं तु प्रसृतं द्विगुणं कुडवं मतं। चतुर्भिः कुडवैः प्रस्थः प्रस्था
श्चत्वार आढकः। आढकैस्तैश्चतुर्भिश्च द्रोणस्तु कथितो बुधैः। द्रोणैः षोडशभिः खारी विंशत्या कुंभ उच्यते। कुंभैस्तु दशभिर्वाहो धान्यमानं प्र
कीर्तितमिति। विंशत्या कुंभ इति विंशत्या द्रोणैरित्यर्थः। अत्र धान्यमानमित्युपलक्षणं। अत एव द्रवद्रव्यविषयेऽप्येतदेव वेदितव्यं। अन्यत्र च प
लाभ्यां प्रसृतिर्ज्ञेया प्रसृतश्च निगद्यते। प्रसृतिभ्यामंजलिः स्यात्कुडवोर्धशरावकः। अष्टमानं स विज्ञेयः कुडवाभ्यां च मानिका। शरावोष्टपलं
तद्वज्ज्ञेयमत्र विचक्षणैः। शरावाभ्यां भवेत्प्रस्थश्चतुःप्रस्थैस्तथाढकः। भाजनं कांस्यपात्रं च चतुःषष्टिपलं च तत्। चतुर्भिराढकैर्द्रोणः कलशो नल्वणो
र्मणः। उन्मानश्च घटो राशिर्द्रोणपर्यायसंज्ञकाः। द्रोणाभ्यां शूर्पकुंभौ च चतुःषष्टिशरावकौ। शूर्पाभ्यां च भवेद्द्रोणी वाहिगोणी च सा स्मृता। द्रोणी च
तुष्टयं खारी कथिता सूक्ष्मबुद्धिभिः। चतुःसहस्रपलिका षण्णवत्यधिका मता। पलानां द्विसहस्रं तु भार एकः प्रकीर्तितः। तुलाशतपला प्रोक्ता सर्व
त्रैवैष निश्चयः इति। तथा च यवो द्वादशभिर्गौरसर्षपैः प्रोच्यते बुधैः। यवद्वयेन गुंजा स्याद्गुंजा वल्लस्तु उच्यते। माषो गुंजाभिरष्टाभिः सप्तभिर्वा भवेत्क्वचि
त्। स्याच्चतुर्माषकैः शाणः स निष्कष्टंक एव च। गद्याणो माषकैः षड्भिः कर्षः स्याद्दश माषकः। चतुःकर्षैः पलं प्रोक्तं दशशाणमितं बुधैः। चतुःपलै

अथ कुडवः प्रस्थाद्याः पूर्ववन्मताः इति महार्णवे वाराहे पलद्वयं तु प्रसृतं मुष्टिरेकं पलं स्मृतं अष्टमुष्टिर्भवेत्किंचित्किंचिद्विरेषो च पुष्कलं पुष्कलानि च चत्वारि
आढकः परिकीर्तितः चतुर्भिराढकैर्द्रोण इत्येतन्मानलक्षणमिति तथा च पलं च कुडवः प्रस्थ आढको द्रोण एव च धान्यमानेषु बोद्धव्याः क्र
मशोमी चतुर्गुणा इति तथा च माषटंकाः सबिल्वा निकुडवः प्रस्थ आढकः राशिर्गोणी खारी च यथोत्तरं चतुर्गुणा इति अत्र मानभेदे देशाचाराद्व्यव
स्था उदीच्यास्तुलया धान्यमानं कुर्वन्ति दाक्षिणात्याः पात्रेणापि उक्तमस्ति च शार्ङ्गधरे मध्ये समवेणुलोहादेर्भाण्डं यच्चतुरंगुलं विस्तीर्णं च तथोच्च
तन्मानं कुडवं वदेदिति प्रायोयं कुडवोपि पलचतुष्टयतुलितधान्यपूरको भवति अथ भ्योकुडभ्याशवावः चतुर्भिः कुडवैः प्रस्थः षोडशभिः कुडवैराढकः
चतुःषष्टिकुडवैर्द्रोण इत्यादियोज्यं अथ भूमिमानं महार्णवे मार्कण्डेयपुराणे परमाणुः परं सूक्ष्मं त्रसरेणुर्महीरजः वालाग्रं चापि लिक्षा च यूका चापि
यवोंऽगुलं क्रमादष्टगुणान्याहुः यवा नवाष्टौ ते तौ रुल षडंगुलं पदं प्राहुर्वितस्तिर्द्विगुणा स्मृता द्वौ वितस्ती ततो हस्तो ब्रह्मतीर्थादिवेष्टनात् चतुर्हस्तो धनु
र्दण्डो नालिका तद्युगो नतु क्रोशो धनुःसहस्रे द्वे गव्यूतिश्च चतुर्गुणा द्विगुणं योजनं यस्मात्संख्यानकोविदैरिति मत्स्यपुराणे दण्डेन सप्तहस्तेन
त्रिंशद्दण्डैर्निवर्तनं त्रिभागहीनं गोचर्ममानमाह प्रजापतिः वसिष्ठोपि दशहस्तेन वंशेन त्रिंशद्दण्डैर्निवर्तनं दशतान्येव गोचर्म ब्राह्मणाय ददाति
य इति अथ यथोक्तलक्ष्मीद्विप्रायश्चित्ताचरणासंभवे तद्दशनं गोवा प्रायश्चित्तप्रत्याम्नायो तुष्टयः तेन प्रत्याम्नायाः प्रदश्यते नक्कं मुञ्जा द्वयप
रिमितं रजतदानं १ उपवासे षट्कद्वंगुंजापरिमितरजतदानं ब्राह्मणद्वयभोजनं वा एकब्राह्मणभोजनं वा सहस्रगायत्रीजपो वा द्वादशप्राणायामा वा

प्रा· मेज

२ पादकृच्छ्रं प्राजापत्यचतुर्थांशः ३ अर्धकृच्छ्रं प्राजापत्यार्धं ४ पादोनकृच्छ्रं पादोनप्राजापत्यं ५ शिशुकृच्छ्रं पादकृच्छ्रं ६ अथ प्राजापत्यकृच्छ्रे
प्रत्याम्नाया संहितापारायणं १ गायत्र्ययुतजपः २ सहस्रतिलहोमः ३ शतद्वयं घृतहोमः ४ होमोऽत्र गायत्र्या व्याहृतिभिर्वा योजनप्रमाणं ती
र्थयात्रा ५ रुद्रैकादशिनीजपः ६ समुद्रगानदीस्नानं ७ शुष्केशद्वादशस्नानानि ८ शतद्वयं प्राणायामाः ९ एकोपवासपूर्वकद्वादशतिलपा
त्रदानं १० अहोरात्रमुदकेवासः ११ गोभ्यः स्वमूर्ध्नास्कन्धाद्वा द्वादशतृणभारदानं १२ उपोषणपूर्वकमहोरात्रं प्राङ्मुखावस्थानं १३ गोविप्रपितृदे
वानामन्यतमेन सह सचतुष्टयं साष्टांगनमस्कारकरणं १४ एकदिनं गोमूत्रयावकपानं १५ षष्टिब्राह्मणभोजनं तत्र द्वादशसु दिनेषु प्रतिदिनं पं
चपंचेति महार्णवे १६ प्रत्यहमेकैकब्राह्मणभोजनमेवं द्वादशवा १७ कूष्माण्डहोमः १८ गणहोमः १९ भविष्योत्तरे तु गंगायां मौसलं स्नानं प्राजापत्य
समं विदुरिति गंगा च पंचधा भागीरथी गौतमी च कृष्णावेणी पिनाकिनी अरंवङ्गे च कावेरी पंचगंगाः प्रकीर्तिताः इति २० प्राजापत्यप्रत्याम्नाय
त्वेन सालंकृताः षट् धेनुर्वा दद्यात् २१ एकां धेनुं वा २२ एकां गां वा २३ धेन्वादिमूल्यं वा २४ मूल्यं तु द्वात्रिंशत्पणिका गावः वृषे षट्कार्षापण
काः दशकार्षापणा धेनावित्यादिकात्यानोक्तं न्यास्त्वं गौरपेक्षया धेनुमूल्यं पंचगुणं वृषमूल्यं त्रिगुणं अपि वा गवामभावे निष्कमर्धं पादमेव वेति
निष्कश्चाष्टगुंजात्मकैश्चत्वारिंश ४० न्माषैर्भवति तदर्धं २० विंशतिमाषपरिमितं तत्पादस्तु १० दशमाषपरिमितः एकाननतुल्यं सुव
र्णरजतं वा दद्यात् अथवा देशकालोचितं धेन्वादिमूल्यं दद्यात् अपि वा धेन्वादिमूल्यसममूल्यं भूधनधान्यवस्त्रस्वर्णरूप्यरत्नादि वा दद्यात्

३

२५ इतिप्राजापत्यस्याम्नायाः यत्रकेवलाकृच्छ्रोक्तिस्तत्रप्राजापत्यंकृच्छ्रत्रयं नमकृच्छ्रप्राजापत्यत्रयं विंशतिधेनवोवा धेनुत्रयंवा धेनुरेकावा ८ निकृ
च्छ्रेषट्प्राजापत्यानि प्राजापत्यत्रयंवा षट्धेनवोवा पादोनचतस्रोधेनवोवा धेनुत्रयंवा धेनुद्वयंवा तिस्रोवागावः द्वेवागावौ ९ शीतकृच्छ्रेतिस्रो
नः १० लघुपर्णकृच्छ्रेउपवासत्रयं ११ पर्णकूर्चेसार्धद्वावुपवासौ १२ ब्रह्मकूर्चेर्धाधेनुः १३ सांतपनेसार्धप्राजापत्यं एकाधेनुर्वासार्धाधेनुर्वा
अर्धाधेनुर्वा दशगावोवा निष्कार्धंवा १४ यतिसांतपनेएकाधेनुः १५ लघुसांतपनेअर्धागौः १६ महासांतपनेप्राजापत्यत्रयं षोडशगावोवा द्वेवागावौ
षट्धेनवोवा धेनुद्वयंवा १७ पराकप्राजापत्यत्रयं पंचवाधेनवः तिस्रोवाधेनवः द्वेवाधेनू पंचदशगावोवा पंचवागावः तिस्रोवागावः १८ सौम्यकृ
च्छ्रेप्राजापत्यं एकाधेनुर्वा अर्धाधेनुर्वा १९ माहेश्वरकृच्छ्रेएकादशप्राजापत्यानि एकादशधेनवोवा एकादशगावोवा २० ब्रह्मकृच्छ्रेअष्टौप्राजापत्या
नि अष्टौगावौवा २१ अतिकृच्छ्रेप्राजापत्यत्रयं तिस्रोधेनवोवा दशवातिस्रोवागावः द्वेवागावौ २२ औदुंबरकृच्छ्रेदशप्राजापत्यानि तावत्यो
गावोव। २३ पर्णकृच्छ्रेपंचप्राजापत्यानि तावत्योगावोवा २४ फलकृच्छ्रेप्राजापत्यत्रयं तिस्रोवागावः २५ कायकृच्छ्रेदशप्राजापत्यानि तावत्यो
धेनवोवागावोवा २६ यावककृच्छ्रेदशप्राजापत्यानि तावत्योगावोवा २७ यवचांद्रायणेपिपिलिकाचांद्रायणेवाप्राजापत्यत्रयं अष्टौधेनवोवृषभस
हितागोष्टकवा सार्धसप्तधेनवोवा पंचाशद्गावोवा अष्टौवागाव तिस्रोवागावः यत्रचांद्रायणमित्युक्तंतत्रयवचांद्रायणपिपीलिकाचांद्रायणयोर
न्यतरंबोध्यं २८ महाचांद्रायणेशतंगावः २९ यतिचांद्रायणेप्राजापत्यचतुष्टयं ३० ऋषिचांद्रायणेपंचप्राजापत्यानि धेवोष्टौचतस्रस्तिस्रोवा

(3)

२१ शिशुचांद्रायणेऽप्यृषिचांद्रायणवत् ३२ मासोपवासे पंचदश प्राजापत्यानि पंचदशधेनवो वा सार्धसप्तधेनवो वा ३३ मासं गोमूत्रपा
चितयावकपाने द्वादश प्राजापत्यानि ३४ मासं यावकपाने पंच प्राजापत्यानि सार्धप्राजापत्यद्वयं वा ३५ पाकोत्तरमीषद्धोमयुक्तयावकपाने
सार्धप्राजापत्यद्वयं ३६ मासं पयोव्रते पंच प्राजापत्यानि ३७ मासं पंचगव्यपाने सार्धप्राजापत्यद्वयं ३८ त्रिंशन्नक्तेषु प्राजापत्यचतुष्टयं ३९
त्रैमासिके नक्तव्रते सार्धसप्तप्राजापत्यानि ४० बहूपवासे एकं प्राजापत्यं ४१ सुवर्णकृच्छ्रे पंचचत्वारिंशद्गुंजापरिमितसुवर्णदानं अश
क्तौ तदर्धं अत्यशक्तौ पादमात्रं ४२ धान्यकृच्छ्रे खारीपरिमितधान्यस्य पंचमांशदानं अत्र धान्यशब्दो व्रीहिष्वेव धान्यत्रये वा तदुक्तं मनुना
नीवारा व्रीहयो धान्यं श्यामाकाः कृच्छ्रसाधनं न धान्यान्तरमस्तीह धान्यकृच्छ्रस्य साधनमिति ४३ संवत्सरे त्रिंशत्प्राजापत्यानि ४४ सार्धा
ब्दे पंचचत्वारिंशत्प्राजापत्यानि ४५ द्विवार्षिके षष्टिप्राजापत्यानि ४६ त्र्यब्दे नवतिप्राजापत्यानि ४७ षडब्देऽशीत्युत्तरशतप्राजापत्यानि
४८ द्वादशाब्दे ३६० षष्ट्युत्तरत्रिशतानि प्राजापत्यानि ४९ इति कृच्छ्रप्रत्याम्नायाः यत्रार्धधेनुरित्युक्तं तत्र धेनुमूल्यद्रव्यस्यार्धस्य दा
नं यत्र सार्धधेनुरित्युक्तं तत्रैकां प्रत्यक्षां धेनुं दद्यात् अर्धधेनुमूल्यद्रव्यं च एवमन्यत्राप्यूह्यं एषु प्रत्याम्नायेषु पातकतारतम्येन देशकाल
वयोवस्थाद्रव्योपपत्तिशक्त्यधिकारानुसारेण व्यवस्था बोध्या उक्तं च बौधायनेन देशकालं तथात्मानं द्रव्यं प्रयोजनं उपपत्तिमवस्थां च ज्ञात्वा शौ
चं प्रकल्पयेदिति शौचशब्देन स्वसुखाजनकं प्रायश्चित्तानुष्ठानं लक्ष्यते स्त्रीशूद्रादीनां जपादिरूपे प्रायश्चित्ते द्रव्यदानादि योज्यं अमंत्रकाः प्राणायामा

७

॥ अथप्रायश्चित्तमंजरीप्रारंभः॥ पत्रेसंख्या ८३॥

श्रीगणेशाय नमः ॥ नत्वा श्रीपुंडरीकाक्षं सर्वपापहरं हरिं ॥ प्रयोगपारिजातादीन्निबंध्यान्धर्मसूत्रकं ॥१॥ मयूरवा
दीश्च हेमाद्रिं प्रायश्चित्तेंदुशेखरं ॥ दृष्ट्वा संक्षेपतः कुर्वे प्रायश्चित्ताख्यमंजरीं ॥२॥ अथ धर्मशास्त्रोक्तानि कानि
चित्प्रायश्चित्तान्युच्यंते ॥ तत्र शास्त्रोपदिष्टं पूर्णप्रायश्चित्तं विप्रस्यैव ॥ क्षत्रियविट्शूद्राणां पादपादहानिः ॥ त
दाह विष्णुः ॥ विप्रे तु सकलं देयं पादोनं क्षत्रिये स्मृतं ॥ वैश्येऽर्धं पादशेषस्तु शूद्रजातिषु शस्यत इति ॥ तत्तद्वर्ण
स्त्रीणां वृद्धानां रोगिणां च तत्तद्वर्णोक्तप्रायश्चित्तार्धं ॥ स्त्रीणामर्धं प्रदातव्यं वृद्धानां रोगिणां तथेति तेनैवोक्तेः
॥ तथैव बालस्योपनयनात्प्राक् पादमात्रं ॥ पादो बालेषु दातव्यः सर्वपापेष्वयं विधिरिति वचनात् ॥ उपनयनोत्त
रं षोडशवर्षात्प्रागर्धं ॥ तदाहांगिराः ॥ अशीतिर्यस्य वर्षाणि बालो वाप्यूनषोडशः ॥ प्रायश्चित्तार्धमर्हंति
स्त्रियो रोगिण एव चेति ॥ बालस्य पंचवर्षात्प्राक् नैव किंचित् ॥ दरिद्राणां प्रवासिनां चार्धं ॥ सति संभवे पूर्णमेव ॥ आश्र
मिणां विशेषमुक्तं तेनैव ॥ गृहस्थोक्तानि पापानि कुर्वंत्याश्रमिणो यदि ॥ शौचवच्छोधनं प्रोक्तमर्वाक् ब्रह्मनिदर्शे

॥१॥

नादितिति ॥ यथाशौचं गृहस्थाद्द्विगुणं ब्रह्मचारिणां त्रिगुणं वानप्रस्थानां चतुर्गुणं यतीनां तथैव प्रायश्चित्तमित्यर्थः ॥ गृह-
स्थशब्दः स्नातकविधुरादीनामप्युपलक्षकः ॥ ब्रह्मचारिणो द्विगुणं प्रोक्तिः षोडशवर्षोर्ध्वे ॥ न स्यूर्वं बालो नक्ववन्
॥ बलनिदर्शनं तन्वता ॥ ज्ञानोत्पत्यनंतरं तूत्पन्नं पापं ज्ञानेनैव नश्यति ॥ ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुतेर्जुनेति
भगवदुक्तेः ॥ सर्वत्र यद्यप्युक्तं प्रायश्चित्तं तत्सकृद्दत्ताना सापकरणे वेदितव्यं ॥ ज्ञानतः करणे द्विगुणं प्रायश्चित्तं ॥
अभ्यासे चतुर्गुणं ॥ असभ्यासे षड्गुणं ॥ अत्यंताभ्यासे षोडशगुणं ॥ गुरुपातके निरंतरे चिरकालाभ्यासे पातित्यं ॥ नस्य
पतितत्वं प्रायश्चित्तं ॥ पापकर्तुश्च पश्चात्तापं विना नैव प्रायश्चित्ताधिकारः ॥ करणेपि पापनाशाभावात् ॥ बालानां
पश्चात्तापाभावे पितृप्रायश्चित्तं पित्रादिभिराचरणीयं ॥ उक्तं च संग्रहे ऊनैकादशवर्षस्य पंचवर्षात्परस्य च ॥ प्राय-
श्चित्तं चरेद्भ्राता पिता वान्यः सुहृज्जनः ॥ अतो बालतरस्यास्य नापराधो न पातकं ॥ राजदंडो न तस्यास्ति प्रायश्चित्तं न
विद्यते ॥ मलमूत्रपुरीषाणां भक्षणे नास्ति किंचन ॥ अनुपेतस्तु यो बालो मद्यं मोहात्पिबेद्यदि ॥ कृच्छ्रत्रयं गुरु

भ्या

ःकुर्यात्स्नातास्त्रैतापिवापितेति ॥ अज्ञानिनामुन्मत्तादीनां पश्चात्तापाभावे राज्ञा केनचित्प्रभुणा वा विप्रैर्वा बलात्का
रेण लोकव्यवहारार्थं तैः प्रायश्चित्तमाचरणीयं ॥ धर्मशास्त्रविदा विदुषि गुरुणि पापे पल्लवे प्रोक्तं प्रायश्चित्ताचरणे यो
जनीयाः ॥ अल्पदोषे स्वयमेव धर्मशास्त्रोक्तप्रकारेण धर्मशास्त्रतत्त्वविप्रमुखाद्बोध्यं ॥ प्रायश्चित्तं लघुत्वे गुरुत्वे न कार्यं ॥ य
थोक्तमेव कथनीयं ॥ ननु स्नेहलोभादिना तु स्नेहः कार्यः ॥ तथा सति पापं वर्धत इति संक्रमेत ॥ दोषाधिक्ये तु पर्षदनुमत्ये
व प्रायश्चित्ताचरणं ॥ क्वचित्तदसंभवे स्वयमाचरणे द्विगुणं प्रायश्चित्तं ॥ प्रायो ऽल्पदोषे यथोक्तमेव प्रायश्चित्तं ॥ दोषाधिक्ये
सचैलस्नानपूर्वकं प्रायश्चित्ताचरणं पञ्चगव्यप्राशनं च ॥ गुरुदोषे पुनःसंस्कारकरणमधिकं ॥ दोषतारतम्येन प्रायश्चित्ताच
रणार्थं विकल्पसंसक्तमनेन पापमपनेतुं पर्षदनुमत्या प्रायश्चित्तोपदेशविधानं राजदंडो ब्रह्मदंडः कृच्छ्राद्याचरणविधिः कृ
च्छ्रस्वरूपमित्यादि सर्वं मिताक्षरादिग्रंथेभ्योऽवगंतव्यं ॥ गौरवभयान्नेहोच्यते ॥ अथ वक्ष्यमाणकर्मोपयोगित्वेन द्र
व्यमानमुच्यते ॥ तत्र सुवर्णमानमुक्तं याज्ञवल्क्येन ॥ जालसूर्यमरीचिस्थं त्रसरेणू रजः स्मृतं ॥ तेऽष्टौ लिक्षा नु नास्ति

४ तु प्रायश्चित्तं न तारतम्येन वा ॥ विशेषस्तु तत्तत्प्रकरणे वक्ष्यते ॥ पा
पिनः ४

स्तिस्त्रो राजसर्षप उच्यते ॥ गौरस्तु ते त्रयः षट्‌ ते यवो मध्यस्ते त्रयः ॥ कृष्णलः पंच ते माषस्ते [illegible]
[illegible] सुवर्णस्तु षोडश ॥ पलं सुवर्णाश्चत्वारः पला निधरणं दशेति
॥ निष्कः सुवर्णाश्चत्वार इति हेमाद्रिः ॥ अथ रूप्यमानं ॥ द्वे कृष्णले रूप्यमाषो धरणं षोडशैव ते ॥ शतमानं तु दशभिर्ध
रणैः पलमेव तु निति ॥ धान्यमानं भविष्ये ॥ पलद्वयं तु प्रसृतं द्विगुणं कुडवं मतं ॥ चतुर्भिः कुडवैः प्रस्थः प्रस्थाश्चत्वार आ
ढकः ॥ आढकैस्तैश्चतुर्भिश्च द्रोणस्तु कथितो बुधैः ॥ द्रोणैः षोडशभिः खारी विंशत्या कुंभ उच्यते ॥ कुंभैस्तु दशभिः श
वाहो धान्यमानं प्रकीर्तितमिति ॥ विंशत्या कुंभ इति विंशत्या द्रोणैरित्यर्थः ॥ अत्र धान्यमानमित्युपलक्षणं ॥ अन्यद
वद्धवद्रव्यं वा षयेप्यनेदेव वेदित[illegible]व्यं ॥ अन्यत्र च ॥ पलाभ्यां प्रसृतिर्ज्ञेया प्रसृतश्च निगद्यते ॥ प्रसृतिभ्यामंजलि
स्यात्कुडवोर्धशरावकः ॥ अष्टमानं स विज्ञेयः कुडवाभ्यां च माणिका ॥ शरावोष्टपलं तद्वज्ज्ञेयमत्र विचक्षणैः ॥ शरावाभ्यां भवे
त्प्रस्थश्चतुःप्रस्थैस्तथाढकः भाजनं कांस्यपात्रं च चतुःषष्टिपलं च तत् ॥ चतुर्भिराढकैर्द्रोणः कलशो नल्वणो मणः ॥ उन्मा

स्ह उ म

7

प्रा॰ मं॰ नश्चघटो राशिर्द्रोणपर्यायसंज्ञकाः ॥ द्रोणाभ्यां शूर्पकुंभौ च चतुःषष्टिशरावकौ ॥ शूर्पाभ्यां च भवेद्द्रोणी वाहो गो

२ णी च सा स्मृता ॥ द्रोणी चतुष्टयं खारी कथिता सूक्ष्मबुद्धिभिः ॥ चतुःसहस्रपलिका षण्णवत्यधिका मता

॥ पलानां द्विसहस्रं तु भार एकः प्रकीर्तितः ॥ तुलाशतपलाः प्रोक्ताः सर्वत्रैवैष निश्चय इति ॥ तथा च ॥ यवो द्वादश

द्वि भिर्गौरसर्षपैः प्रोच्यते बुधैः ॥ यवद्वयेन गुंजा स्यात् गुंजा वल्ल उच्यते ॥ माषो गुंजाभिरष्टाभिः सप्तभिर्वा भवेत्क्व

चित् ॥ स्याच्चतुर्माषकैः शाणः स निष्कः टंक एव च ॥ गद्याणो माषकैः षड्भिः कर्षः स्याद्दशमाषकः ॥ चतुःकु

र्षैः पलं प्रोक्तं दशशाणमितं बुधैः ॥ चतुःपलैश्च कुडवः प्रस्थाद्याः पूर्ववन्मता इति ॥ महार्णवे वाराहे ॥ पलद्वयं

भवेत् तु प्रसृतं मुष्टिरेकं पलं स्मृतं ॥ अष्टमुष्टि भवेत्किंचित्किंचिदष्टौ च पुष्कलं ॥ पुष्कलानि च चत्वारि आढकः परिकीर्तितः

ः चतुर्भिराढकैर्द्रोण इत्येतन्मानलक्षणमिति ॥ तथा च ॥ ॥ पलं च कुडवः प्रस्थ आढको द्रोण एव च ॥ धान्यमा ॥ २ ॥

नेष्वमी बोध्याः क्रमशो मी चतुर्गुण इति ॥ तथा च माषटंकाक्षबिल्वानि कुडवः प्रस्थ आढकः ॥ राशिर्गोणी च खा

रीत्वयथोत्तरं चतुर्गुणाः इति ॥ अत्र मानभेदे देशाचाराद्व्यवस्था ॥ उदीच्यास्तुलया धान्यमानं कुर्वन्ति ॥ दाक्षिणा
त्याः पात्रेणापि ॥ उक्तमस्ति च शार्ङ्गधरे ॥ स्वदृष्टवेणुलोहादेर्भाण्डं पञ्चतुरंगुलं ॥ विस्तीर्णं च तथोच्चं च तन्मानं
कुडवं वदेदिति ॥ प्रायो यं कुडवोऽपि पलचतुष्टयतुलितधान्यपूरको भवति ॥ आभ्यां कुडवाभ्यां शरावः ॥ चतुर्भि
ः कुडवैः प्रस्थः ॥ षोडशभिः कुडवैराढकः ॥ चतुःषष्टिकुडवैर्द्रोण इत्यादि योज्यं ॥ अथ भूमिमानं सहार्णवे मा
र्कंडेयपुराणे ॥ परमाणुपरः सूक्ष्मस्त्रसरेणुर्महीरजः ॥ वालाग्रं चापि लिक्षा च यूका चापि यवोंगुलं ॥ क्रमाद्दशगुणा
न्याहुः पर्वाणष्टौ ततोंगुलं ॥ षडंगुलं पदं प्राहुर्वितस्तिर्द्विगुणा स्मृता ॥ द्वौ वितस्ती ततो हस्तो ब्रह्मतीर्थादिवेष्टनात्

नु

॥ चतुर्हस्तो धनुर्दंडो नालिका तद्युगेन तु ॥ क्रोशो धनुःसहस्रे द्वे गव्यूतिश्च चतुर्गुणा ॥ द्विगुणं योजनं यस्मात्स्मा
कं संख्यानको विदेरिति ॥ मत्स्यपुराणे ॥ दंडेन सप्तहस्तेन त्रिंशदंडैर्निवर्तनं ॥ त्रिभागहीनं गोचर्ममानमाह प्रजा
पतेरिति ॥ वसिष्ठोऽपि ॥ दशहस्तेन वंशेन त्रिंशदंडैर्निवर्तनं ॥ दशतान्येव गोचर्म ब्राह्मणाय ददाति य इति ॥ ॥

६

म· ६

अथ पथो नकृच्छ्रादिप्रायश्चित्ताचरणासंभवे तद्दशकोवाप्रायश्चित्तमप्रत्याम्नायोनुष्ठेयः ॥ नेवप्रत्याम्ना

यापथोक्तः ॥ ब्राह्मणद्वयभोजनं ॥ उपवासेषट्गुंजापरिमितरजतदानं ॥१॥ उपवासेषट्गुंजापरिमितरजतदानं ॥ ब्राह्मणद्वयभो

याः प्रदर्श्यंते ॥ नमे गुंजायपरिमितं रजतदानं ॥१॥ उपवासेषट्गुंजापरिमितरजतदानं ॥ पादकृच्छ्रप्राजापत्यवतु

जनं वा ॥ एकब्राह्मणभोजनं वा ॥ सहस्रगायत्रीजपोवा ॥ द्वादशप्राणायामं वा ॥२॥ पादकृच्छ्रप्राजापत्यंवतु

र्थांशः ॥३॥ अर्धकृच्छ्रप्राजापत्यार्ध्ये ॥४॥ पादोनकृच्छ्रपादोनप्राजापत्यं ५ शिशुकृच्छ्रपादकृच्छ्र ॥ ६ ॥ अथ प्राजा

पत्यकृच्छ्रप्रत्याम्नायाः ॥ संहितापारायणं ॥१॥ गायत्र्ययुतजपः ॥ २ ॥ सहस्रतिलहोमः ॥ ३ ॥ शतद्वयघृतहोम

: ४ होमोत्रगायत्र्याव्याहृतिभिर्वा ॥ योजनप्रमाणंतीर्थयात्रा ॥ ५ ॥ रुद्रैकादशिनीजपः ॥ ६ ॥ समुद्रगानदीस्नानं ॥ ७ ॥

शुष्कवेश्याद्वादशस्नानानि ॥ ८ ॥ शतद्वयंप्राणायामाः ९ एकोपवासपूर्वकद्वादशतिलपात्रदानं १० अहोरात्रमुदकेवास

: ॥ ११ ॥ गोभ्यः स्वमूल्यार्द्रहृतद्वादशाढणभारदानं ॥ १२ ॥ उपोषणपूर्वकमहोरात्रंप्राङ्मुखावस्थानं ॥ १३ ॥ गोविप्रपि

त्दिवानामन्यतमेसहस्रचतुष्टयंसाष्टांगनमस्कारकरणं ॥ एकदिनंगोमूत्रयावकपानं ॥ १५ ॥ षष्टिब्राह्मणभोज

४

ने ॥ तत्तदादशसु दिनेषु प्रतिदिनं पंचपंचविंशति महार्णवे ॥ १६ ॥ प्रत्यहमेकैकब्राह्मणभोजनमेव द्वादशवा ॥ १७ ॥ कूष्मांडहोमः ॥ १८ गणहोमः ॥ १९ भविष्योत्तरे तु ॥ गंगायां मौसलं स्नानं प्राजापत्यसमं विदुरिति ॥ गंगा च पंचधा ॥ भागीरथी गौतमी च कृष्णवेणी पिनाकिनी ॥ अरंवङ्गन्विव कावेरी पंचगंगाः प्रकीर्तिताः इति ॥ २० ॥ प्राजापत्यप्रत्याम्नाय त्वेन सालंकृताः षट्धेनूर्वा दद्यात् ॥ २१ ॥ एकांधेनुं वा ॥ २२ ॥ एकां गां वा ॥ २३ धेन्वादिमूल्यं वा ॥ २४ ॥ मूल्यं तु द्वात्रिंशत्पणिका गावः ॥ द्विबेष्वष्टकार्षापणकाः ॥ दशकार्षापणा धेना वित्यादि कात्यायनोक्तं स्मार्त्तं ॥ गोरपेक्षया धेनु मूल्यं पंचगुणं ॥ वृषमूल्यं त्रिगुणं ॥ अपि वा ॥ गवामभावे निष्कं स्यात्तदर्धं पादमेव वेति ॥ निष्कश्च अष्टगुंजात्मकैश्चत्वारिंश ४० माषैर्भवति ॥ तदर्धं २० विंशतिमाषपरिमितं ॥ तत्पाद सु १० दशमाषपरिमितः ॥ एततुल्यं सुवर्णं रजतं वा दद्यात् ॥ अथवा देशकालोचितं धेन्वादिमूल्यं दद्यात् ॥ अपि वा धेन्वादिमूल्यसममूल्यं भूधनधान्यवस्त्रस्वर्णरूप्यरत्नादि वा दद्यात् ॥ २५ ॥ इति प्राजापत्यप्रत्याम्नायाः ॥ पत्र केवला कष्टोक्तिस्तत्र प्राजापत्यं कृच्छ्रं ते यं ॥ न तत्कृच्छ्रे प्राजापत्यत्रयं ॥ विंशति धेनवो वा धेनुत्रयं वा ॥ धे

(७)

कृच्छ्र ५

प्रा· मं· ५

तुरेकावा ८ तिकृच्छ्रेष्ट प्राजापत्यानि कृच्छ्र ॥ प्राजापत्यत्रयंवा षट् धेनवोवा पादोनचतस्रोनवोवा ॥ धेनुत्रयंवा धेनुद्वयंवा ॥ तिस्रोवागावः द्वेवागावो ९ शीतकृच्छ्रे तिस्रो धेनवः १० लघुपर्णकृच्छ्रे उपवासत्रयं ११ पर्णकूर्चेसार्धद्व्युपवासो ॥ १२ ब्रह्मकूर्चेर्धा धेनुः ॥ १३ सांतपने सार्धप्राजापत्यं एका धेनुर्वा सार्धा धेनुर्वा अर्धा धेनुर्वा दशगावोवा निष्कार्धंवा १४ यतिसांतपने एका धेनुः १५ लघुसांतपने अर्धागौः १६ महासांतपने प्राजापत्यत्रयं षोडशगावोवा द्वेवागावो ॥ षट् धेनवोवा धेनुद्वयंवा १७ पराके प्राजापत्यत्रयं पंचवा धेनवः तिस्रोवा धेनवः द्वेवा धेनू पंचदशगावोवा पंचवागावः तिस्रोवागावः १८ सौम्यकृच्छ्रे प्राजापत्यं एका धेनुर्वा अर्धा धेनुर्वा १९ माहेश्वरकृच्छ्रे एकादशप्राजापत्यानि एकादश धेनवोवा ॥ एकादशगावोवा २० ब्रह्मकृच्छ्रे अष्टौ प्राजापत्यानि अष्टौ गावोवा ॥ ५ ॥ २१ अग्निकृच्छ्रे प्राजापत्यत्रयं तिस्रो धेनवोवा दशवा तिस्रोवागावः द्वेवागावो ॥ २२ औदुंबरकृच्छ्रे दशप्राजापत्यानि तावत्योगावोवा २३ पर्णकृच्छ्रे पंचप्राजापत्यानि तावत्योगावोवा २४ फलकृच्छ्रे प्राजापत्यत्रयं तिस्रोवागा

वः २५ कायकृच्छ्रे दशप्राजापत्यानि तावत्यो धेनवो वा गावो वा २६ यावककृच्छ्रे दशप्राजापत्यानि तावत्यो गावो वा २७
यवचांद्रायणे पिपीलिकाचांद्रायणे वा प्राजापत्यत्रयं अष्टौ धेनवो वा वृषभसहिता गोऽश्ववा सार्धसहस्रधेनवो वा पंचाशत्का
वो वा अष्टौ वा गावः तिस्रो वा गावः यत्र चांद्रायणमित्युक्तं तत्र यवचांद्रायणपिपीलिकाचांद्रायणयोरन्यतरं बोध्यं २८
महाचांद्रायणे शतं गावः २९ यतिचांद्रायणे प्राजापत्यचतुष्टयं ३० ऋषिचांद्रायणे पंचप्राजापत्यानि धेनवश्चैतावत्त
स्तिस्रो वा ३१ शिशुचांद्रायणे ऋषिचांद्रायणवत् ३२ मासोपवासे पंचदशप्राजापत्यानि पंचदश धेनवो वा सार्ध
सहस्रधेनवो वा ३३ मासं गोमूत्रपाचितयावकपाने द्वादशप्राजापत्यानि ३४ मासं यावकपाने पंचप्राजापत्यानि सार्धप्रा
जापत्यद्वयं वा ३५ पाकोत्तरमीषत्कामूत्रयुक्तयावकपाने सार्धप्राजापत्यद्वयं ३६ मासं पयोव्रते पंचप्राजापत्यानि ३७ मासं
पंचगव्यपाने सार्धप्राजापत्यद्वयं ३८ त्रिंशन्नक्तेषु प्राजापत्यचतुष्टयं ३९ त्रैमासिके नक्तव्रते सार्धसप्तप्राजापत्यानि ४०
षडुपवासे एकं प्राजापत्यं ४१ सुवर्णकृच्छ्रे पंचचत्वारिंशत्कुंजापरिमितसुवर्णदानं अशक्तौ तदर्धं अत्यशक्तौ पादमात्रं ४२

२ ४४॥ सार्द्धे द्वे पंचचत्वारिंशत्प्राजापत्यानि ॥ ४५
२ द्विवार्षिके षष्टिप्राजापत्यानि ॥ २

प्रा॰ म॰
६

धान्यकुडवशब्दः खारीपरिमितधान्यस्य पंचमांशदानं अत्र धान्यशब्देन व्रीहिरेव धान्यत्रयेण वा तदुक्तं मनुना नीवारा व्रीहयो धान्यं श्यामाकाः कृच्छ्रसाधनं न धान्यान्तरमस्तीह धान्यकृच्छ्रस्य साधनमिति ४३ संवत्सरे त्रिंशत्प्राजापत्यानि ४६ त्र्यब्दे नवतिप्राजापत्यानि ४७ षडब्दे अशीत्युत्तरशतं प्राजापत्यानि ४८ द्वादशाब्दे ३६० षष्ट्युत्तरत्रिशतानि प्राजापत्यानि ४९ इति कृच्छ्रप्रत्याम्नायाः यत्रार्धधेनुरित्युक्तं तत्र धेनुमूल्यद्रव्यस्यार्धस्य दानं यत्र सार्धा धेनुरित्युक्तं तत्र एकधेनुप्रत्याम्नायधेनुं दद्यात् अर्धधेनुमूल्यद्रव्यं च एवमन्यत्राप्यूह्यं एषु प्रत्याम्नायेषु पातकतारतम्येन देशकालवयोवस्था द्रव्योपपत्तिशक्त्यधिकारानुसारेण व्यवस्था बोध्या उक्तं च बौधायनेन देशं कालं तथात्मानं द्रव्यं प्रयोजनं उपपत्तिमवस्थां च ज्ञात्वा शौचं प्रकल्पयेदिति शौचशब्देन शुद्धिजनकं प्रायश्चित्तानुष्ठानं लक्ष्यते स्त्रीशूद्रादीनां जपादिरूपप्रायश्चित्ते द्रव्यदानादि योज्यं अमंत्रकाः प्राणायामाः यत्र पुंसः सचैलं स्नानं विहितं तत्र सुवासिन्या अशिरस्कं यत्र रजोनिवृत्त्यादेर्वाचनिकं तत्र सशिरस्कं सचैलं विधवायाः सर्वत्र सचैलं जटिनः शिरोरोगिणश्च अशिरस्कं आतुराणामुष्णोदकेन स्नात्वा

त्रने

द्रव्यं

६

आचमनविष्णुस्मरणादि ५

नि

तुरीणांस्नानैर्मितेपाद्याचमनंमार्जनंवस्त्रान्तरधारणादियथासंभवं बालेत्वाहवत्सश्राजातपः शिशोरभ्युक्षणंप्रोक्तंबाल
स्याचमनंस्मृतं रजस्वलादिसंस्पर्शेस्नानाच्छुद्धिः कुमारके तल्लक्षणंचाहसएव शिशुस्त्वन्नप्राशनात्प्रागाचौलंबालकः
स्मृतः कुमारकस्तुविज्ञेयोयावन्मौंजीनिबंधनमिति इतिश्रीमन्निजपावनकेळकरोपाभिधमहादेवात्मजबापूभट्ट
विरचितायांप्रायश्चित्तनिर्मजर्यामुपोद्घातप्रकरणं अथात्रसंक्षेपेणगृहस्थविप्रकर्तृकानिप्रायश्चित्तान्युच्यंते तत्राल्प च्यं
दोषप्रायश्चित्तानुक्तौदोषतारतम्येनप्रायश्चित्तमाचरणीयं यथाहबोधायनः सर्वपातकेष्वाचामेदिति आचमनासं
भवेजलाभावेवादक्षिणंश्रवणंस्पृशेत् आर्द्रंतृणंगोमयंभूमिंवासंस्पृशेत् तथाचस्मर्यते प्रायश्चित्तान्य र आ
चमनविष्णुस्मरणादि र शेषाणितपः कर्मात्मकानिवै यानितेषामशेषाणांकृष्णानुस्मरणंपरमिति तथाचसाधा
रणानिप्रायश्चित्तान्युक्तानिबौधायनीयधर्मसूत्रे ऋतंचसत्यंचेत्येतदघमर्षणंत्रिरंतर्जलेपठन्सर्व ॥ ॥
स्मात्पापात्प्रमुच्यत आयंगौः पृश्निरक्रमीदित्येतामृचंत्रिरंतर्जलेपठन्सर्वस्मात्पापात्प्रमुच्यते द्रुपदादिवेन्मुमुचानइ

प्रा॰ मं॰
७

स्येनामस्तवं त्रिरंतर्जले पठन्सर्वस्मात्पापात्प्रमुच्यते ह ५ सः शुचिर्षदित्येनामृचं त्रिरंतर्जले पठन्सर्वस्मात्पापात्प्रमुच्य
ते ॥ पिवामित्यृचा विन्नी पश्चोर्ध्वेवशस्तनः समस्तामित्येनामृचं त्रिरंतर्जले पठन्सर्वस्मात्पापात्प्रमुच्यते ॥ विवाव्यादरनीर्ष्यस्ताः
समस्ताश्चेति त्रिरंतर्जले पठन्सर्वस्मात्पापात्प्रमुच्यते पिवाप्रणवमेवांतर्जले पठन्सर्वस्मात्पापात्प्रमुच्यत इति ॥ विधा
नेन सप्तजन्मार्जितं पापं कृत्वा चामस्यमक्षणं तद्विष्णोरित्यपाम ध्येसकृज्जप्त्वा विशुध्यतीति ॥ मिताक्षरायां ल
घुदोषेष्वनादिष्टे प्राजापत्यं समाचरेदिति तथाचोशनाः पत्रोत्तयत्नवानोक्तमिहपातकनाशनं प्राजापत्येन लब्धे
न शुध्यते नात्र संशय इति दानरूपं साधारणप्रायश्चित्तमाह संवर्तः हिरण्यदानं भूमिदानं तथैव च नाशयंत्याशुपा
गोदानं
पानि महापातकजान्यपीति नामकीर्तनरूपं प्रायश्चित्तमुक्तं विष्णुधर्मोत्तरे सायंप्रातस्तथा कृत्वा वासुदेवस्य कीर्तनं स
७
र्वपापविनिर्मुक्तः स्वर्गलोके महीयत इति ॥ मभासखंडे श्रीभगवद्वाक्यं नाम्नां मुख्यतमं नाम कृष्णाख्यं यत्परंतप
प्रायश्चित्तमशेषाणां पापानां मोचकं परमिति वाराहेपि गोविंदेति तथा प्रोक्तं भक्त्या वा भक्तिवर्जितैः दहते सर्वपा

पा

पानिपुगांतेनिरिवोस्थितइति विष्णुपुराणेपि कृतेपापेनुतापोवैयस्यपुंसः प्रजायते प्रायश्चित्तंतुतस्यैकंहरेः संस्म
रणंपरं प्रातर्निशितथामध्याह्नेसंध्ययोश्चापिसंस्मरन् नारायणमवाप्नोतिसद्यः पापक्षयंनरइति तथाहरिर्हरति
पापानिदुष्टचित्तैरपिस्मृतः अनिच्छयापिसंस्पृष्टोदहत्येवहिपावकइति शिवरहस्येपि समस्तवेदवेदांतसारभू
तंशिवमद्वं शिवनामामृतंदिव्यंसर्वपापप्रणाशनमिति भविष्ये नगंगासदृशंतीर्थंनदेवः केशवात्परः ब्राह्मणेभ्यः प
रंनास्तीत्येवमाहपितामहः सर्वंकृतयुगेपुण्यंत्रेतायांपुष्करंस्मृतं द्वापरेतुकुरुक्षेत्रंकलौगंगैवकेवलमिति कृतयुगेपा
पस्याल्पत्वात्तन्नाशनेसर्वाणितीर्थानिसमर्थानित्रेतादौपापाधिक्यात्पुष्करादीनि कलौपापबाहुल्यात्तन्नाशनसामर्थ्यं
गंगायाएवनान्येषामितितात्पर्यं महाभारते चांद्रायणसहस्रंतुयश्चरेत्कायशोधनं पिबेद्यश्चापिगंगांभः समौस्यातांन
वासमौ भवंतिनिर्विषाः सर्पायथातार्क्ष्यस्यदर्शनात् गंगायादर्शनात्तद्वत्सर्वपापैः प्रमुच्यतइति नायमर्थवादः न
दुष्कर्मे स्नानमात्रेणगंगायाः पापंनश्यत्येवध्रुवं दुष्प्रधर्षंकथंयातिचित्तेनयेद्योवदेदपि तस्याहंप्रदहेपापंकोटिब्र

स्तवधोऽस्त्वेवं स्तुतिवादमिमं मत्वा कुंभीपाकेषु जायते अकल्पं नरकं भूत्वा ततो जायेत गर्दभः इति काशीक्षेत्रनिवासो विसर्वपापक्षयकरः स्कांदे काशीखंडे पार्वतीं प्रति महादेववाक्यं सर्वेषामिह पापानां प्रायश्चित्तं चिकीर्षया निःशं कैरेव वक्तव्यं प्रमाणत्वेरिदं वचः पुरश्चरणकामश्चेद् मतो सिद्धिपापतः मन्यसे यदि नः सत्यं वाक्यं शास्त्रप्रमाणतः ॥ न न सर्वं परित्यज्य कृत्वा मनसि निश्चयं आनंदकाननं याहि यत्र विश्वेश्वरः स्वयमित्यलं पल्लवितेन अथ दुष्टस्पर्शनिमित्तकानि प्रायश्चित्तानि चंडालपतितम्लेच्छ विकर्मस्थद्विजांत्यजरजस्वलासूतिकाशवस्पृष्टि चितिचितिकाष्ठयूपदेवलकरुद्रनिर्माल्याशौचिमहापातकिपतितादिस्पर्शे सचैलं स्नानं कामतः स्पर्शे नित्यस्पर्शे घृतप्राशनं चाधिकं अशुचिस्नानेन स्त्रीमवगाह्यवम्य पुनर्विधिवत्स्नायात् स्नानांगतर्पणं नास्ति नक्तस्नानं शीतोदकेनैव आतुराणामुष्णोदकेन रात्रौ मध्ययामद्वये स्नाने प्राप्ते दिवाहृतजलेनाग्निसन्निधाव अग्निं पश्यन् स्नायात् तदभावे सुवर्णांगुलिकरः जले सुवर्णं प्रक्षिप्य वा स्नायात् चंद्रमसं पश्यन् वा दिवाहृतजलाभावे

मरीचिः द्विवाहनंतु यतो पंरहे यदि न विद्यते प्रज्वाल्याग्निं ततः स्नायान्नद्यां पुष्करिणीषु वेति परंपरया चंडालादि
स्पर्शस्पृष्टिन मारभ्य तृतीयपर्यंतानां सचेलस्नानं चतुर्थस्याचमनं पंचमादीनां प्रोक्षणाच्छुद्धिः वस्त्रांतरितस्पर्शे
पि साक्षात्स्पर्शवत् दंडाद्यंतरितस्पर्शे स्पृष्टिनः स्नानं द्वितीयस्याचमनं तदूर्ध्वं प्रोक्षणं देवस्थाने देवलकस्पर्शेन दो
षः पशुबंधे यूपस्पर्शेन दोषः अन्यस्य मूत्रविष्ठादि द्वादशमलस्पर्शे स्वस्य षडंगस्य मृज्जलाभ्यां शौचं कृत्वा स्नात्वाचा
मेत् स्वमलस्पर्शे मृज्जलाभ्यां शौचं पादप्रक्षालनमाचमनं च द्वादशमलाश्चोक्ता मनुना वसाशुक्रमसृङ्मज्जामूत्रविट्क
र्णविण्नखाः श्लेष्माश्रुपूयिका स्वेदो द्वादशैते नृणां मला इति वसाप्रमेहभेदः १ शुक्रं रेतः २ असृग्रक्तं ३
मज्जाप्रमेहभेदः ४ मूत्रप्रसिद्धं ५ विष्ठाप्र० ६ कर्णविट्कर्णनिर्गतमलः ७ नखास्नदंतनिर्गतमलश्च ८ श्ले
ष्मा नासिकाकफः ९ अश्रु नेत्रोदकं १० पूयिका नेत्रमलः ११ स्वेदो घर्मः १२ चंडालादीनां काष्ठादि द्वारा स्प
र्शे यदंगस्य स्पर्शस्तदंगप्रक्षालनमाचमनं च सर्वांगावच्छेदेन चांडालादिस्पर्शे सचैलस्नानपूर्वकं त्रिरात्रमुपवासः

प्रा· मं·
९

चंडालादिभिर्यानशय्यासनादावपि तथैव चंडालादिछायारोहणे स्नानं घृतप्राशनं च तत्र चंडालस्पर्शे सवैलं
स्नानं ते चोक्ताः पराशरेण रजकश्चर्मकारश्च नटो बुरुड एव च कैवर्तको मेद भिल्लौ स्वर्णकारस्तु सौचिकः तक्षकस्तै
लयंत्री च सूतुश्चक्री तथा ध्वजी नापितः कारुकश्चैते नाम चंडालसंज्ञका इति मेदो वेणुकारः सूनुर्मांस
विक्रयी चक्री कुलालः ध्वजी मद्यविक्रयी कारुको लोहकारः शेषाः प्रसिद्धाः मूद्रस्पर्शे स्नानं म्लेच्छ
निषादादिस्पर्शे आचमनं दुर्जनस्पर्शे स्नानं कामतो नक्तं च उष्ट्रग्रामसूकरगर्दभश्वकुक्कुटादिभिः शिरो
व्यतिरिक्तांगस्पर्शे तदंगक्षालनपूर्वकमाचमनं शिरःस्पर्शे स्नानं कामतः स्पर्शे द्वादशवारं मृद्भिः शोधनमधिकं
आतुरस्याचमनमेव मद्यादिस्पर्शे स्नानं घृतप्राशनं च सुरास्पर्शे जान्वधः स्नानं तत आनाभेः स्पर्शे स्नानं उपवास
श्च तदूर्ध्वं स्पर्शे त्रिरात्रमुपवासः सर्वत्र पंचगव्यप्राशनं मद्दिरायादनस्पर्शे शौचं कृत्वा स्नात्वा त्रिद्दिनं कुशां
बु पिबन्नुपवसेत् मुखमंडले विण्मूत्रादिस्पर्शे मृत्तिकागोमयाद्भिः प्रक्षाल्य स्नात्वा पंचगव्यं पिबेत् अभ्य

६

वत

तस्य श्मश्रुकर्मकृतं स्व चंडालादिस्पर्शे एकोपवासः पंचगव्यप्राशनं च अशुचिद्रव्यस्पर्शे होतरशनं गायत्रीज
पः रथ्याकर्दमतोयेन ष्ठीवनादिनावा नाभेरूर्ध्वे स्पर्शे स्नानं नाभेरधः पादमाचमनं प्राणायामश्च दीपाग्नेर्दीपतैल
स्पर्शे वा स्पर्शे स्नानं कर्मकाले सच्छूद्रादिस्पर्शेपि स्नानं कर्मकाले मार्जारपुच्छस्पर्शे स्नानं अन्यांगस्पर्शे आचमनं कर्मा
तिरिक्तकाले पुच्छस्पर्शे आचमनं अन्यांगस्पर्शे न दोषः बृहस्पतिः स्त्रियो वृद्धाश्च बालाश्च मक्षिकामशकादयः
मार्जारश्चैव दर्वी च मारुतश्च सदा शुचिरिति तथा चमपूर्वे रथ्याकर्दमतोयानि नावः पंथास्तृणानि च स्पर्शनान्न प्र
दुष्यंति पक्वेष्टकचिता निवृत्तौ चैव विवाहयात्रायां संग्रामे देशविप्लवे नगरग्रामदाहे च स्पृष्टास्पृष्टिर्न दुष्यतीति बौद्ध
पाशुपतलोकायत्यादिस्पर्शे सचैलं स्नानं चंडालादिशवस्पर्शे प्राजापत्यं कर्मकाले मूषकपल्लीशरठगोधादिवाय
सादिपक्षिस्पर्शे स्नानं दर्शने त्वाचमनं चंडालरजस्वलादिभिः सहैकशाखारोहणे सचैलं स्नानं कामतोऽष्टशतं गा
यत्रीजपः अभ्यासे तूपवासपूर्वकं पंचगव्यप्राशनं एकपाषाणारोहणेपि शाखावत् उच्छिष्टविप्रस्पर्शे हस्त

(14)

पादप्रक्षालनपूर्वकमाचमनं इतिदुष्टस्पर्शनिमित्तकानिप्रायश्चित्तानि अथदुष्टसंभाषणादिनिमित्तकानिप्रायश्चित्तानि॥
चंडालरजस्वलादिसंभाषणेष्टोत्तरशतंगायत्रीजपः पुण्यवस्तुध्यानंवा जपादिकर्मकालेतत्संभाषणेस्नानं तद्दर्शने
विरम्याचामेत् कर्मकालादन्यस्मिन्कालेसकृच्चंडालादिदर्शनेरविदर्शनं बहुवारंदर्शनेपंचदशप्राणायामाश्च अ
ल्पकालंचंडालादिनासहैकपथगमनेगायत्रीस्मरणं बहुकालेसचेलंस्नानं अनिष्टगंधाघ्राणेसूर्यदर्शनं अशुचिद
र्शनेगायत्रींजपेत् आदित्यंवापश्येत् मनुस्तु आचम्यप्रयतोनित्यंजपेदशुचिदर्शने सौरान्मंत्रान्यथोत्साहंपा
वमानीश्चशक्तितइति जलेस्वप्रतिबिंबदर्शनेमयितेजइतिमंत्रंजपेत् सचमंत्रोवाजसनेयकेप्रसिद्धः सत्याषाढीयसू
त्रेच मयितेजइंद्रियंवीर्यमायुः कीर्तिर्वर्चोयशोबलमिति इंद्रधनुर्दर्शनेदावाग्निदर्शनेचाहवृक्षश्रृंगः इंद्रचापंदावा
ग्निंवापश्यन्परस्यप्रदर्शयेत् प्रायश्चित्तमहोरात्रंधनुर्दंडश्चरक्षिणेति अहोरात्रमुपवासइत्यर्थः बोधायनीयधर्मसू
त्रेतु सूर्यमुदयास्तमयेनानिरीक्षेतनैवेंद्रधनुरितिपरस्मैप्रब्रूयाद्यदिप्रब्रूयान्मणिधनुरित्येवब्रूयादिति दुःस्वप्नदर्शने

अभिशूद्रस्पर्शनेचुसध्वमहिरण्यदानं मनस्त्रीस्पर्शनेस्नानं सुरापानादिनिंद्याघ्राणेप्सुनिमज्यन्निरघमर्षणंत्रीन्प्राणायामान्ना
कृत्वा घृतप्राशनंकुर्यात् मद्यगंधेतरर्धं मत्यासाक्षात्कराघ्राणंहुतानवत्र देवान्मार्गोदोवायुवज्ञान्मद्याघ्राणेदश
णंस्पृश्याहरिमनसस्मात्स्पर्शे स्नानं पंचनामग्निकायपि [illegible] बिणमूत्रमूत्रनिंद्याघ्राणेदर्शनेवाग्निः
प्राणायामः चंडालादिदर्शने हीनवर्णवैश्ववासवं सर्कान्तनपतितदर्शने निकान्तनमुवासितानीदर्शनेस
[illegible] नमस्नानं छेदनवेधनपाकादिकर्तारं पतितहव्यसंवायतिनंदृष्ट्वा
सूर्यावलोकनम् इति श्रीमत्[illegible]महादेवात्मज[illegible]विरचितायां प्रायश्चित्तमंथन
[illegible] प्रायश्चित्तानि अथ भोजन[illegible] [illegible] विना भोजने उपवा
सः [illegible] अज्ञानादुपवीतं विना भोजने [illegible] उपवीतं विना भोजने स्नानम
[illegible] अथोपरनं विना भोजने पंचप्राणाहुति [illegible] गायत्रीज

18

१०मे० ११

पः उत्तरापोशनं विना पङ्क्त्युत्थितेन दास्नात्वाष्टोत्तरसहस्रं गायत्रीजपः भोजनकाले परिगृहीतमौनत्यागे तदन्न त्यागः एकपंक्त्युपविष्टानां विषमदाने दापने वा प्राजापत्यं संक्रान्त्यादिनिमित्तकस्नानं विना भोजने ष्टोत्तरसहस्रं गायत्रीजपो दशप्राणायामाश्च असच्छूद्रादिस्पर्शे स्नानं विना भोजने उपवासः चंडालादिस्पर्शे स्नानं विना भोजने प्राजापत्यं अमेध्यस्पर्शे स्नानं विना भोजने त्रिरात्रमुपवासः श्वकाकादिस्पृष्टान्नभोजने त्रिरात्रमुपवा ॥ ॥

सः मत्या अब्राह्मणसमीपभोजने तु कृच्छ्रं पंक्तौ भोजने बालवृद्धस्यादीं स्वत्कामोजने हस्तस्थापितकवलादि भोज

मा

नेत्वप्रतिशिमितमेकउपवासः अमंत्रकं ˇ भोसनारूढस्थपादभोजने वस्त्रार्धप्रावृतभोजने मुखेन धमितान्नभोजने वा सांतपनं भोक्तुकामस्य पूर्वापोशनादूर्ध्वं भोजे × अन एवाह गौतमः अप्येकपंक्तौ नाश्नीयाद्ब्राह्मणैः स्वजनैरपि को हि जानाति किं कस्य प्रच्छन्नं पातकं भवेत् एकपंक्त्युपविष्टानां दुष्कृतं यद्दुरात्मना सर्वेषां दुष्कृतं तावद्यावन्यंक्तिर्न भिद्यत इति × नारंभात्पूर्वं मूत्रपुरीषार्थगमने सचैलस्नानं षट् प्राणायामाश्च ततो भोजनं भोजनकाले

११

मार्जारपुच्छस्पर्शे स्नानं अन्त्यागम्यस्पर्शे आचमनं भुंजानस्य मस्तकादौ विष्ठादि पतने मुखस्थितं ग्रासं त्यक्त्वा स्नात्वा यथाशक्ति न
घ्रांस्नात्वा प्राणायामत्रयं कुर्यात् नदन्तभोजने प्राजापत्यं भार्यया सहोदरैर्वा सहैकपात्रभोजने उपवासः ज्ञाति
भिः सहैकपात्रभोजने उपवासत्रयं विवाहे आपदि वा मार्गे वा भार्यया सह भोजने दोषः ज्येष्ठभ्रातृपित्राद्युच्छि
ष्टभोजने न दोषः दनिकेचित् शूद्रहस्तेन सिक्तान्नं विना यन्त्रिकं चिद्रूसेण उपवासः पञ्चगव्यप्राशनं च ऋतुभूमौ
भोजने अहोरात्रं गोमूत्रपानं चित्तपवर्तुपानं वनं विना पञ्चप्राणाहुती गृहीत्वा तदुत्तरं सर्वन्नभोजने प्राजापत्यं अत्य
न्ताभ्यासे चान्द्रायणं भुक्तिसमये चाण्डालान्त्यजग्रामचाण्डालरजस्वलादिदर्शने मुखस्थं ग्रासं समुत्सृज्य तदन्नं त्यक्त्वा
नर्बास्यमुखलेपं प्रक्षाल्य स्नायात् किंचिन्मात्रनिरिणे अष्टोत्तरशतं गायत्रीजपः तत्कृत्स्नभोजने पक्षिण्युपवा
सः समस्तभोजने त्रिरात्रमुपवासः मूत्रपुरीषोत्सर्गानन्तरं शौचकरणं विना भोजने त्रिरात्रं यावकपानं
अशक्तस्यैक उपवासः एकपंक्तौ भुंजानो विप्रो विप्रं यदि स्पृशेन्न दापात्रस्थमवशिष्टमन्नं भुक्त्वा विरमेत् न

183

ग· मं·
१२

नः सर्वैः सहोत्थाय पादाचमनादिना शुचिर्भूत्वाष्टशतं गायत्रीं जपेत् स्पर्शान्तरं पात्रस्थमपि न भोक्तव्यमिति केचि
त् उच्छिष्टान्नलेपसंस्पर्शने प्रक्षाल्य विरम्य स्नात्वा गायत्रीं त्रिशतं जपेत् पात्रगतमन्नं न भोक्तव्यं भोक्तव्यमिति के
चित् उच्छिष्टपात्रे उच्छिष्टलेपस्पर्शेऽपि भुंक्ते विरामः केचित्स्पृष्टपात्रमुत्सृज्यान्यान्यदन्नं परिवेष्य भुंजीयादित्याहु
स्तत्कृत्स्नभोजनविषयं भोजनकालेऽन्नमध्ये मक्षिकाकेशनखादिपातेन स्पृष्टमन्नं त्यक्त्वापः स्पृश्य शिष्टमन्नं भ
स्मना वा स्पृष्ट्वाम्बुना वा संस्पर्श्य भोजयेत् अस्थ्यादिदूषितेऽन्नत्यागः स्नानं घृतप्राशनं च दंतपाते चैवं रक्तो
द्विदुष्टेऽन्नत्याग उपवासश्च भोजनसमये सुरेखरक्तदर्शने त्रिरात्रमुपवासः तद्रक्तसहितान्नभोजने ब्राह्मीरसपानम
धिकं रक्तस्पृष्टान्नभोजनेप्येवं केशादिदूषितान्नभोजने ब्राह्मीरसपानं अमेध्यसंविकीटोपहतभुक्तो उपवा १२
सः पंचगव्यप्राशनं च भोजनसमये शूद्रस्पर्शेऽप्येवं वामहस्तनिर्मुक्तपात्रान्नभोजने एकपंक्तावेकस्मिन्नुत्थिते
पश्चाद्भोजने चोपवासः पंचगव्यप्राशनं च अशक्तौ नक्तं मार्जारकाकमूषकनकुलगवाद्युच्छिष्टभोजने उ

पवासो ब्राह्मीं संप्राशनं च इदं किंचिदन्नभोजने पूर्णाहारभोजने उपवासत्रयं अभ्यासे निकृच्छ्रः श्वा
धुच्छिष्टभोजने मासं पंचगव्यपानं मासं घृतपानं हिरण्योदकपानं च एकपंक्तौ भोजने पूर्वमेके नोत्तरापोशने नैके
नकृत्तु श्चान्द्रायणं अन्येषां भोजने ष्टोत्तरशतं गायत्रीजपः स्त्रीशूद्रादिभोजनोत्तरं पाकपात्रावशिष्टान्नभो
जने त्रिरात्रमुपवासः चतुर्थे ह्नि पंचगव्यपानं ज्ञानतो द्विगुणं अमत्याभिन्नकांस्यपात्रभोजने त्रिरात्रमु
पवासः मत्या प्राजापत्यं तादृशमृन्मयपात्रभोजने निकृच्छ्रः चंडालादिस्पृष्टकांस्यपात्रभोजने गोमुखस्पृ
ष्टकांस्यपात्रभोजने वा प्राजापत्यं मृन्मये पि तथैव वटार्काश्वत्थकुंभीतिंदुककोविदारकदंबवल्लीपलाशादि
निषिद्धपत्रभोजने चांद्रं पलाशकदलीपर्णादिषु एकजातिष्वेव भोजनं नानाजातिषु पत्रेषु एकत्र लग्नेषु भोज
ने चांद्रं भोजनकाले दीपनाशे विरस्य पाणिभ्यां पात्रमालभ्य मनसा भास्करं स्मृत्वा पुनर्दीपं कृत्वा पात्रस्थशेषम
न्नं भुंजीयात् अन्यदन्नं न भुंजीयात् तद्भोजने ष्टोत्तरशतं गायत्रीजपः प्रयोगपारिजाते तैलयंत्रसुपंत्रा

णां चक्रस्योलूखलस्य च एतेषां निनदो यावत्तावत्कालमभोजनं एतदुपलक्षणं तेन ग्राम्यादिनिनदेपि भोज
ननिषेधः तत्र भोजने ष्टोत्तरशतं गायत्रीजपः । नीलीक्षेत्रोत्पन्नधान्यभोजने नीलीसंस्पृष्टान्नभोजने वा चान्द्रा
यणं नीलीवस्त्रधारी हस्ता द्भोजने भोक्तुर्दातुश्च सांतपनं नीलीनाम नीलरंगोत्पत्तिकारक औषधिविशेषः भो
जनसमये चंडालरजस्वलादिशब्दश्रवणे यावच्छब्दस्तावद्विरम्य विष्णुस्मृत्वापउपस्पृश्य भुंजीयात् तच्छब्दश्र
वणकाले भोजने ष्टोत्तरशतं गायत्रीजपउपवासो वा भोजनसमये केशपिपीलिकादिदूषितान्नस्य ग्रासभक्षे पतिते
मुखस्थे ग्रासे निष्ठीव्य घृतं प्राशयेत् ग्रासनिगिरणे उपवासः महापातक्यवेक्षितस्य दुष्टपस्य वलीढस्य श्वा
द्यवक्लिष्टस्य गवाघ्रातस्य पर्युषितस्यात्मार्थपाचितस्य वृथापाकसंज्ञस्य अनिवेदितस्य दैव्यस्य अनिवेदितपि
त्र्यस्यान्नस्य अहुतानाहविषां वा ज्ञानेउपवासः मत्यापादकृच्छ्रः अभ्यासेर्धकृच्छ्रः अत्यभ्यासेतप्तकृच्छ्रः
विष्णोरनिवेदितान्नभक्षणेर्धकृच्छ्रः अभ्यासे मायश्चित्ताभ्यासः परिहितद्विगुणवस्त्रं नग्नस्य वा भोजनके
स्य

र्तुः सचैलं स्नानं प्राणायामश्च मत्या त्रिरात्रमुपवासः भुंजानस्य मुखस्रावे मुखस्थं ग्रासं त्यक्त्वा गुदशौचं कृत्वा नतो
गंडूषकरणादि मुखसंशोध्य स्नात्वा जले अघमर्षणं कुर्यात् मुखस्थग्रासनिगिरणे अहोरात्रमुपोष्य पंचगव्यं पिबेत्
भूयो ग्रासग्रसने त्रिरात्रमुपोष्य पंचगव्यप्राशनं स्यात् निमिषे नाष्टोत्तरशतं हवनं कुर्यात् रेतोमूत्रोत्सर्गेष्वेवं भुंजा
नस्याशौचश्रवणादिनान्येन वा निमित्तेनाशुचित्वे प्राप्ते मुखस्थं ग्रासं भूमौ निक्षिप्य स्नायात् तद्ग्रासग्रसने तूप
रात्र
वासः सर्वान्नभक्षणे त्रिरात्रमुपवासः कांजिकादिनाशौचं कृत्वा भोजने पुनर्जलेन शुद्धिं कृत्वोपोष्य पंचगव्यं पि
बेत् पंक्तियुग्मभोजने सांतपनं आपदि स्वकीयपाकेन शूद्रगृहे भोजने विष्णुस्मरणादि यत् किंचित्प्रायश्चित्तं अ
नापदि द्रुपदायाः शतं जपः अज्ञानान्मनुष्यश्वबिडालकुक्कुटगर्दभोष्ट्रकपिगोमायुकाकगृध्रादिमूत्रपुरीषसंस
सृष्टद्रव्यभक्षणे वाद्धं ज्ञानतो द्विगुणं सरोषसंस्कृतशंकिनप्रतिविद्धविद्विष्टान्नभोजने प्रतिनिमित्तं एकरात्रोपवासः पंचगव्य
प्राशनं गायत्र्यष्टोत्तरशतं जपश्च भोजनसमये शूद्रस्पर्शे उपवासः पंचगव्यप्राशनं च बुद्धिपूर्वकस्पर्शे सांतपनं भोजन

(18)

समयेप्येवं चांडालरजस्वलादिस्पर्शे सचैलं स्नानं शिशुकृच्छ्रः प्राणायामशतं च स्नानतो द्विगुणं यत्रानुच्छिष्टस्योच्छिष्टस्पर्शे स्ना
ने विहिते तत्र भुक्तोच्छिष्टस्य सर्वत्र प्राजापत्यं वामकरस्पृष्टान्नभोजने सांतपनं उच्छिष्टस्य लशुनादिस्पर्शे त्र्यहं कुश
जलपानं सावित्रीजपश्च उच्छिष्टस्यान्योच्छिष्टस्यस्पर्शे स्नानं भोजनोत्तरमुच्छिष्टयोर्मिथस्पर्शे उभयोरपि सद्यः स्ना
नं भुक्तोच्छिष्टस्य शूद्रादिस्पर्शे स्नानं उपोष्य परेद्युर्नक्तं नक्तं तदुत्तरेद्युः पंचगव्यपानं भोजनोत्तरमाचमनात्पूर्वं शूद्रा
दिस्पर्शेप्येवं अकामतः स्नानं सहस्रगायत्रीजपश्च भोजनोत्तरमाचमनात्पूर्वं मूत्राद्यमेध्यस्पर्शे पंचगव्यपानं उच्छि
ष्टस्य चांडालादिस्पर्शे त्रिरात्रमुपवासश्चतुर्थेह्नि पंचगव्यप्राशनं पादोनप्राजापत्यं च उच्छिष्टस्य रजकादिस्पर्शे त्रि
रात्रं स्नानपानं रजस्वलासूतिकादिस्पृष्टभांडभोजने दीपोच्छिष्टान्यगोच्छिष्टतैलसंस्पृष्टान्नभोजने वा त्रिरात्रमुपवा
सः रात्रेरर्ध्यात्स्त्नतैलसंस्पृष्टान्नभोजनेप्येवं तैलग्रहणाद्घृतेन दोष इति मयूखः भोजनोत्तरं शुद्ध्याचम
नात्पूर्वं मूत्रोच्छिष्टता मूत्रपुरीषयोरुत्सर्गोत्तरशौचकरणात्पूर्वं अधरोच्छिष्टता भोजनसमये गुदस्रावे मूत्रे रेतउ

धर्मे

त्सर्गेवाउभयोच्छिष्टता भोजनसमयेमुखेग्रासेऽस्थिते अर्धोच्छिष्टता अर्धोच्छिष्टेचांडालादिस्पर्शे पादकृ
च्छ्रं उर्ध्वोच्छिष्टस्यमूत्रपुरीषोत्सर्गेत्रिरात्रमुपवासः भोजनकर्तुःउच्छिष्टस्यवामद्यादिदूषितभांडस्पर्शेवं
डालादिदूषितजलस्पर्शेवास्नानंत्रिरात्रमुपवासः उच्छिष्टस्य उच्छिष्टशूद्रादिस्पर्शेप्येवं उच्छिष्टस्याश्वसूकरकुक्कु
टनरकाककंकगृध्रग्रामसूकरादिमूत्रविष्ठास्पर्शेस्नानंपंचगव्यप्राशनंसहस्रगायत्रीजपश्च मत्यासांतपनं उच्छिष्टस्य
काष्ठादिनाचंडालादिस्पर्शेसचेलस्नानं उच्छिष्टस्यकाष्ठादिनोच्छिष्टचांडालादिस्पर्शेसचेलस्नानमुपवासश्च उच्छि
ष्टस्यचांडालाद्यन्त्यस्पर्शेचांद्रायणं निमंत्रितस्यान्यत्रभोजनेउपवासः कामतस्त्रिरात्रं निमंत्रितस्यभोजनाद्युत्थाने
पतितचांद्रायणं चांडालादिभिर्दत्तभोजनेचांद्रायणंप्राजापत्यंच तत्स्पृष्टान्नभोजनेद्विगुणं नउच्छिष्टभोजनेचतुर्गु
णं उच्छिष्टस्यचांडालादिदर्शनेउपवासः चांडालादिर्यस्यगृहेज्ञानतस्तिष्ठतितस्यान्नमज्ञानाद्भुक्त्वाप्राजापत्यं ज्ञान
तः प्राजापत्यद्वयं अज्ञानाच्चांडालादिस्पृष्टान्नभोजनेषड्रात्रमुपवासः चांडालादिज्ञातमात्रभक्षणेत्रिरात्रमुपवासः ८

१७

नत्

उच्छिष्टस्य सूर्याचंद्रमसोर्नक्षत्राणां वा दर्शने उपवासः जलपानसमये मुखनिःसृतं तोयं यदि भोजनपात्रे पतेत् तदा तदन्नं न भोक्तव्यं भोजने प्राजापत्यं अभ्यासे चांद्रायणं गंडूषकरणासु वै हस्तप्रक्षालने प्राजापत्यं भोजनांते पवित्रग्रंथिं विस्रस्य भूमौ मंडले क्षिपेत् प्रमादात् भोजनपात्रे प्रक्षेपे प्राजापत्यं गंडूषसमये तर्जन्या मुखशोधने प्राजापत्यं ग्रहणसमये भोजने प्राजापत्यं ग्रहणवेधसमये भोजने त्रिरात्रमुपवासः कुक्कुटनखादिस्पृष्टान्नभोजने धर्मकृच्छ्रं अभ्यासे प्राजापत्यं चांडालादिभ्यः स्वोच्छिष्टदाने उपवासः पंचांडालरजस्वलादिदृष्टान्नभोजने उपवासः पंचगव्यप्राशनं च शैवसौरनिर्माल्यतीर्थनैवेद्यभक्षणे चांद्रायणं अभ्यासे द्विगुणमित्यादि जाबालिः शिवविष्णुद्विभिर्दैवैर्वैष्णवैर्यत्समर्पितं तद्भुक्त्वा विप्रवर्योसौ न भवेद्दोषभाक् न तु इति हारीतः शालग्रामादिभिः शंभोर्वैष्णवे

स्य पदर्पितं नोक्तव्यं तद्द्विजैर्नित्यं तन्नोयं न विवर्जयेदिति वार्धुषिकस्य अपुत्रिणश्चान्नभोजने त्रिरात्रमुपवासः मत्या प्राजापत्यं अभ्यासे चांद्र उरन्नभोजने प्राजापत्यं पुनः संस्कारः पंचगव्यं च उरन्नलक्षणमाह दे

वृत्तः व्यतीपाते वायने च महापुरुषभोजनं भूतप्रेतपिशाचानां यदन्नं बलिकल्पितं कुटुंबभोजनं चैव ब्रह्मराक्षस
भोजनमिति दीर्घसत्रभोजने एकवारे पंचगव्यं पक्षे तप्तकृच्छ्रं प्राकं च मासे चांद्रं तदनंतरं भूतले तल्लक्षणमा
ह स एव वर्षद्वयं वा वर्षं वापि यो वा को वा जनाधिपः संकल्प्य भोजयेद्विप्रांस्तद्दीर्घसत्रमुच्यते कर्तारं स्वकृतं पुण्यं
संवत्सरमुपार्जितं सद्यः प्रविश्य तत्सर्वमन्नमात्रपरिग्रहादिति एवमेव सहस्रब्राह्मणभोजने अयुतब्राह्मणभोजनादौ च तथैव शूद्रान्नभोजनेपि तल्लक्षणमाह मनुः तदन्नं तत्र हे भुंक्ते तदनुज्ञानि
रीक्षणं भुक्त्वा विप्रः स पापीयान्महांतं नरकं व्रजेदिति शूद्रगृहे वेश्यागृहे वा तद्द्रव्येण स्वयं पाकादिकं कृत्वा भो
जनेप्येवमेव सूतकादि तपे अज्ञाना भोजने तदन्ने छर्दि त्वा पंचगव्यं पिबेत् तदभावे एकाहमुपवासः पंचगव्यं चंद्रा
ते पुनः संस्कारः अभ्यासे सांतपनं आशौचिनां यावदाशौचं तावदाशौचं कृत्वा तद्दिने प्रायश्चित्तं सकृद्भोजने प्या
शौचं भवतीति विष्णुः क्रीतान्नभोजने चांद्रं संघान्नभोजने द्विवारपर्यंतं पावकं त्रिरात्रे प्राजापत्यं पक्षे चांद्रं मासे मू

20

प्रा॰ मं॰
य
१६

न्नं तत्सुस्रणमाह गौतमः संघीभूय द्विजाः सर्वे मार्गे तीर्थयाते पिवा स्वद्रव्यमेलनं कृत्वा पक्वान्नभुक्तौ कृते शनः ते सर्वे नर
कं यांति शूद्रतुल्या न संशय इति देवलोप्याह स्वैस्वैर्द्रव्यैरेकभांडे पाचयेयुः पृथक्पृथक् भुक्त्वा दोषं प्राप्नुवंति
शूद्रतुल्या भवंति नर इति पशुबंधे सोममेवावपाप्यागात्पूर्वं भोजने पुनः संस्कारपूर्वकं प्राजापत्यं वपाप्यागोर्ध्वं प्रा
जापत्यं ऋत्विगादिविषये त्वाह कात्यायन ऋत्विजां च परस्त्रीणां भोक्तृ प्यायागासमयनि उपोष्य रजनीम
कां पंचगव्येन शुध्यतीति अन्यगोत्रजानां सीमंते पुंसवने चौले वा भोजनेन सं वाद्रमित्यन्ये तद्दिने संस्कारात्पूर्वं

ह

तदन्नभोजने सहस्रगायत्रीजपः अन्येषु संस्कारेषु सांतपनं उच्छ्रागकभोजने उपोष्य परेद्युर्ब्रह्मकूर्चेति विनापंच
गव्यप्राशनं परमान्नकृसरापूपसंयावशष्कुल्यादि वृथा पक्वान्नभोजने तद्दिने वोपोष्य परेद्युः पंचगव्यप्राशनं वृथा
अन्नार्थमित्यर्थः आहिताग्नेः प्राजापत्यं देवपितृकार्यादौ न दोषः तदाह मनुः पितृकार्येषु सर्वेषु देवेषु बंधुसमा
गमे पक्वान्नभुक्त्वा न दत्तस्यमभूने क्षीरसंभवे गौतमोपि धनुर्मासे गृहे कन्या यदि स्यात्प्रथमार्तवा देवयाज्ञासुस

१६

भ

र्वासुकसगा नद्दोषभागिति कन्येति भगिन्यादीनामप्युपलक्षणं भगिनी च स्नुषा वा यत्प्रथमा वा रजस्वलेति मार्कंडेयो
क्तेः अर्कद्विपर्वरात्रौ च चतुर्दश्यष्टमी दिवा एकादश्यामहोरात्रं भुक्त्वा चांद्रायणं चरेदिति यत्यन्नं यतिपात्रस्थान्न
यतिहस्तार्पितान्नभोजने चांद्रं ब्रह्मचारिणोन्नभोजनेपि तथैव यतिर्द्रव्याण्यर्जयित्वा समाराधनादिकं करोति तच्चान्नं
यतिभिः सामटित्वा स्वभोजनानंतरं यदवशिष्यते तच्च यतिपात्रस्थं उष्णान्नभोजने पराकः तल्लक्षणमाह स एव तुष
पाषाणसंयुक्तं फलीकरणमिश्रितं देवपूजाविहीनं पदैश्च देवविवर्जितं उच्छिष्टं यदाघ्रातं बिडालाखुविमर्दितं ।
देवालये च यद्भुक्तं पुष्पहस्तं मासासिकं । धमन्या वापि शूर्पेण वदनेनानिलेन च शुष्कं पिंडीकृतं वान्नं उष्णान्नं कीर्तितं बुधै
ः एतद्भुक्त्वा विशुद्ध्यर्थं पराकं कृच्छ्रमाचरेदिति श्वेतवृंताकरक्तशिग्रुकनालखुबुवार्ताककलिंगबिल्वोदुंबराभिः सटा
दिभक्षणे चांद्रं अधोवायोरुत्सर्गे तदन्नं त्यजेत् तदन्नभोजने स्नात्वाष्टोत्तरशतं गायत्रीजपः भोजनकाले क्षुतजृं
भणयोस्त्वाह विष्णुः विप्रभोजनकाले तु क्षुते वा जृंभणेन था अन्योजलं गृहीत्वा तु तस्य मूर्ध्नि विन्यसेत् । एकैकं

जन्मसदनं दिवावाय दिवा दिवेति सुज्जृंभणादौ जलस्पर्शो विष्णुस्मरणं च अन्यस्य स्तुद्गहो विशेषः संग्रहे त्रिं
क्षापतनजृंभासु जीवेति छांगुलध्वनिः शास्त्रोक्तमपि च कर्तव्यमन्यथा ब्रह्महा भवेदिति अश्वलापनगृह्येतु क्षुत्वा जृं
भित्वाः मनोज्ञं तादृश्यापाय केगंधमाघ्राया क्षिस्यंदने कर्णध्वनने च सुवस्ता अहमक्ष्मा भ्यां भूयासं सुवर्चा मुखेन सुश्रुत्
कर्णाभ्यां भूयासमिति द्वक्स्रनूटूनिजपेदिति अत्रानाद्व्रात्यस्यो च्छिष्टाशने महाव्याहृतिभिरभिमंत्रिता अपः पिबेत् ज्ञाते एको
पवासः अभ्यासे प्राजापत्यं क्षत्रियोच्छिष्टाशने ब्राह्मीरसविपक्केन क्षीरेण त्र्यहं वर्तयेत् ज्ञाते त्रिरात्रमुपवासः अ
भ्यासे तप्तकृच्छ्रं वैश्योच्छिष्टाशने त्रिरात्रोपोषितो ब्राह्मीसुवर्चलां च पिबेत् ज्ञाते पंचरात्रमुपवासः अभ्यासेतिकृच्छ्रः शू
द्रोच्छिष्टाशने षड्रात्रं तन्नभोजनं ज्ञाते सप्तरात्रं पंचगव्यं पिबेत् अभ्यासे चांद्रायणं चंडालपतितादीनामुच्छिष्टाशने चांद्रा
यणं ज्ञानतो द्विगुणं अभ्यासे चतुर्गुणं वृथापाकस्यान्नभोजने प्राणायामत्रयं घृतप्राशनं च एकाहमुपवासो वा
वृथापाकलक्षणमाह हारीतः पत्रनाश्नंतिदेवाश्च पितरश्च यथाविधि वृथापाकः सविज्ञेयस्तस्यनाश्नात्कथं

च्चनेति सुमंतुरपि योहि हित्वा विवाहाग्निं गृहस्थ इति मन्यते अन्नं तस्य न भोक्तव्यं वृथापाकः स उच्यत इति
यस्तु भिक्षवे भिक्षां न ददाति सोपि तथैव शूद्रेण सहैकपंक्त्यां भोजने द्विरात्रमुपवासः चांडालादिपंक्त्यां भोजने
चांद्रं हस्तदत्तान्नभोजने प्राजापत्यं शातातपः सिके सुरसविकारगोरसलवणघृतादिहस्तदत्तभोजने एकोपवासः
कामतो दिनत्रयसाध्यं सांतपनं घृतादिपाचितापूपपक्वान्नादौ न दोषः वस्तु याज्ञवल्क्यः ब्राह्मणान्नं ददच्छू
द्रः शूद्रान्नं ब्राह्मणो हरेत् द्वयमेतदभोज्यं स्यात् भुक्त्वा तूपवसेदहः इति आपदि सच्छूद्रात्स्वगृहमागतमामान्नं
संप्रोक्ष्य गृह्णीयात् संप्रोक्षयित्वा गृह्णीयाच्छूद्रान्नं गृहमागतमिति विष्णुपुराणात् आहिताग्निविषये त्वा
स्तंबः आहिताग्निस्तु यो विप्रः शूद्रान्नेन प्रवर्तते पंच तस्य विनश्यंति आत्मा ब्रह्म त्रयोग्नय इति रजकादीना
मामान्नग्रहणे चांद्रं अपदि तदर्धं चांडालादीनामामान्नग्रहणे आपदि चांद्रं अनापदि द्विगुणं ब्राह्मे म
नोन्मत्तातुराणां च सुमूर्षौ वा कदाचन न गृहेनान्नमश्नीयात् प्रवसत्यग्निहोत्रिणि एतेषां तु गृहे भुक्त्वा द्विजश्चा

(२)

प्रा·मं·
१८

द्रायणं चरेदिति क्लीबाभिशस्तादिदृष्टान्नभोजने एकोपवासः तत्स्पृष्टान्ने चतुर्गुणं तदुच्छिष्टे षड्गुणं अभ्यासे
ष्टगुणं तैलाभ्यंगादिना स्नाननिमित्तेप्रासे तदकृत्वा भोजने स्नात्वा शेनरसहस्रं गायत्रीजपः तिष्ठन् प्रक्ष्णो वा
गच्छन् यानो वा यद्यन्नं भुंजीयात् तदा त्रिरात्रमुपवासः पादुकारूढपादः पर्यंकस्थितो वा भुंजीयात् तदा त्रिरात्र
मुपवासः परान्नपुष्टस्य चान्द्रायणं अभ्यासे प्रायश्चित्ताभ्यासः परपाकरतस्य तथैव तल्लक्षणं पारिजाते
पंचयज्ञान् स्वयं कृत्वा परान्नमुपजीवति सततं प्रातरुत्थाय परपाकरतस्तु सः इति एतयोरन्नभोजने त्वेतथैव
अन्नसत्रप्रवृत्तस्याग्निहोत्रिणश्चामान्नेन दोषः निषिद्धाचरणशीलस्यान्नस्य सकृद्भोजने उपवासः अ
भ्यासे प्रायश्चित्ताभ्यासः अग्निहीनस्यान्नभोजने त्रिरात्रमुपवासः ज्ञानतः प्राजापत्यं आपदि एको
पवासो ब्रह्मकूर्चश्च दिवादिवा भोजने शतं प्राणायामाः रात्रावपि तथैव पलपार्श्वे पदन्नं वारि
हीनं च पक्वं केवलपावके तदन्नं फलवत्स्वादुस्वपूपाद्यपि न दुष्यति लवणांबुविनायन्नपाचितं जातवेदसि

१८

तिद्दन्नं फलवर्म्मात्स्यं शूद्राद्दपि नदुष्यति तैलं गव्यं बुसंयोगात् निष्ठंलवणयोगात: ॥ [illegible] ॥ शूद्रा

न्नं त्रितयसंयोगादन्नमित्यभिधीयते इति आपदि सकृत् परान्नभोजने ष्टोत्तरशतं गायत्रीजपः अनापदि स

हस्रं अभ्यासे प्रायश्चित्तान्यासः याज्ञवल्क्यः परान्नेनोदरस्थेन भार्यां समधिगच्छति यस्यान्नं तस्य

ते पुत्रा अन्नाद्रेतः प्रजायते इति मातापित्रोर्गुरोरन्नं यदन्नं मातुलस्य च श्वश्रूश्वशुरयोरन्नं प्रकीर्तितं नभि

नि बोधायनः अनाश्यान्नस्यान्नमशित्वा तत्र तत्समं इति जपेदिति तथा च स एव अभोज्यानां च सर्वे

षाम भोज्यान्नस्य भोजने ऋग्भिः स्तरत्समंदी यतीर्ज पेत्पापशोधनमिति आश्वलायनगृह्येपि अगाम

नीयां गत्वा याज्यं याजयित्वा अभोज्यं भुक्त्वा प्रतिग्राह्यं प्रतिगृह्य चैत्यं यूपं वोपहत्य पुनर्मामैत्विन्द्रियं पुन

रायुः पुनर्भगः पुनर्द्रविणमैतु मां पुनर्ब्राह्मणमैतु मां स्वाहा इमे ये धिष्ण्यासो अग्नयो यथा स्थानमिह

कल्पन्तां वैश्वानरो वावृधानोन्तर्यच्छतु मे मनो हृद्यं तरमम तस्य केतुः स्वाहेत्याज्याहुती जुहुयात् समिधो वा जु

पूर्वे

न परान्ने

प्रा॰ मं॰
१९

पेद्धेति जपपक्षे मंत्रयोर्नस्वाहाकारः अन्यश्राद्धशेषभोजने तु जाबालिः विप्रस्त्वन्यगृहे श्राद्धिकान्नं भो
जनेच्चरेत् प्राजापत्यं विशुद्धिः स्यात्तातिगोत्रेन दोषकृत् श्वशुरस्य गुरोर्वापि मातुलस्य महात्मनः ज्येष्ठ
भ्रातुश्च पुत्रस्य वत्स निष्ठस्य योगिनः एतेषां श्राद्धशिष्टान्नं भुक्त्वा दोषो न विद्यते इति अथ श्राद्धभोज
ने आमान्नादिश्राद्धीयद्रव्यमतिगृह्य वा प्रायश्चित्तानि तत्रांतर्दशाहे यानि श्राद्धानि नवश्राद्धसंज्ञानि
तत्र पादकृच्छ्रं अनापदि चांद्रायणं संवत्सरपर्यंतं भोजनात्साक संहिताध्ययनं वा एतेषु श्राद्धेषु आमा
न्नप्रतिग्रहे तप्तकृच्छ्रं एकादशाहे महैकोद्दिष्टे चांद्रायणं अनापदि चांद्रकायं च कवले कवले चांद्राय
णमिति हे सांद्रे प्रायश्चित्तानि तेन पुनः संस्कारः द्वादशाहे आद्यमासिके ऊनमासिके च पादोनकायं अनापदिका
यं पराकश्च द्विमासिके त्रैपक्षिके ऊनषाण्मासिके ऊनाब्दे चार्धप्राजापत्यं अनापदि पादोनं अतिकृच्छ्रं वा
त्रिमासादि संवत्सरविमोकांतेषु सपिंडीकरणश्राद्धे चोपवासः अनापदि कृच्छ्रः पादकृच्छ्रो वा त्रि

१९

रात्रमुपवासः कृच्छ्रार्धं वा प्रथमाह्निके द्वितीयाह्निके तृतीयाह्निके च पादोनकार्यं अनापदि चांद्रं एवमुच्छि

ष्टेषु भोजने दोष उक्तः काशिकायां मनेहनि तु संप्राप्ते यावदब्दचतुष्टयं बहिः श्राद्धं प्रकुर्वन् न तन कुर्या

च्छ्राद्धभोजनं प्रथमे स्त्रीनिमज्जा च द्वितीये मासभक्ष्यं तृतीये ह्यपिरं प्रोक्तं श्राद्धं शुल्यं चतुर्थकमिति स्म

त्यन्तरे च स सप्तत्रिंशत्त्रयो मासान् श्राद्धे भुंक्ते तु मोहितः स पंक्तिदूषितः पापी प्रेताशी च भवेत् इति चतुर्था

ह्निकादौ षट्प्राणायामाः नक्तं वा दश षट् प्राणायामाः अतुक्तौ पार्वणश्राद्धे दर्शादि देशान्ते प्राणायामाः का

म्यनैमित्तिकश्राद्धेषु दोषाल्पत्वे दशवत्षट्प्राणायामाः यस्मिन् श्राद्धे भोक्तुर्दोषबाहुल्यं तत्र प्रायश्चित्तमपि

तदनुसारेण कल्पनीयं यथा सूतके मृतके भुंक्ते गृहीते शशिभास्करे छायायां हस्तिनश्चैव न भूयः पुरुषो भ

वेदित्यादि तत्र चान्द्रायणादि प्रायश्चित्तं कल्पनीयं वृद्धिश्राद्धे प्राणायामत्रयं सीमंतनामकरणजातकर्म चू

डाकर्मांगवृद्धिश्राद्धे सांतपनं अनापदि चांद्रं अन्यसंस्कारांगवृद्धिश्राद्धे उपवासः अनापदि त्रिरात्रमुपवा

दू

२५

प्रा॰ मं॰
२०

सः पतितत्वं ज्ञात्वा दुर्मरणादिमृतानां श्राद्धे बुद्धिगुणं प्रायश्चित्तं गुरुद्रव्यार्थं श्राद्धभोजने प्रायश्चित्तार्धं
जपशीलस्यानिस्पृहस्य च तदर्धं सन्न्यासादिश्राद्धे बुद्धित्रिचतुर्गुणानि प्रायश्चित्तानि अभ्यासे द्विगुणं
आमहेमसंकल्पश्राद्धेषु तत्तदर्धानि उशनाः दशकृत्वः पिबेदापो गायत्र्या श्राद्धभुग्द्विजः ततः सं
ध्यामुपासीत जपेच्च जुहुयादपीति एतत्स्वकीयसायंसंध्याहोमजपाद्यधिकारार्थं अन्यस्य होमअन
धिकारदर्शनात केचिदिदमनुक्तप्रायश्चित्तमित्याहुः इति श्रीमच्चित्पावनकेळकरोपाभिधमहादे
वात्मजबापूभट्टविरचितायां प्रायश्चित्तमंजर्यां भोजनसंबंधिप्रायश्चित्तानि अथ पानसंबंधिप्राय
श्चित्तानि तत्र पतितापवित्रं विनांबुपाने त्रिः प्राणायामः मत्याष्टशतगायत्रीजपः पीतावशिष्टजल २०
पानेऽपशुवन्मुखेन जलपाने चोपवासः शूद्रहस्तादुदकपाने उपवासः पंचगव्यप्राशनं च पीतावशिष्टमु
खान्निर्गतजलपाने त्रिरात्रमुपवासः अमत्या तदर्धं मत्याभ्यासे चांद्रं पराको वा वामहस्तेन जलपा

नेप्येवं चंडालादिस्पृष्टंबुसरिदध्यादिपानेलघुसांतपनः नल्वीनशेषपानेषडुपवासपूर्वकंपंचगव्य
पानं अभ्यासे आवृत्तिः जलपानसमये चंडालांत्यजरजस्वलादिदर्शने मुखस्थं जलमुत्सृज्य पाद्यमाच
मनंप्राणायामंचकुर्यात् मुखस्थजलनिगिरणे उपवासोस्पर्शनं गायत्रीजपश्च जलादिपानकाले चंडाल
रजस्वलादिस्पर्शे उपवासश्चतुष्टयं जलपानसमये मुखेरक्तदर्शनेन रक्तसहितजलपाने त्रिरात्रमुपवासः
कुशोदकपानंच रक्तस्पृष्टजलपानेप्येवं भिल्लेन गोमुखे चंडालोस्पृष्टेन वा कांस्यपात्रेण जलपाने पाद
कृच्छ्रं तादृशेन मन्मयपात्रेण जलपाने सार्धकृच्छ्रं अंत्यजादिभांडस्थितास्वच्छभांडस्थितजलदुग्ध
दध्यादिपाने ब्रह्मकूर्चः कामतस्तु पादकृच्छ्रं पुनः संस्कारश्च हवनार्थसंकल्पितपयोघृतादिहविस्तस्य
हवनं विना पाने उपवासः ज्ञानतः पादकृच्छ्रं अभ्यासेर्धकृच्छ्रः अत्यभ्यासेनमकृच्छ्रः शूद्रभांड
स्थजलपाने गुपाष्यबिल्वपत्रपलाशपत्रकुशक्वाथिनोदकपानं नवभांडस्थेनदोषः ज्ञानातपः १

तं तैलदधिक्षीरं तथैवेक्षुरसो गुडः शूद्रभांडस्थितं तक्रं तथा मधु नदुष्यतीति जलादिपानकाले श्वसूकरादिस्प
र्शे त्रिरात्रमुपवासः नडुच्छिष्टपाने प्राजापत्यं वेंडालास्यजरजस्वलादिभांडजलदुग्धदध्यादिपाने उपवा
सो ब्रह्मकूर्चश्च स्नानतः कृच्छ्रपादः पुनःसंस्कारश्च मपाजलपाने सारवृक्षनिर्यासाधारपात्रस्थजलपाने
नौकाजलनिःसारणपात्रस्थजलपाने कूपादेश्चर्मपुटकनिःसारितजलपाने वा सचैलस्नानपूर्वकमुपवास
: उपवासाशक्तौ पंचगव्यपानं आपद्धितज्जलं भूमिगतं कृत्वा पात्रांतरेणोद्धृत्य पेयं अत्यापदि न दोषः
मनुष्यशववयुक्तदूषितकूपादिजलपाने षडुपवासाः पंचगव्यं च कामतोभ्यासे पराकः अत्यभ्यासे तप्तकृच्छ्रः
अत्यंताभ्यासे चांद्रायणं मनुष्यातिरिक्तक्लिन्नशववयुक्तकूपादिजलपानेपि तथैव अक्लिन्ने उपवासत्रयं पं
चगव्यं च कामतो द्विगुणं विण्मूत्रास्थ्यादिदूषितकूपादिजले उपवासत्रयं कामतो द्विगुणं नादकूपादे
स्नानमात्रे त्वेक उपवासः त्रिषवणस्नानं गायत्रीजपश्च नाहकस्थलगंगादिजलपानादौ प्रायश्चित्तम

र्धकल्प्यं चंडालादिखातकूपजलपाने महासांतपनं अन्यखानितचंडालादिपरिगृहीतकूपजलपा
नेनरक्षं रजकादिखातकूपजलपाने अहोरात्रानंतरउपवासत्रयं मत्याभ्यासे द्विगुणं चंडालांत्यजादिखा
तनतडागाह्रदपुष्करिणीषु जानुदघ्नादल्पपरिमाणजलासु अहोरात्राज्जलपानेनक्तं स्नानंतरउपवास
ः जानुदघ्नादधिकजलासु न दोषः रजकादिभांडस्थजलादिपाने सकृत्स्नानानंतरउपवासः मत्या उपवा
सत्रयं अभ्यासे प्रायश्चित्ताभ्यासः मूत्रपुरीषोत्सर्गानंतरं शौचकरणं विना जलपाने उपवासः पं
चगव्यप्राशनं च अर्धभुक्तान्नपात्रेण जलपाने उपवासः सूतकिनो जलपाने पंचगव्यप्राशनं विण्मूत्रादि
दूषितकुंभस्थोदकपाने सांतपनं सर्वत्रानुक्तौ दुष्टभोजने यत्प्रायश्चित्तं तद्दुष्टजलपानेर्धपरिकल्पनीयं

इति पानसंबंधिप्रायश्चित्तानि । अथाभक्ष्यभक्षणे प्रायश्चित्तानि तत्राभक्ष्यभक्षणं वा
द्दुष्टभावदुष्टक्रियादुष्टगुणदुष्टकालदुष्टसंसर्गदुष्टस्वभावदुष्टभेदेन सप्तविधं तत्र भावदुष्टं यथा क्षुधा

28

गय० मे.
२२

र्नेश्वनको भुंक्ते मामकं त्वन्नमेव हीत्यादि तल्लक्षणे तत्पक्वं भावदुष्टं तु पयोदध्यादौ वर्णेन अकरनश्चातिस
दृशान यामलादिशंकां जनयति शास्त्रप्रयुक्त विषादिशंकां वा जनयतीति तल्लक्षणेपि तथैव क्रियादुष्टं तु का
न्त्रिया निंदकस्यास्यदीयते किमनेन वेत्यादि तल्लक्षणेपि तथैव करनिर्मथित दधिभक्षणे अभ्यास
निकृच्छ्रं पुनरुपनयनं चेत्यादि च गुणदुष्टं तु यथा मधुररसऔषध्यांतरसंयोगदम्लीभवतीत्यादि
तल्लक्षणेपि तथैव कालदुष्टं तु ग्रहणादिना काले न दुष्टयानयामं गतनरसं पर्युषितमित्यादि कांजिका
दिं च बहुकालवशात् तल्लक्षणेपि तथैव संसर्गदुष्टं यथा मद्यादिकुसुमादीश्चफलकंदे सुमूलका
न्न विण्मूत्रदूषितान्भ्रोश्पमादकं समाचरेत् केशकीटावपन्नं च नीलीकीटोपघातितं स्नात्वा स्त्रिव
मेसंस्पृष्टं भुक्त्वा जनूपवसेदहरित्यादि इदं प्रायश्चित्तं नरसानुपलब्धावत्तानन: किंचिद्दृष्टे तान्नतः कृच्छ्रा
र्धं संपूर्णदुष्टे प्राजापत्यं ज्ञानतोभ्यासे प्रायश्चित्ताभ्यासः कश्चित्तु स्वद्रव्याणामपि मिथः संयोगाद्दु

प
२२

२

ष्ठत्वं यथा लवणपयसोः संयोगे मद्यत्वं तन्द्रक्षणे चांद्रायणं पुनरुपनयनं चेत्यादि गुडेन सह दधिभक्ष
णे चांद्रायणं पुनरुपनयनं चेत्यादि च ताम्रपात्रस्थगव्यादिभक्षणे हेमाद्रौ ताम्रपात्रस्थितं गव्यं गोमूत्रं
तक्रमेव च दधि वा मासिकं वापि नालिकेरोदकं तथा नालिकेरोदकं कांस्यपात्रस्थं गव्यमेव च लवे
णाक्तं पयश्चैवमद्यात्प्राणं तथैव च अज्ञानाज्ज्ञानतो वापि सुरापानसमं विदुः तत्र चांद्रायणं प्रोक्तं ज्ञा
नतस्तद्द्वयं भवेदिति स्वभावदुष्टपलांड्वादि ग्राम्यारण्यपशुपक्षिसरीसृपमंडूकगोधादीनां मांसभक्षणे
चांद्रायणं एतेषां विण्मूत्ररेतआदिभक्षणेपि तथैव एषां केशनखप्राशने अज्ञानादेक उपवासः ज्ञानत
स्त्रिरात्रं लशुनगृंजनछत्राकपलांडूनां अज्ञानात्सकृद्भक्षणे सांतपनं ज्ञानतश्चांद्रायणं अभ्यासे
तदावृत्तिः सर्वत्र पुनरुपनयनं अत्यंताभ्यासे पातित्यं गृंजनं लशुनभेदः एषां मुखप्रवेशमात्रे अनुप
नीतबालेन सकृद्भक्षणे वा गायत्र्यष्टसहस्राधिकाभिमंत्रितजलेन मूर्ध्नि संपाताच्छुद्धिः सर्वत्र छर्दि

तेप्रायश्चित्तमर्थं गोध्ववर्णरसोर्लेशुनादितुल्यद्रव्यभक्षणेपितथैव वृक्षजनप्रभवस्लोहितवृक्षनिर्यासभक्ष
णेत्रिरात्रमुपवासः अभ्यासेप्राजापत्यं अत्यंताभ्यासेनसकृच्छ्रंपुनरुपनयनंच भक्ष्याभक्ष्यत्वेनसंदिग्धे
षुद्रव्येषुतुकंदमूलफलशाकादिषुसकृद्भक्षणेउपवासः अत्रनोप्रायश्चित्तावृत्तिः आर्त्विज्यादिवि
नाअविहितयात्रियुवकपुरोडाशादिहविर्भक्षणेअज्ञानात्सकृदुपवासः ज्ञानतः प्राजापत्यं पुनरुप
नयनंच प्रसूतायागोर्महिष्याअजायाश्चनूतनक्षतजलात्रायजलस्यचदशाहपर्यंतंपयः पानेस्त्रवक्षी
रदिदुग्धायागोः पयः पानेमरणवत्सायागोः पयः पानेमहिषीवर्जीतानामारण्यमृगीनाअजावर्जिता
नांद्विस्तनानांएकशफानांचपयः पानेकर्दनेएकउपवासः तदभावेत्र्यपः अभ्यासेप्रायश्चित्ताभ्या
सः अविरवरोष्ट्रवानरसूकरपयः पानेअज्ञानतः सांतपनं ज्ञानतेस्मात्सप्त[illegible]कृच्छ्रं अभ्यासे
चाकृच्छ्रपुनरुपनयनंच स्त्रियः क्षीरंद्विजः पीत्वाकथंचित्कामगोहितः पुनः संस्कृत्यचात्मानं

प्राजापत्येन शुध्यति मत्कुणकीटपतंगाक्षिमिजलचरसूक्ष्मप्राणिकेशनखास्थिचर्मवमितभक्षणे
वमने एककुउपवासः तदभावे जपः अभ्यासे आवृत्तिः ब्रतिनस्तु मुखमात्रप्रवेशेन सद्यस्न ब्राह्मी
रसप्राशन प्राशने कुशहिरण्योदकसहितघृतप्राशनपूर्वोक्तंप्रायश्चित्तंच रेतोविण्मूत्रभक्षणे चा
न्द्रायणं पुनरुपनयनंच श्वासे सुखजेरपनसाधुन्मादजनकत्वानिर्मितरसभक्षणे त्रिरात्रमुपवासः
अभ्यासे तदभ्यासः अज्ञानात्सुरासंस्पृष्टद्रव्यभक्षणे चांद्रायणं पुनरुपनयनंच रुधिरप्राशने स
घः स्नाने घृतकुशहिरण्योदकपाने च ज्ञानतस्त्वांद्रायणं रोगनिवृत्त्यर्थमद्यादिपाने स्नान्यपाने वा
नसत्कृच्छ्रं पुनः संस्कारश्च मासभोज्यपात्विनष्टद्रव्याशनेऽप्यहकृच्छ्रपक्वपयः पाने श्वापुच्छिष्टभ
क्षणे एकाहं ब्राह्मीसुवर्चलापाने ज्ञानतस्त्रिरात्रं अन्यस्मिन्नप्यभक्ष्यभक्षणे प्रायश्चित्तानुक्तौ तद्दू भक्ष्य (२८)
व्यदोषतारतम्येन प्राजापत्यचांद्रायणमित्यादि योज्यं अपि वाडुष्पाने अभक्ष्यभक्षणे च भोजनप्रका

प्राय० मे०
२४

णोक्तानि साधारणानि बौधायनाश्वलायनोक्तानि प्रायश्चित्तान्यनुष्ठेयानीति   इति श्रीमत्त्रि
तपावनवेळकरोपाभिधमहादेवात्मजबापूभट्टविरचिते प्रायश्चित्ते मेजत्यापानसंबंधीनि अभ
क्ष्यभक्षणसंबंधीनि च प्रायश्चित्तानि ॥ ॥ अथ मूत्रपुरीषोत्सर्गसंबंधीनि प्रायश्चित्तानि   तत्र यज्ञोपवी
तं विना मूत्राद्युत्सर्गकरणे स्नानं गायत्रीजपः   मूत्राद्युत्सर्गकाले कर्णस्थापितयज्ञोपवीताभावः प्रा
णैयज्ञोपवीतानि नवानि धृत्वा जीर्णानि सत्यजेत्   मूत्रपुरीषवेगधारणे तु स्नानं गायत्रीजपः
मूत्रपुरीषोत्सर्गात्पूर्वमेव शौचार्थं मृदं जलं चाहरेत्   उत्सर्गोत्तरमाहरणे सचैलं स्नानं   अथ मूत्रपुरीषोत्स
र्गे तत्स्थानवर्णने निषिद्धस्थानानि मनुः   न मूत्रं पथि कुर्वीत न भस्मनि न गोव्रजे   न फालकृष्टे मृद्देशे न
नद्यां न च पर्वते   न जीर्णदेवायतने न वल्मीके कदाचन   न ससत्त्वेषु गर्तेषु न गच्छन्नापि च स्थितः   न न
दीतीरमासाद्य न च पर्वतमस्तके   ससत्त्वेषु सप्राणिष्वित्यर्थः   पर्वतग्रहणेनैव तत्र निषेधे सिद्धे पुनः प

२४

वेनमस्तकरनहणंप्रत्यंनपर्वनेनदोषइतिद्योतयितुं पादाः प्रत्यंनपर्वनाइत्यमरः कूर्मपुराणेच अ
ग्नौचगवांतनिष्ठन्वैरथ्यांतीर्थेश्मशानके अंगारेगोमयेनधान्यकृष्टभूमिषुवेवृहि फलेजलेचिता
यांचवल्मीकेगिरिमस्तके देवालयेनदीतीरेदर्भपुष्पेकुशस्थले सस्यच्छायेषुमार्गेगोष्ठेभस्मसु
॥ स्थानेष्वेतेषुसर्वेषुकुर्यान्मूत्रादिकंचन यमः तुषांगारकपालानिदेवतायतनानिच राजमार्गं
श्मशानानिक्षेत्राणिचखलानिच उपरुष्टोनसेवेतच्छायावृक्षंचतुष्पथं उदकेचोदकांतंचपंथा
नंचविवर्जयेत् वर्जयेद्वृक्षमूलानिश्वभ्रबिलानिच तथा नद्वारेनोपद्वारेनतीर्थेनसस्यभूमौ
नाप्रच्छादितायांभूमौनोखलेनशाड्वलेनोयानेनचाकाशइति उपद्वारं द्वारसमीपं ऊखरः इरिण
प्रदेशः यत्रबीजमुप्तंनप्ररोहति सः शाड्वलोहरिततृणप्रदेशः मनुः वाय्वग्निविप्रानादित्यमप
ः पश्यंस्तथैवगाः नकदाचनकुर्वीतविण्मूत्रस्यविसर्जनं कूर्मपुराणेच अग्निवाय्वर्कगोसोमतु

मे

३

गाय. नं.
२५

लसीस्त्रीद्विजन्मनः॥ पश्यन्नग्निमुखोमूत्रपुरीषादिनकारयेत् तथाच नसोपानन्मूत्रपुरीषेकुर्या
त्नपादुकयुक्तोनछत्रवान्नापरिवेष्टितशिराइतिउपानहौचर्ममयौ शौचावशिष्टमृद्‌ जलेनप्रक्षाल्य
गंडूषान्कुर्यात् एवमादिनियमातिक्रमेप्रायश्चित्तमुक्तंस्मृतिरत्नावल्यां गायत्र्यष्टशतंचैवप्राणाया
मत्रयेनयुत प्रायश्चित्तमिदंप्रोक्तंनियमातिक्रमेसतीति देवलः निष्ठीवाजलेरेतोवान्यस्नानान्मूत्रपुरीषो
त्सर्गेतुसचैलस्नानपूर्वकंगोस्पर्शः मत्यातुसचैलस्नानमुपवासश्च अभ्यासेतुपवासत्रयंतत्रत्रिषव
णस्नानंगायत्र्यादिजपः प्रवहतेत्यस्यवाजपस्त्रिरघमर्षणंच अत्यंताभ्यासेतसकृच्छ्रः सतुदके मूत्रा
द्युत्सर्गेनरंशौचाकरणेप्येवमेव कूर्मपुराणेतु देवोद्यानेतुयः कुर्यान्मूत्रोच्चारंसकृद्द्विजः छिंद्या
च्छिश्नंतुशुध्यर्थंचरेच्चांद्रायणंव्रतं देवतायतनेमूत्रंकृत्वामोहाद्द्विजोत्तमः शिश्नस्योत्कर्तनंकृत्वाच
न्द्रचांद्रायणंचरेत् मूत्रपुरीषशुक्रयोरप्युपलक्षणं आत्मनः शकृद्दर्शनेत्वाहयमः दृष्ट्वासूर्यंनिरीक्षे

२५

नग्राममग्निंब्राह्मणंनतथेति प्रयोगपारिजाते गृहीत्वाजलपात्रंतुविण्मूत्रंकुरुतेयदि तज्जलंमूत्रसदृशंपीत्वा
चांद्रायणंचरेत् भरद्वाजः मलमूत्रंत्यजेद्विप्रोविस्मृत्यैवोपवीतधृक् उपवीतंतदुत्सृज्याद्धार्यमन्यन्नवं
नवं मूत्रपुरीषोत्सर्गवेलायांभक्षणेपानेवासचैलेस्नानमुपवासोव्याहृतिभिर्घृतेनेनाष्टोत्तरशतंहोमश्च
अधरोच्छिष्टस्यचंडालरजस्वलासूत्यजादिस्पर्शेसचैलस्नानंपंचगव्यप्राशनंच॥ श्वसूकरादिस्पर्शेप्येवं चं
डालाद्युदक्यास्पर्शेस्नानं चंडालाद्यन्नस्पर्शेत्रिरात्रमुपवासःपंचगव्यप्राशनंच श्वकाककुक्कुटरासभन
रादिविष्ठास्पर्शेसचैलंस्नानं मूत्राद्युत्सर्गानंतरंविलंबेनशौचाकरणेसचैलस्नानं मृत्तिकांविना
शौचकरणेप्राजापत्यंपंचगव्यप्राशनंच निर्जलारण्यादौमूत्रपुरीषोत्सर्गेजलंदृष्ट्वैवशौचंकृत्वासचै
लस्नायात् मलमूत्रोत्सर्गार्थंप्रवृत्तस्यतदुत्सर्गाभावेत्वाहवृद्धपराशरः उपविष्टस्तुविण्मूत्रंकर्तुंयस्तु
नविंदति सकुर्यादर्धशौचंतुस्वस्यशौचंसर्वदा॥ स्वस्थन्यासिनोयद्विहितंतस्यार्धमित्यर्थः स

स्म

पु॰ मं॰ वेत्रास्मिंस्त्वि षयेनादिष्टेष्टोत्तरशतं गायत्रीजपः प्राणायामत्रयं चेति संक्षेपः इति श्रीमच्चिनपावनकेळ
६ करोपाभिधमहादेवात्मजबापुभट्टविरचितायां प्रायश्चित्तमंजर्यां मूत्रपुरीषोत्सर्गनिमित्तकप्रायश्चित्तानि
अथ कर्मलोपप्रायश्चित्तानि तत्रापत्तौ संध्यायाः कालातिक्रमे त्र्याचम्य प्राणानायम्य संध्यो
पासनकाले चतुर्थार्घ्यं दद्यात् इदं द्वित्रिकालातिक्रमे बहुकालातिक्रमे तु प्रातः कालपर्यंते प्रा
णायामत्रयं सकृत्वा तं द्वादश मध्यान्हात् षट्त्रिंशत् स्नानकालातिक्रमे ष्टोत्तरशतं गायत्रीजपः स्मा
र्तस्याग्निहोमकालातिक्रमे सर्वप्रायश्चित्तं हुत्वा गौणकाले होमः लोपे त्वाह प्रजापतिः संध्योपा
सनहानौ तु नित्यस्नानं विलुप्य च होमं नैमित्तिकं शुध्ये गायत्र्यष्टसहस्रकं इदमेकदिनलोपे स
वर्नेष्वपि संध्यां यदि तु नोपास्ते अग्निकार्यं न वा कृतं गायत्र्यष्टसहस्रं तु जपेत्स्नात्वा समाहितः अर्घ्य
प्रदानतः पूर्वमुदये स्तमयेपि वा गायत्र्यष्टशतं जप्यं प्रायश्चित्तं भवेत्तदा स्मृत्यंतरे तु कालातिरमुक्तं २६

उदयाद्धटिकास्तिस्त्रः प्रातःसंध्याकर्मणि सायमस्तमयादूर्ध्वं मध्यान्हे द्वादशोर्ध्वे मुहू संध्या
कालस्त्वयं प्रोक्तोऽतिक्रान्तिस्तदतिक्रमे॥ प्रायश्चित्तं त्वष्टशतं गायत्रीजपः पूर्ववत् पंचयज्ञाना
मन्यतमस्य लोपे तु अकृत्वान्यतमं यज्ञं यज्ञानामधिकारतः उपवासेन शुध्येत पाकसंस्थासु चैव
हि सर्वलोपे त्वाह बृहस्पतिः अनिर्वर्त्य महायज्ञान्यो भुंक्ते प्रत्यहं गृही। अनातुरः सति ध
ने कृच्छ्रार्धेन स शुध्यति। अशक्तावुपवासः व्यासस्तु पयोमूलफलैर्वापि पंचयज्ञान्समाचरेत् अ
कृत्वा पंचयज्ञान्भुक्त्वा चांद्रायणं चरेदित्याह प्रजापतिः दर्शं च पूर्णमासं च लुप्त्वा स्तुभयमेव वा ए
कस्मिन्कृच्छ्रपादेन द्वयोरर्धेन शोधनं हविर्यज्ञेष्वशक्तस्य लुप्तमप्येकमादितः प्राजापत्येन शुध्यति
पाकसंस्थासु चैव हि कात्यायनस्तु पितृयज्ञात्यये चैव वैश्वदेवात्यये पि च अनिष्ट्वा नवयज्ञेन नवा
न्नप्राशने तथा भोजने पतितान्नस्य चरुर्वैश्वानरो भवेदिति आहिताग्नेर्वैश्वानरीष्टिः समांनेसोम

प्राय० म०
२७

यज्ञानां हानौ चांद्रायणं चरेत् अकृत्वान्यतमं यत्तं यज्ञानामधिकारतः अनादिष्टत्वाह मनुः वेदोदि
तानां नित्यानां कर्मणां समतिक्रमे स्नातकव्रतलोपे च प्रायश्चित्तमभोजनं आपदि किंचिद्विच्छिन्नस्ना
ने नित्यकर्मलोपे होतरशतगायत्रीजपः दिनत्रयातिक्रमे उपवासः आहिताग्नेः पर्वण्यस्युपुहो
माकरणे कृच्छ्रार्धं आहिताग्नेरित्युपलक्षणं तेनस्मार्ताग्नेरपि श्रौताजिहेरगान्देवप्रायश्चित्तं
अनातुरस्य सप्ताहं संध्यातिक्रमे पुनः संस्कारः नत्सूर्वं तु प्रायश्चित्तमाह जमदग्निः एकाहं समति
क्रम्य प्रमादादकृतं यदि अहोरात्रोषितो भूत्वा गायत्र्यष्टायुतं जपेत् द्विरात्रे द्विगुणं प्रोक्तं त्रिरात्रे त्रि
गुणं स्मृतं त्रिरात्रात्परतश्चैव शूद्र इवेवं न संशयः इति स्मृत्यर्थसारे सप्ताहं प्रातरस्नायी द्विजः शूद्रत्व
माप्नुयात् अत एव सदा स्नायाद्दर्शनिकश्चेद्वर्द्दिने तथा च शक्तस्य कूपोदकेनाब्जोदकेन वा सस्ना
हं प्रातःस्नानेपि प्राजापत्यं एकाहं नित्यक्रियालोपे एकाहमुपवासः एवं दिनाभ्यासे प्रायश्चित्ता

२७

भ्यासः उपवासाशक्तौ तत्स्थाने तत्प्रत्याम्नायत्वेन बहूपवासैरेकप्राजापत्यकल्पनया संवत्सरे षट्प्राजापत्या
नि भवंतीति मयूखे क्वचित्कर्मानुष्ठानमेकमेलोपे वा प्रायश्चित्ताभावः यथा संकटे द्विवाविहितक
र्मणा लोपे रात्रावप्यविकल्पेन व्याख्यातं तु कर्मैकं कर्म परिशिष्टे यदि दैवाद्दिनानि कर्माण्यकृतानि यावत्स्युर्हरं या
मिन्यास्तावत्क्रमेणैव सर्वाणि सौरं वर्जयित्वा कुर्यादाकृष्णो यथैवाध्यर्द्धप्रादिति एतन्मुनेर्मतः स्ना
नादि यथाक्रमं सर्वमाह्निकं कृत्वा सायंसंध्यामुपास्य ततः सायंहोमादि कुर्यात् केचित्तु प्रातः कालत्वा
द्यदौ सायंसंध्यामुपास्य ततः क्रमेणातिक्रान्तमाह्निकं कृत्वा ततः सायंहोमादि कुर्यादित्याहुः मा
ध्याह्नसंध्याया गायत्र्या वार्घ्यदानं उपस्थाने तु हविष्पान्तमजरं स्वर्विदि दिव्येकानविंशत्यृचात्मकं सौर्यं
वैश्वानरीयसूक्तं जपेत् तदुक्तं स्मरणिसंग्रहे मध्याह्नसंध्या रात्रौ चेत्समापन्ना क्रियते यदि सौरस्था
ने जपेत्सूक्तं सौर्यं वैश्वानरीयकमिति अंगिराः एत्नोमहरपर्यन्तं दिवाकर्मणि कारयेत् अवगाहे च सौरं च

त

प्राप॰ मं

२८

ब्रस्तयुक्तं च वर्जयेदिति अवगाहे स्नानं स्नाननिषेधसंनिधिनदीस्नानविषयः तूष्णीं गृहस्नानमुष्ण
तवारिणा भवत्येव तत्राग्निं प्रज्वाल्य तत्तं निधौतं तथी क्षमाणेन कर्तव्यमित्यादि दुष्टस्पर्शनिमित्तकप्रा
यश्चित्तप्रकरणे उक्तं केचिद्रात्रावपि ब्रस्तयुक्तमिच्छंति रात्रौ गोपीचंदनधारणनिषेधइतिस्मृतिमंजर्यां
रात्रिप्रथमयामोत्तरं तु रात्रिविहितकर्मणामेवानुष्ठानं दिवाविहितानां तु लोपप्रायश्चित्तमेव रात्रा
वपि सार्धप्रहरोत्तरं नैव कर्माधिकारः अश्वलायनस्मृतौ उक्तं कर्म यथाकाले यदि कर्तुं न शक्यते
अकाले वापि तत्कुर्याद् उत्कृष्याप्यपकृष्य वा यत्तु अकाले यत्कृतं कर्म प्राप्तकाले ॥ ॥
पुनश्चरेदिति वचनं तदुत्कृष्टस्यापकर्षविषयं प्रामादाद्दालस्यादिना वा दिवाविहितकर्माणि क्रमेण रा
त्रौ प्रहरपर्यंतं प्रायश्चित्तपूर्वकमाचरणीयं गौतमः राष्ट्रक्षोभे नृपक्षोभे रोगार्ते क्षयसूतके संध्यावंदन
विच्छित्तिर्न दोषाय कथंचन अत्रापि यथासंभवमाचरणीयं लोपे तु किंचित्प्रायश्चित्तं तथा च देवाग्नि

५

२८

द्विजदेवानां कार्ये महति संस्थिते संध्याहीनेन दोषोऽस्ति येन तत्पुण्यसाधनमित्यन्यत्र विस्तरः इति
दिक् इति श्रीमच्चित्पावनकेळकरोपाभिधमहादेवात्मजबापूभट्टविरचितायां प्राय
श्चित्तमंजर्यां कर्मलोपप्रायश्चित्तानि अथ रेतःसेकसंबंधिप्रायश्चित्तानि तत्रादौ स्व
भार्याविषयिकाण्युच्यंते तत्र दिवामैथुने अमत्या स्नानमात्रं मत्यानुसचैलस्नानं प्राणा
यामश्च अभ्यासे त्रिरात्रमुपवासः प्रवासादागतस्य दिवामैथुनेऽपि न दोषः पर्वणि मैथुने स
चैलस्नानं वारुणीभिर्मार्जनं च षोडश्यां रात्र्यां पर्वण्यपि गच्छेत् श्राद्धदिने मैथुने उपवासः वर्ज्य
तिथिषु मैथुने उपवासः अप्रवासस्य चैलस्नानं वारुणीमार्जनं च सन्निहितस्यारोगिणः ऋतौ भार्यामग
मने र्धकृच्छ्रं उक्तं च बृहस्पतिना आहिताग्निरुपस्थानं न कुर्याद्यस्तु पर्वणि ऋतौ न गच्छेद्भार्यां वा
सोऽपि कृच्छ्रार्धमाचरेदिति भार्यायाश्चापि ऋतौ भर्तुरनुपसर्पणे दोषमाह नारदः आहूतायानुवै भर्त्रा नोपया

तित्वारान्विता साध्वीस्त्रीजायमेपुत्रिद्दशवर्षाणिपंचचैवेति स्त्रीत्वात्तस्याः प्रायश्चित्तार्धं पादकृ
च्छ्रमित्यर्थः हारिद्यत्कौ धमात्सर्यादिभिर्भर्तुरतिक्रमेतिकृच्छ्रं मद्यपानरतायांभार्यायांगमनेमासव
पैतेचांद्रायणं षण्मासेषडब्दे वत्सरेपानित्य तत्रपथोक्तविधिनाद्वादशाब्दं स्त्रीणांमद्यपभर्तृसंस
र्गेर्ध्यंप्रायश्चित्तं अज्ञानतः स्वपत्न्यारजस्वलायांगमनेरेजः सेकात्प्राक् निवृत्तौसचैलंस्नानंमहाव्याहृ
तिहोमश्च रेतः सेकेसचैलंस्नानपूर्वकंउपवासत्रयं चतुर्थेन्हिघृतप्राशनंच ज्ञानतः सकृद्गमने
सप्तरात्रमुपवासः अभ्यासेप्राजापत्यंज्ञात्यगब्राह्मणभोजनंच अतिकृच्छ्रमितिनिमन्तातरं चतुर्विंश
तिमतेविशेषः प्रथमेन्हिपराकः द्वितीयेमहासांतपनं तृतीयेप्राजापत्यमिति अत्यंताभ्यासेनवमा
सिकं त्रैवार्षिकमितिस्मृत्यर्थसारे षण्मासोत्तरंगर्भिणीगमनेप्येवं सूतिकागमनेद्विगुणं अज्ञाना
द्रजस्वलामुखास्वादनेचांद्रं ज्ञानतःसुरापानसमं तत्रनवार्षिकं रजोदर्शनात्प्राग्गमनेसहस्रंगायत्री

जपः अभ्यासेभायश्चित्ताभ्यासः वृत्स्यायां गतरजस्कायां गमने प्येतदेव भार्यायामुखमैथुने कृच्छ्रं
कर्णच्छिद्रे ध्वेषुरेतो विसर्गे सहस्रं गायत्रीजपः बलात्कारेण गुदमैथुने प्राजापत्यं तस्याइच्छया कृते सां
तपनं गोमुखे यानेमैथुने त्रिरात्रमुपवासो घृतप्राशनं गोभ्यो यवोदकदानं च अर्धकृच्छ्रं वा मैथु
नकालेन्यस्त्रीस्मरणे प्राजापत्यं मैथुनकाले त्यजादिस्पर्शे रजस्वलाश्वसूकरादिस्पर्शे वाऽप्युपवा
सत्रयं चंडालाद्युदकस्पर्शे सचैलं स्नानं तरुण्याः स्त्रिया अतिक्रमे अल्पकाले मासं पयोव्रतं चिर
काले चांद्रायणादिना रजस्येन योजनीयं भार्यायाः क्रोधादिना ऽयं न ममेत्युक्त्वा पुनरुपभोगेच्छायां विप्रसं
मत्या कृच्छ्रं चांद्रायणं कृत्वा तु गृहः कार्यः त्वं मे मातासदृशी अगम्येति वदने पुनरुपभोगेच्छायां विप्रसंमतिं
कृत्वा त्रिरात्रं महानदीसंगमे त्रिषवणस्नानपूर्वकमुपवासं कृत्वा तदंते गोदानं दशब्राह्मणभोजनं च कृत्वा तु गृ
हः कार्यः मैथुनोत्तरं शौचकरणात्पूर्वं ऋतुकाले मैथुने स्नानात्पूर्वं च मूत्रोत्सर्गे पुरीषोत्सर्गे वा त्रिरात्रमुपवास

34

गायु· मं· ३०

स्वभार्यायामगम्यायां गमने आश्वलायनसूत्रे अगमनीयां गत्वा याप्युन्त्वा पुनर्मामैत्विंद्रियमिति मंत्रयोर्हो
मः समिदाधानं जपो वेत्युक्तं तदाश्वलायनानां नियतं तत्र ह्यल्पदोषत्वमुक्तायामगमनीयागमने वेदितव्यं
रजस्वलादिदोषबाहुल्ये तु स्मृत्युक्तप्रायश्चित्तेनास्य समुच्चयः इमानि दिवामैथुनादिरजस्वलागम
नादिप्रायश्चित्तानि परदारेषु न तत्प्रतिपदोक्तप्रायश्चित्तैः समुच्चीयते इति भार्यागमनप्रायश्चि
त्तानि अथ स्त्रीसंभोगं विना रेतःस्कंदने प्रायश्चित्तानि तत्र स्वप्ने रेतोविसर्गे सूर्यस्य नमस्कार
त्रयं भयाद्रोगाद्वा रेतःस्खलने स्नात्वार्कं संपूज्य त्रिवारं नमस्कृत्य पुनर्मामैत्विंद्रियमिति जपेत् काम
तः सुरूपस्त्रीदर्शनस्पर्शनसंभाषणादिना रेतःस्कंदनेपि तथैव तत्राष्टोत्तरसहस्रं गायत्रीजपश्च वा ॥ ३० ॥
धिकं अकामतस्त्वष्टोत्तरशतं जपः कामतो गम्यास्त्रीदर्शनादिना रेतःस्कंदने प्राजापत्यं अकामतो
हठाद्रेतोविसर्गे पुनर्मामैत्विंद्रियं पुनरायुः पुनर्भगः पुनर्ब्राह्मणमैतु मा पुनर्द्रविणमैतु मा यन्मे

यद्रेतः पृथिवीमस्कान् यदोषधीरप्यसरद्यदापः इदं तत्पुनराददे दीर्घायुत्वाय वर्चसे यन्मे रेतः प्र
सिच्यते यन्म आजायते पुनः तेन माममृतं कुरु तेन सुप्रजसं कुरु इत्यनुवाकं जपेदिति कुतूहले का
मतस्त्वाह पराशरः गृहस्थः कामतः कुर्याद्रेतसः स्खलनं भुवि सहस्रं तु जपेद्देव्याः प्राणायामैः स
हस्रिभिरिति याज्ञवल्क्यस्त्वाह यन्मे रेतः पुनरभ्यांस्कन्नं रेतोऽभिमन्त्रयेत् स्तनयोर्भ्रुवोर्मध्येऽनेना
नामिकयास्पृशेदिति माधवस्तु यन्मे रेतः पुनर्मामैत्विति मन्त्राभ्यामनामिकया रेत आदायतेन भ्रु
वोर्मध्यमुपस्पृशेदित्याह कामतो वारुणीभिर्मार्जनमिति केचित् ब्रह्मचारिणो विशेषमाह देवलः
आश्रमिणां पुरोवर्ती ब्रह्मचारी हि देवतः कुर्यात्केनो विसर्गं च स्वप्ने वा मुग्धि मैथुने अवकीर्णी भवेत्ते
यः सर्वदा तं परिवर्जयेत् तस्य देहविशुद्ध्यर्थं पराकं कृच्छ्रमीरितं यद्वा गर्दभमालभ्य शुद्धिमाप्नोति योऽर्वि
कीं पुनः संस्कारपूतात्मा पंचगव्यं पिबेत्ततः एतेन शुद्धिमाप्नोति ब्रह्मचारी न चान्यथेति पुरुषगुदमै

प्राय॰ मं॰
३१

थुनेउभयोरपिप्राजापत्यं अभ्यासेप्रायश्चित्ताभ्यासः मूर्च्छादिनाबलात्कारेणगुदमैथुनेसचैलंस्नानंप्राणायाम
ः सूर्यदर्शनंपुण्यकृद्ब्राह्मणसंभाषणंपुण्यवस्तुध्यानंगायत्रीसौरपावमानीजपोब्रह्मकूर्चविधिनापंच
गव्यप्राशनंत्रिरात्रमुपवासः प्राजापत्यंच हेमाद्रौ कटादौपस्थुपस्यादौजलेवावन्हिमध्यतः रेतसः
स्खलनंकृत्वासुप्तिमैथुनतोपिवा सहस्रंतुजपोदेव्याः सचैलस्नानपूर्वकमितिमैथुनंविनाशुक्रोत्सर्गे
मूत्राद्द्विगुणंशौचमितिशौनकः गविसकृद्गमनेत्रिरात्रमुपवासोगोदानंचकामतोभ्यासेसांवत्सरिकं अ
स्यंताभ्यासेगुरुतल्पगसमं तत्तनवाब्दं महिष्याहरिण्यांचप्राजापत्यद्वयं अभ्यासेचांद्रं गर्दभ्यामु
ष्ट्र्यांचचांद्रं वडवायांपराकः अजायांमेष्यांचतप्तकृच्छ्रं शुन्यामतिकृच्छ्रंअन्यपशुजातिषुपादकृच्छ्रंके ॥३१॥
चित्सचैलस्नानंगोभ्योयवसभारदानंचेत्याहुः अथपरस्त्रीगमनप्रायश्चित्तानि तत्रमात्रादिग
मनंमहापातकं तत्प्रायश्चित्तंमरणांतिकंद्वादशाब्दिकादिचनदाचरणविधिर्ग्रंथांतरेद्रष्टव्यः अथा

गम्यास्त्रियउच्यंते पितृपत्न्यश्वभगिनीदुहिताचथांतेस्नुषा संबंधिनीसगोत्राचगुरुपत्नीपितुःस्व
सा मातुःस्वसामातुलानीआचार्यदुहितातथा मातामहीशिष्यभार्यापितृव्यस्त्रीनृपांगना अविवा
हितकन्याचब्राह्मणस्त्रीपतिव्रता विदुषीत्विगुपाध्यायाहितात्मीनांस्त्रियस्तथा आश्रितस्त्रीमित्रप
त्नीपौत्रीचशरणागता मातृपितृसखीवैश्यासन्निदीक्षितामखे विप्रस्यानुपभुक्तास्त्रीश्वश्रूर्वैरा
ग्यशालिनी निक्षिप्तापतितानाम्लेच्छचांडालस्त्रीचपुल्कसी अगम्यामुनिभिःप्रोक्ताएतास्त्वन्यतमां
द्विजः गच्छेन्मत्यासपतितोगुरुतल्पगसंमितः अज्ञानात्सकृदगम्यागमनेरेतःसेकात्प्राक्निवृत्तौचांद्रा
यणंपतु अगम्यागमनेकृच्छ्रातिकृच्छ्रौचांद्रायणंचेतिबौधायनोक्तं तदत्रातात्स्वस्त्रीभ्रांत्यासकृद्गमनवि
षयं मत्यागमनेपूर्णांतिकप्रायश्चित्तविधानात् गुरुतल्पगपातकेतत्समपातकेचप्रायश्चित्तं
तथांतरतोवगंतव्यं जातिमात्रब्राह्मणीगमनेवार्षिकं नादृश्यांगुणशालिन्यांव्रतस्थायांवाद्विवा

या

(३८)

गायं॰ मं॰
३२॥

र्षिकं श्रोत्रियपत्न्यां त्रिवार्षिकं क्षत्रियपत्न्यां वैश्यपत्न्यां च वार्षिकं शूद्रस्त्रियां षाण्मासिकं अनुप
भुक्तासु क्षत्रियवैश्यशूद्रस्त्रीषु द्विगुणं ब्राह्मण्यादिषु व्यभिचारिणीष्वर्धं व्यभिचारिणीषु अज्ञानागम
नकृ मने प्रायश्चित्तं यथा ब्राह्मण्यां मृगाजिनदाने क्षत्रियायां धनुः वैश्यायामायसीं शिलं ॥ शूद्रायां
मुदकुंभः सर्वत्र सचैलस्नानं त्रिरात्रमुपवासश्च ॥ अभ्यासे ज्ञानाश्चित्ताभ्यासः अत्यंताभ्यासे गर्भोत्पत्तौ वा
पातित्यं यत्तु चतुर्विंशतिमते ब्राह्मणीगमने कृच्छ्रं गर्भे संतपनं स्मृतं राज्ञी गर्भे पराकः स्याद्विट्गर्भे तु म
हापि कं शूद्रगर्भे द्विजः कुर्यात्तदश्चांद्रायणव्रतमिति तदत्यन्ताभ्यासात् ज्ञानात्स कृ मनविषयं रजकादि
स्त्रीमात्यजस्त्रीषु अज्ञानात्सकृ मने प्राजापत्यं ज्ञानतश्चांद्रायणं द्वित्रिर्गमनाभ्यासे षाण्मासिकं तत्र ॥३२॥
द्वौ मासौ भैक्ष्यभक्षणं द्वौ मासौ यावकपानं द्वौ मासौ पंचगव्यमिति गर्भोत्पत्तौ गुरुतल्पसमं तत्तु नवाब्दमि
ति मयूखः ब्रह्मचांडालस्त्री गमने द्वादशाब्दं सकृदज्ञानात् द्विजविध्वागमने धर्माद्दत्तपर्वतेऽध्यापाग

गा

व

तीर्थमासंप्राप्तः स्नानाच्छुद्धिः ज्ञानतोभ्यासे कारीषवध एकत्रैप्राणत्यागरूपप्रायश्चित्तनिषेधात्ब्रा
दिविप्रोपदिष्टंभवति एवमग्नेपिबोध्यं विधवायास्तदेवप्रायश्चित्तं गर्भधारणे पुरुषस्यपातित्यं विध
वायास्त्यागएव अज्ञानात्सकृत्कनिष्ठभ्रातृभार्यागमने प्राजापत्यंसांतपनंच ज्ञानतोभ्यासेपाति
त्यं ज्येष्ठभ्रातृपत्नीगमनेतु अगम्यागमनप्रकरणेगुरुपत्नीत्वेनोक्तं दासीगमनेवेश्यागमनेवासकृ
द्गमनेयावकं दिनत्रयेपराकः मासेप्राजापत्यं वर्षेचांद्रं तत्पुनःपातित्यं गर्भोत्पत्तौच बोध्यं
पांसंडपतितस्त्रीगमने दिनत्रयेयावकं मासेतप्तं षण्मासेचांद्रं वर्षादूर्ध्वंपातित्यं गर्भोत्पत्तौ
वप्रायश्चित्तं अविवाहितक्षत्रियादिकन्यागमनेकारछेदःशांद्रायणंच अविवाहितशूद्रकन्यागमनेशू
द्रस्त्रीगमनप्रायश्चित्ताद्द्विगुणं अथकन्यादूषणेप्रायश्चित्तं कन्यादूषणंनाम अंगुल्यादिनायोनि
विदारणमिति मिताक्षरा मध्यमानामिकांगुल्यायोनिप्रवेशंकन्यायोन्यपतितत्कन्यादूषणमितिहेमा

घर

बे

त्यं

प्राय० मं.
॥३२॥

त्रिः अंगुल्यादिनायोन्यां स्तनकरणं मिथ्यानदोषरव्यापनं वेति गंथांतरे तत्र चांद्रायणं त्रैमासिकं वा प्राय
श्चित्तं साद्विजैर्न विवाह्या अज्ञानात्तस्याः पाणिग्रहणे चांद्रायणत्रयं शूद्रेण ब्राह्मणकन्या दूषणे शूद्र
स्य वधः क्षत्रियवैश्ययोः कारछेदः दास्या वेश्यायाश्च वकन्य दूषणेन पूर्वोक्तं प्रायश्चित्तं तत्र किंचित्सा
धारणं योज्यं अथ विप्रस्त्री व्यभिचारे प्रायश्चित्तानि तत्राह मनुः यस्तु सः परदारेषु तत्र स्त्रीणां
विधीयते प्रायश्चित्तमिति शेषः ब्राह्मणेन बलात्कारेण भुक्तायाः प्राजापत्यं समत्याषाण्मासिकं अ
भ्यासे ब्दं गर्भोत्पत्तौ प्रसवो रंद्विवार्षिकं अज्ञानात्सकृद्गमने न गर्भोत्पत्तौ विप्रे पराकः क्षत्रिये चांद्रायणं वै
श्ये चांद्रायणपराकश्च शूद्रगर्भो यागारवेतिम पूर्वे कामतः क्षत्रियगर्भोत्पत्तौ त्र्यब्दं वैश्यगर्भोत्पत्तौ ष ॥३३॥
ड्वर्षं अज्ञानात्स्वपतिभ्रांत्या शूद्रगमने रेतः सेकात्प्राक् वृत्तौ चांद्रायणं रेतः सेके सकृत्कृच्छ्र चांद्रायणत्रयं गर्भो
त्पत्तौ तत्त्यागेन वामहा चांद्रायणत्रयं गर्भोत्पत्तौ [illegible] कामतो द्विगुणं प्रसवे त्या

उभयोः

गएवमत्याः शूद्रगमने शिरसोवपनं कारयित्वा सर्पिषाभ्यज्य नग्नां खरमारोप्य महापथं राजमार्गं वा भ्रामयेत्
॥ शूद्रं वीरणैर्वेष्टयित्वाऽग्नौ प्रास्येत् ॥ ततो ब्राह्मण्याश्चांद्रायणत्रयं ॥ अभ्यासे पातित्यं ॥ शूद्रेण ब
लात्कारानुक्तायाश्चांद्रायणं ॥ अज्ञानात् रजकादिगमने रेतःसेकस्याकृ निवृत्तौ चांद्रायणद्वयं ॥ म्लेच्छ
चांडालादौ चांद्रायणचतुष्टयं ॥ रेतःसेके द्विगुणं ॥ रजकादौ ज्ञानतः सकृद्गमने वपनादि पूर्ववद्दंडं कृत्वा
वार्षिकं तं ॥ ॥ म्लेच्छादौ [illegible] त्रिवार्षिकं ॥ अभ्यासे त्याग एव ॥ न त्र मरणांतिकं प्रायश्चित्तं ॥ ब्राह्मणचांडाल
गमने षडब्दं ॥ अथ प्रसंगाद्ब्राह्मणचांडाललक्षणमुच्यते ॥ तदाह मनुः ॥ कीकसानि द्विजोध्धृत्वा परकी
यानि पार्थिव ॥ एकमस्थानमात्रेण स चांडालसमो भवेत् ॥ कीकसानि अस्थीनि ॥ इदं च निग्रहेण नय
न विषयं ॥ तथा च स एवाह ॥ मेन कन्यमहं कुर्यामेतस्याद्य विशेषतः ॥ इति यः कुरुते बुद्धिं स चांडाल इतीरि
तः ॥ इदमपि प्रतिग्रहणविषयं ॥ अन्यच्च परार्थमौल्यामादायकाशीयास्याम्यहं न वा ॥ इति यो मनसि

ग्राय० मं·
॥३७॥

स्त्राप्यसंत्वोऽगलत्वमर्हतीत्यन्यत्रविस्तरः ॥ शिष्यगायगुरुगायाः पतिघ्न्याश्चात्याग एव ॥ अन्त्यगाशब्दे
नगरहान्निर्वासनं ॥ नतुसर्वथात्यागः ॥ विप्रदुष्टांस्त्रियंभर्तानिरुंध्यादन्यवेश्मनि ॥ तिमनूक्तेः ॥ तथा वतु
विशुद्धिमतेन्व ॥ स्त्रीणांनास्तिपरित्यागोब्रह्महत्यादिभिर्विना ॥ परित्यक्ताचरेत्यापंबद्धत्यंवापिकिंचन ॥
तत्यापंशतधाभूत्वाबांधवाननुगच्छतीति ॥ शिष्यगादीनांगर्भोत्पन्न्यांमहापातकयुक्तानांसर्वथात्याग
मसक्तोघटस्फोटविधिनात्यागः ॥ घटस्फोटादिविधिर्नयतरन्नोवसेयुः ॥ यदास्वभर्त्रेन आहितग
र्भाव्यभिचरतितदागर्भबाधाशंकयाप्रसवोत्तरंप्रायश्चित्तमाचरेत् ॥ तावत्पर्यंतएकगेवतिष्ठेत् ॥ नगरहेप्रचरे
त् ॥ गर्भस्यतुनदोषः ॥ गर्भिण्याश्चांडालगमनाद्युत्पन्नदोषयुक्तायाअपिप्रसवोत्तरमेवप्रायश्चित्तंत्या ॥३७॥
ग ॥ नगर्भिण्यास्त्यागः ॥ अनिच्छंत्याबलात्कारेणचांडालादिनासकृद्भुक्तायाः कृच्छ्रं ॥ द्विवारेपराकः ॥ त्रि
वारेचांद्रायणं ॥ रेतःसेकात्प्राक् निवृत्तौउपवासत्रयं ॥ एवंबंदिस्थायाबलाद्भुक्तायाः सांतपनं ॥ अत्यभ्या

सेत्यागएव॥ स्त्रीणांमानसिकव्यभिचारेपादकृच्छ्रं॥ तत्ररजोदर्शनावधिव्यवहार्यत्वमित्यर्थः॥ तत्कालेनरमे
वा रजोदर्शनेनैवप्रायश्चित्तं॥ किंतुरजोदर्शनेनैवशुद्धिः॥ रजसास्त्रीमनोदुष्टा [illegible] शुध्यतीतिमनूक्तेः॥ वा
विकेप्राजापत्यं॥ स्त्रियोयदात्वोऽस्वत्यात्प्रायश्चित्तंनेच्छंतितदामासेनासाकूर्पादिकर्तनमित्याद्याकरेस्पष्टं॥
॥ ॥ इति श्रीमच्चित्पावनकेळकरोपाभिधमदेवात्मजबापूभट्टविरचितायांप्रायश्चित्तमंजर्यारेतःसेक
संबंधिप्रायश्चित्तानि॥ ॥ अथप्रतिग्रहार्त्विज्यादिप्रायश्चित्तानि॥ तत्रसर्वत्रासत्प्रतिग्रहेतद्द्रव्यस्योत्सर्ग
कृत्वाप्रायश्चित्तमाचरणीयं॥ द्रव्योत्सर्गोप्रायश्चित्तयोरन्यतरंवाचरणीयं॥ उक्तंचयमेन॥ कर्मणागर्हितेनैवय
द्वित्तंसमुपार्जितं॥ तस्यत्यागेनशुध्यंतिधर्मस्यान्वेषणेनवेति॥ उत्सर्गप्रकारमाहसएव॥ अ[illegible]प्रास्यतुतद्द्र
व्यमन्यायेनपरागतं॥ प्रतिग्रहोवादातव्यः शिष्टानांब्रह्मवादिनामिति॥ तत्राद्यकृष्णाजिनलवणतुला
दिगर्हितद्रव्यस्यजलेप्रक्षेपः॥ सुवर्णधान्यवस्त्रादीनांब्राह्मणेभ्योदानमितिविवेक्तव्यं आपत्तौतुब

स्त

३७

मा॰प॰मे॰ ॥३५॥

५ सत्प्रतिग्रहः ॥ अ ५

तुर्विंशतिमते ॥ प्रतिग्रहेषु सर्वेषु षष्ठांशं तु परित्यजेत् ॥ पापे तु ॥ अथ चेत् प्रति[illegible]ति ब्राह्मणाः हीनिकर्षिनः ॥ दशांश मर्जितं दद्यादेवं धर्मो न हीयते इति ॥ एतन्मतद्वयस्य सदसत्प्रतिग्रहविषयत्वेन व्यवस्था ॥ अपि वा अपदि असत्प्रतिग्रहस्य षष्ठांशत्यागः ॥ अत्यापदि दशांशत्यागः ॥ सत्प्रतिग्रहेतु [illegible]नापदि पूर्वोक्तप्रकारेण त्यागः ॥ आपदि तु प्रायश्चित्तमात्रं ॥ दुष्टप्रतिग्रहेषु पूर्वोक्तत्यागानंतरं प्रायश्चित्ताचरणं ॥ न्यायेनोपार्जितस्य द्रव्यस्य विभागस्य शिष्टेन पात्र शिष्याद्या विधिना प्रतिग्रहः सत्प्रतिग्रहस्तु जातिकर्म[illegible]ल स्वरूपद्रव्यभेदेन षोढा ॥ तत्राद्यः श्वर्गलादेः प्रतिग्रहः ॥ द्वितीयः पतितादेः ॥ तृतीयस्तीर्थे कुरुक्षेत्रादौ च ॥ चतुर्थो ग्रहणादौ ॥ पंचमः कालपुरुष कृष्णाजिनस्तनशय्याभयतो मुख्यादिः ॥ ष ॥ ३५ ॥ षष्ठस्तु देवब्राह्मणाद्यपहृतस्यान्यायोपार्जितस्य द्रव्यस्येति ॥ कृचेत् दातृद्रव्य देशकालसंनिपातेपि दुष्टत्वं ॥ यथा दाता धर्मिष्ठः द्रव्यं त्वन्यायोपार्जितं ॥ द्रव्यं न्यायोपार्जितं दाता दुष्टः ॥ यथा वा ॥ दाताध्

गृ॰सा॰ अ २ शाका ४

र्मिष्ठः ॥ द्रव्यं चन्यायोपार्जितं देशस्तु तीर्थं कुरुक्षेत्रं वा ॥ ग्रहणादिकालो वेत्यादि ॥ तत्र तत्र तद्दोषान्तर
तम्येन्नायश्चित्तस्यापि समुच्चयः ॥ अथ प्रसंगात्तीर्थादि लक्षणमुच्यते ॥ तत्र तीर्थलक्षणं ब्रह्मपुराणे ॥
प्रवाहमवधिं कृत्वा यावद्धस्तचतुष्टयं ॥ तत्र नारायणः स्वामी नान्यः स्वामिकृतं तु न ॥ न तत्र प्रति
ग्रहक्लिष्यान्प्राणैः कंठगतैरपि ॥ अप्रवाहमिति जलावध्युपलक्षणं ॥ दानधर्मे ॥ भाद्रशुक्लचतुर्द
श्यां यावदाप्लवते जलं ॥ तावद्गर्भं विजानीयात्तदूर्ध्वं तीरमुच्यते ॥ सार्धहस्तशतं यावद्गर्भतस्तीरमु
च्यते ॥ तीरात्क्रोशमात्रं तु परितः क्षेत्रमुच्यते ॥ गव्यूतिः क्रोशद्वयं ॥ गंगाक्षेत्रं तु योजनमात्रं ॥ एकयोजन
विस्तीर्णं दिक्षु सीमान्तरद्वयमिति भविष्योक्तेः ॥ अत्र तीर्थे प्रतिग्रहनिषेधः सर्वास्वपि नदीषु ॥ प्रसि
द्धनदीषु गर्भेपि ॥ प्रसिद्धेतरगंगाद्यादिषु तीरेपि ॥ गंगायां तु क्षेत्रेपि ॥ पद्मपुराणे ॥ न तीर्थे प्रतिग्र
हं कुर्यात्प्राणैः कंठगतैरपि ॥ आपिकामातुरो जंतुरेकं रक्षेत्तिमानरं ॥ तथैव सर्वदा विप्रस्त्यजेत्तीर्थे प्रतिग्र

गायं- मं ॥२६॥

हं॥ तीर्थेप्रतिग्रहेयस्तुतीर्थविक्रयएवसःत्वलंबहुना॥ तुलापुरुषभागेतुद्विजश्चांद्रायणंचरेत्॥ सर्वप्रति
ग्रहेद्वैव्याद्दशलक्षजपाच्छुचिः॥ हिरण्यगर्भेचतथाब्रह्मांडेकल्पपादपे॥ जलेत्रिषवणस्नायीवर्षेसांतपन
द्वयं॥ महाभूतघटाद्येषुगायत्रीदशलक्षकंजपेच्चनियताहारःप्राणायामसहस्रकं॥ गोसहस्रप्रतिग्र
हियदाविप्रोस्वकामतः॥ गोमूत्रयावकाहारोमासेनैकेनशुध्यति॥ हिरण्यकामधेन्वादेःप्रायश्चित्तमिदं
स्मृतं॥ भूमिंधातुमयींगृह्णन्कृच्छ्रत्रयंतथा॥ भूत्वात्रिषवणस्नायीक्षिपेन्मासचतुष्टयं॥ एवंशुद्धिम
वाप्नोतिद्विजःषष्ठांशमुत्सृजन्॥ गुडधेन्वादिधेनूनांप्रायश्चित्तमथोच्यते॥ प्रतिग्रहेचरेद्विप्रःप्राजाप
प्रा॰२ त्यमतंद्रितः॥ जपेद्वापौरुषंसूक्तमथवाघमर्षणं॥ अहोरात्रस्थितश्चैवमुच्यतेतेनकिल्बिषात्॥ लोह ॥२६॥
हंसमोक्षधेनुंपापधेनुंचमोक्षदां॥ तथावैतरणींगांचऋक्षधेनुंचगोशतं॥ उत्क्रांतधेनुमित्यादिप्रतिगृह्यच
रेद्द्विजःप्राजापत्यत्रयंकुर्यात्शतंविप्रांश्चभोजयेत्॥ सोपस्कारगृहेविप्रोमहासांतपनंचरेत्॥ शतंवाभोज
॥

पेद्विप्रान्गायत्रीलक्षमेव वा ॥ सोपस्करं सर्वगृहोपस्करणसहितं ॥ केवलगृहमात्रप्रतिग्रहे ॥ पर्वतादशयेप्रो

क्तास्तथैव द्विगुरवीन्वगोः एषांप्रतिग्रहे विप्रः क्षिपेन्मासचतुष्टयं प्राजापत्येन कृच्छ्रेण षष्ठांशं च परित्यजेत् ॥ ज

पात्क्वदशलक्षं वा गायत्र्या नक्तभोजनात् ॥ शतेन मुच्यते पापाद्विप्राणां भोजनेन च ॥ रथो वाजी च महिषी तिलधे

नुर्गजोजिनं ॥ सूयमानाच सुरभिर्धीराः सप्त प्रतिग्रहाः ॥ एषां प्रतिग्रहे कृच्छ्रत्रयं लक्षजपो पि वा ॥ गजप्रतिग्र

हं कृत्वा द्विजश्चांद्रायणत्रयं ॥ महासांतपनं वापि ब्रह्मकूर्चसमन्वितं ॥ प्रतिग्रहः कुत्सितानां त्रिभिः कृच्छ्रैर्विशु

ध्यति ॥ रथप्रतिग्रहे लक्षं गायत्रीजपमाचरेत् ॥ अयुतं वाथ गायत्र्याः सगमे स्नानमाचरन् षष्ठांशं च परित्यज्य

ब्राह्मणान्भोजयेच्छुचिः ॥ अन्नपानेषु सावित्र्या अयुतं पमाचरेत् ॥ वैष्णवं व्रतं कुर्यान्मुच्यते तेन किल्बिषात् ॥

विप्रहानगृहीत्वापि यत्किंचित्पुस्तकादिकं ॥ ब्राह्मणान्भोजयेच्छ तथा कृच्छ्रमेकं समाचरेदिति ॥ ॥ अथ देशा

युक्तानि ॥ गजप्रतिग्रहे चांद्रायणत्रयं पुनः संस्कारश्च ॥ श्वेताश्वेवपनपूर्वकं नस कृच्छ्रत्रयं उपवासः पंचगव्यं च ॥

उं १

ग २

41

प्राय·सं
३७॥

पुण्यक्षेत्रे पुण्यकालेवा न कृप्रतिग्रहे चांद्रायणचतुष्टयं ॥ कनके सुवर्णे ॥ खदिरांगारवह्नौ तिसु
के ॥ गोमुखप्रसवप्रसुप्तधेनुप्रतिग्रहे पुनयपनपूर्वकं चांद्रायणत्रयं ॥ अलंकृतधेनुप्रतिग्रहे लक्षत्र
यं गायत्रीजपः ॥ अश्वे चांद्रायणत्रयं ॥ महिष्यां पराकः ॥ मृत्युहरमहिष्यां षडब्दं ॥ गोप्रतिग्रहे प्रा
जापत्यत्रयं ॥ आपत्तौ अष्टोत्तरसहस्रगायत्रीजपः ॥ धेनुप्रतिग्रहे प्राजापत्यत्रयं ॥ अयुतं गाय
त्रीजप्यं ॥ होमार्थे देवाभिषेकार्थे वा धेनुप्रतिग्रहे न दोषः ॥ तत्रयत्किंचित्प्रायश्चित्तं ॥ मकरसं
क्रमणे महादीपप्रतिग्रहे गोधूलिरजसा स्नानं अघमर्षणं तत्सवितुष्टयं चांद्रायणं च ॥ मुक्तपि ष्म
ये दीपेन मृत्युदं ॥ तिलदीपे पराकः धान्यदीपे प्राजापत्यं ॥ सर्षपदीपे प्राजापत्यं पंचगव्यं च ॥ कार्तिक
पौर्णमास्यां मकरसंक्रमणेऽन्यस्मिन्वा दिने कूश्मांडप्रतिग्रहे सचैलं स्नानं सहस्रं गायत्रीप्रजपस्त्वरण्ये कू
श्मांड संरक्षयामाप्रायश्चित्तमावर्तनीयं ॥ नदेवसुवर्णमयेरौप्यमयेवा प्रतिग्रहे लक्षं गायत्रीजपः ॥ लवण

॥३७॥

मन्निमहे चांद्रायणं ॥ माणिवासो हिरण्यमन्निमहे शतसहस्रं गायत्री जपः ॥ उष्ट्रक्षत्त्र मन्वहा
द्विस्तू स्विताप मस्तु हरप्येतु मन्तिमहे संहितारण्यकपारायणं पंचगव्यमाशनं च ॥ धनलोभेन महारत्वेन
रोगिण आलिंगने मासं हविष्याशनपूर्वकायुतसंख्याकमुंचामित्वेति सूक्तस्य जपः ॥ भिक्षाफलादिभ
न्निमहे पुण्यमंत्रोच्चारणं ॥ बहुफलेषु प्राजापत्यं ॥ राशीकृतनानाविधब्रह्महत्यादिपापनाशत्वेन
संक्रान्तिजफलमन्तिमहे वपनं पंचगव्यप्राशनमुपोषणं पुनः संस्कारः षडब्दं च प्रायश्चित्तं ॥ शंखमन्तिमहे
एकादश्यां शुचौ देशे उपविश्य सूर्योदयमारभ्य पुनः सूर्योदयपर्यंतं विष्णुसहस्रनामजपेत् ॥ पुनः स्नात्वा
पंचगव्यमाश्य पारणां कुर्यात् ॥ शंखविक्रयेप्येवं ॥ ताम्रपात्रकांस्यपात्रयोः मन्तिमहेन द्रव्यं चतुर्थांशं
हृत्वा पंचगव्यं पिबेत् ॥ अल्पतिलपात्रमन्तिमहे अयुतं गायत्री जपः ॥ विंशतिपलमिते ताम्रपात्रे नि
हितानां प्रस्थमात्रतिलानां मन्तिमहे लक्षं गायत्री जपः पंचगव्यप्राशनं च ॥ शंख्याघंगकांस्य

पात्रस्थितनिरीक्षिताज्यप्रतिग्रहे स्नानं सहस्रंगायत्रीजपः पंचगव्यप्राशनमुपोषणं च ॥ तदसत्से
॥ यथोक्तेतु अयुतंगायत्रीजप ॥ इति विशेषः दुर्जनान्न हिरण्यधान्यान्नोदकाद्यल्पप्रतिग्रहे स्ना
नं प्राजापत्यं च ॥ बहुत्वे द्विगुणं ॥ वेश्यायास्तांबूलवस्त्रादिप्रतिग्रहे वपनं पुनः संस्कारः प्राजापत्यं च
॥ सुवर्णषडंशंवाशल्पपतितादेः सकृत्प्रतिग्रहे चांद्रायणचतुष्टयं ॥ अभ्यासे त्रिगुणं ॥ अत्यभ्या
से पातित्यं ॥ व्यभिचारिण्याः प्रतिग्रहे सुवर्णे प्राजापत्यं ॥ धान्ये तदर्धं ॥ अन्नतोयादौ तदर्धं ॥ चा
तुर्मास्यव्रतोद्यापनखेन गोप्रतिग्रहे चांद्रं ॥ सुवर्णे तप्तकृच्छ्रं ॥ वस्त्रे प्राजापत्यं ॥ अन्ने पंचगव्यं
॥ एषु अल्पद्रव्येषु न तदर्धं प्रायश्चित्तं ॥ अत्यल्पद्रव्येषु पादमात्रं ॥ ततोपि न्यूने प्रायश्चित्तं
नास्ति ॥ कार्तिकमासव्रतोद्यापने प्रतिग्रहेप्येवं ॥ तत्रापि विशेषः ॥ दीपे चांद्रं ॥ सुवर्णे पराकः व
स्त्रकांस्यताम्रेषु प्राजापत्यं ॥ अन्नजलादौ तदर्धं ॥ माघमासव्रतोद्यापने धेनौ तप्तकृच्छ्रं ॥ सुव

र्णे प्राजापत्यद्वयं ॥ ताम्र कांस्य तिलेषु प्राजापत्यं ॥ अन्नजलवस्त्रेषु तदर्धं ॥ वैशाखमासव्रतोद्या
पने धेनौ चांद्रायणं ॥ शय्यायां द्विगुणं ॥ सुवर्णदोमाघमासव्रत ॥ सन्यासिनः अन्नमात्रप्रतिग्रहे
उपोषणं पंचगव्यं च ॥ रौप्ये प्राजापत्यं ॥ सुवर्णे कृच्छ्रं चांद्रं ॥ पतितयतेर्महाचांद्रं ॥ मठपतेः संन्यासिन
ः प्रतिग्रहे षडब्दमिति ॥ चंद्रिकायां ॥ उष्ट्रप्रतिग्रहे विप्रः क्षिपेन्मासव्रतुष्टयं ॥ प्राजापत्येन कृच्छ्रेण ष
ष्ठांशं तु परित्यजेत् ॥ जपेद्द्वादशसहस्रं वा गायत्र्या नक्तभोजनात् ॥ एतेन मुच्यते पापाद्विप्राणां भोजनेन चे
ति ॥ केचित्प्रतिग्रहेपि प्रायश्चित्तापवादः ॥ यस्मिन्प्रतिग्रहे दोषाभावस्तत्र प्रायश्चित्ताभावः ॥ यथा ॥ भू
मिपः प्रतिगृह्णाति यश्च भूमिं प्रयच्छति ॥ तावुभौ पुण्यकर्माणौ नियतं स्वर्गगामिनौ इति वचनात् भूमिप्रतिग्र
हे प्रायश्चित्तं ॥ इदमपि दक्षिणारहितायां ॥ दक्षिणासहितायां प्रतिग्रहे तु भवत्येव प्रायश्चित्तमिति चंद्रि
कायां ॥ एवं पुस्तक यज्ञोपवीत शालग्रामेष्वपि ॥ अनुक्तलक्षणे यज्ञोपवीतेप्यासादिभ्यस्तत्प्रतिग्रहे वा

प्राजापत्यमिति हेमाद्रिः तथा॥ यत्तु कर्मणि या धेनुर्व्रतधेनुस्तथैव च॥ मधुपर्के च या धेनुर्या धेनुः क
र्मसिद्धये॥ एतत्स्वनिग्रहे विप्रे प्रायश्चित्तेन विघतइति॥ यत्र बहुभ्यो दानं विहितं तत्र बहुभिर्विप्रैः प्रतिग्रहे न
दोषः अनादिष्टप्रायश्चित्तेषु प्रतिग्रहेषु तत्र दोषतारतम्येन सामान्यं प्रायश्चित्तमाचरणीयं॥ तानि च षड्विं
शन्मते॥ देव्या लक्षजपेनैव शुध्यते ऽसत्प्रतिग्रहात्॥ याज्ञवल्क्यः॥ गोष्ठे वसन्ब्रह्मचारी मासमेकं पयोव्रत
ः॥ सावित्रीजाप्यनिरतः शुध्यते ऽसत्प्रतिग्रहात्॥ मत्यहं जपसंख्यां तु॥ जपित्वा त्रीणि सावित्र्याः सहस्रा
णि समाहितः इति॥ पावमाने च सूक्ते वै सर्वपातकनाशने॥ अन्नपापानुरोधेन जपसंख्या कल्पनीया॥ बौधा
यनः॥ प्रतिग्रहीष्यमाणस्तु प्रतिगृह्य तथैव च॥ त्र्यृचस्तरत्समंदी तु चतस्रः परिवर्तयेत्॥ मनुः॥ जपि
त्वा त्रीणि सावित्र्याः सहस्राणि समाहितः॥ मासं गोष्ठे पयः पीत्वा मुच्यते ऽसत्प्रतिग्रहादिति॥ समाहितः
ब्रह्मचारी॥ मासं गोष्ठे वसन्पयः पिबन् अन्वहं त्रिसहस्रं जपेदित्यर्थः॥ आहिताग्नेस्तु विशेषमाह हारीतः

॥पवित्रेस्याविशुध्यंतिसर्वेघोराःमतिसन्नहाः॥ऐंद्रवेनमस्गारेस्याप्यविबामित्रविंदया॥तथा॥षष्ठेकालेप
याभक्षःपूर्णमासेप्रमुच्यते॥नर्पयित्वाद्विजान्कामैःसततंनिपतत्वनतइति॥अन्यानिचसामान्यप्रायश्चि
त्तानिपरिभाषाप्रकरणोक्तानिवक्ष्यमाणानिचयथाधिकारंदोषानुसारेणानुष्ठेयानीतिदिक्॥अ
थार्त्विज्यप्रायश्चित्तानि॥तत्रनरस्यार्थेयोग्यविप्रयाजनेनदोषः॥षट्कर्मान्तर्गतत्वेनविहितत्वात्॥
ततुनंस्कंदे॥याजयेद्याजनेयोग्यान्विप्रान्वृत्यर्थमादरात्॥अन्यथादोषमाप्नोतिनकर्मार्होभवे
दिह॥योग्यस्यापितुलापुरुषादिग्राभिचारिकादिघोरकर्मसुचदोषएव॥आपत्तौयोग्यस्यापिघो
रकर्मसुयाजनेअयाज्यानांसप्याजनेपिप्रायश्चित्तमाचरणीयं॥अयाज्याअनर्हाः॥तेचोक्ताःकू
र्मपुराणे॥ब्रात्योदेवलकश्चैवकुःशीलोगणकस्तथा॥शूद्रपतिःकर्महीनोलोकेकुत्सितवृत्तिमा
न्॥महापातकिनःसंगीक्षपरोगाभिगंदरी॥दुश्चर्माशुद्रसेवीचभिषकशुद्रान्नभक्षकः॥रथातुला

दिसंस्थाहीमर्यादाध्यानकस्तथा॥ स्वामद्रोहीस्वामगणीवयोद्दुः संसर्गवान्द्विजः॥ एते अनर्हा विज्ञेयाअ
पाज्याः परिकीर्तिताः॥ अनर्हांमध्वरेषुयेब्रत्साद्याश्चऋत्विजः॥ तेषांपविद्युस्य्यर्थेषडब्दंकृच्छ्रमीरि
तं॥ केशानांवपनंमो॰ पुनः संस्कार एवच॥ विधिनापंचगव्यंचशुद्धिर्भवतिनान्यथेति॥ इदंश्रौत
स्मार्तेष्टापूर्तादियाजनेषुसमानं॥ मयूरेवनुव्रात्यानांहीनजातीनामोर्ध्वदेहिकं कर्मअभिचारादिकं
वा अयाज्यायाजनं॥ तत्रकृच्छ्रत्रयमिसुक्तं॥ इष्टापूर्तादिमहाकर्मणिऋत्विजांद्वादशप्राजापत्या
नि॥ आपत्तौतदर्धं॥ तुलादिमहादानेषुचांद्रायणं॥ तुलायांचतुर्थांशंदत्वाशुभोः प्रयुतंरुद्राभि
षेकइतिवा॥ लक्षहोमेलोटिहोमेवाषडब्दं॥ सर्वत्रपदुक्तं प्रायश्चित्तंतदाचार्यस्य॥ तदर्धंब्रह्मसद

स्योपद्रष्टॄणां॥ तदर्धंहोत्रकद्वारपालजापकानां॥ तदर्धंमितरेषामिति॥ प्रथमरजोदर्शनेतुष
मासादिशांतोआचार्यापषडब्दंप्येनुमतिग्नहेद्विगुणं॥ प्रतिमाप्रतिग्नहेपादहीनं॥ भोजनेतदर्धं॥ ऋ

त्विजां पूर्ववदिति हेमाद्रौ ॥ सामान्यप्रायश्चित्तानामन्यतरदिति निर्णयसिंधौ ॥ अद्भुतशांतौ यथोक्तद
क्षिणाभावे निमित्तानुक्तौ आचार्यस्य चांद्रायणद्वयं ॥ अल्पत्वे चांद्रं अत्यल्पे प्राजापत्यं ॥ ऋत्विजां
शतं गायत्रीजपः ॥ पुनः संस्कारे गायत्रीमष्टोत्तरसहस्रं पुनर्जपः ॥ अथ परार्थं गायत्रीजपकर्तॄणां प्रा
यश्चित्तं ॥ दशलक्षजपतो देवी परार्थं कुरुते मीरितं ॥ शतं परार्थजपतः पराकः परिकीर्तितः ॥ सहस्रसं
ख्यया त्वन्यार्थं शुद्ध्यर्थं चांद्रमाचरेत् ॥ अस्तु नेति स्तुते वापि परार्थं धनलोभतः ॥ जपतस्तत्कर्माणि
सद्यः शीर्यं निर्देहितः ॥ तस्यापनयनं भूयः स्याच्चांद्रायणचतुष्टयं औपासनाग्नेः संधानं गायत्र्याह
नमेव च ॥ केशानां वपनं कृत्वा पवमान्यमतः परं ॥ परार्थं यावती संख्या गायत्र्याः प्रणवान्विता ॥ पुनः
स्वार्थं जपेत्पश्चात्ततः शुद्धिमवाप्यते ॥ एवं कृते द्विजः शुध्येदन्यथा जलकोवतू ॥ तस्य जन्म वृथा
लोके नाममात्रधारणमात्रकमिति सकृद्विप्रो त्स्वेष्टिकर्मण्याचार्यत्वकरणे प्राजापत्यं ॥ अनापदि तत्र

प ३
स्प
क २
55

प्राय॰ मं॰
॥ ४१ ॥

यं॰ अभ्यासे प्रायश्चित्ताभ्यासः । शूद्रात्येष्विकर्मणि तु सकृदापद्युति कृच्छ्रं । अ नापदि तत्त्रयं अभ्या
से प्रायश्चित्ताभ्यासः । अथ श्रोत्रेपशुभागभक्षणे प्रायश्चित्तं कूर्मपुराणे ॥ स्वबंधुकृतयज्ञेषु प्रास्सं
यत्पशुभक्षणं ॥ पारायणेन शुद्धिः स्यादन्यत्र त्रिगुणं भवेत् ॥ अश्नो त्रिये पित्र्ये गुण्यं शूद्रे पंचगुणं
भवेत् ॥ पुनः संस्कारकृत्पूतः शुद्धो भवति सर्वदेति ॥ पारायणं वेदस्य ॥ अन्यत्र परकीयगोत्र यज्ञे ॥
अश्रोत्रिये अश्रोत्रिययजमानकृतयज्ञे ॥ शूद्रे शूद्रद्रव्यग्रहणयज्ञे ॥ सर्वत्र पंचगव्यप्राशनं चेति ॥
ऋत्विजां सोमपाने च तत्रैव ॥ बंधुभिः सह यो पेतः पीत्वा सोमं महाक्रतौ ॥ स्वमंत्रोच्चारणं कृत्वा त्रि
वारं शुद्धिमाप्नुयात् ॥ स्वमंत्रः सोमभक्षणमंत्रः ॥ यत्र होता त्रैवा आध्वर्यवं वा औद्गात्रं वा क्रिपते तत्र

॥ ४२ ॥

ये मंत्राः सोमभक्षणविहिता स्ताक्त्रिरुच्चार्य शुद्धिमाप्नोतीत्यर्थः ॥ बंधुशब्देन सपिंडाः सगोत्राश्च बं
धुत्वं पंच गत्स्वतेऽनिति हेमाद्रिणा व्याख्यातं ॥ अबंधुभिः सह भक्षणे प्रायश्चित्तमुक्तं लिंगपुराणे ॥ आ

णे

ज्ञानहोतृभिः सार्धंयः कृत्वा सोमभक्षणं ॥ पूर्वोक्तेन प्रकारेण षडब्दं कृच्छ्रमाचरेत् ॥ सोमेस्य प्रायश्चित्तस्योपांशु
केन प्रायश्चित्तेन समुच्चयः ॥ उभयोः संनिपातित्वात् सर्वज्ञानादिष्टसामान्यप्रायश्चित्तमाचरणीयमित्युक्तं प्रा
क् ॥ ॥ इति श्रीमत्चित्तपावनकेळकरोपाभिध्यमहादेवात्मजबापूभट्टविरचितायां प्रायश्चित्तमंजर्यां पतितसह
त्वैज्यकरणप्रायश्चित्तानि ॥ ॥ अथस्तेयप्रायश्चित्तानि ॥ स्तेयं परद्रव्यापहरणं ॥ तच्च द्विविधं ॥
चौर्येण बलात्कारेणेति ॥ तत्र सुवर्णमशीतिगुंजात्मकमिति परिभाषायामुक्तं तत्सुवर्णस्तेयेन द्विकेवलम
हापातकं तस्य प्रायश्चित्तं द्वादशाब्दादि तथानेरेद्रष्टव्यं ॥ सर्वत्रास्मिन्विषये अपहृतं द्रव्यं तत्स्वामिने दत्वा
प्रायश्चित्तयोग्यतायै सांतपनं कृत्वा पश्चादुक्तप्रायश्चित्तमाचरणीयं ॥ तत्र पादोनसुवर्णापहारे नववर्षा
त्मकं ॥ अर्धसुवर्णापहारे षडब्दं ॥ पादापहरणे त्र्यब्दं ॥ द्वादशभागापहरणे संवत्सरं ॥ पंचगुंजात्मकमाषप
रिमितापहरणे द्वादशरात्रं वा पुनः स्वर्णं ॥ गुंजामात्रे सांतपनं ॥ यवमात्रे द्विरात्रं ॥ सुवर्णमात्रे संवत्सरमिति के

९२

५६

चितम्॥ तदज्ञानविषयं॥ सुवर्णहृन्निन्द्ये देत्वाह शंखः। यस्य सुवर्णस्य हृन्निष्ठेदं समाचरेत्॥ तस्यात्तस्यावधप्रोक्तं
प्रायश्चित्तं समाचरेदिति॥ सुवर्णापहारं करोमीति मनसि ध्याने प्रणवपूर्वा व्याहृतीर्मनसा जपेत्। वाचावद
ने पादकृच्छ्रं॥ प्रवृत्तौ प्राजापत्यं॥ सर्वत्र देवद्विजद्रव्यहर्तुर्द्विगुणं प्रायश्चित्तं॥ बहुमूल्यरत्नापहरणं सुवर्णस्ते
यसमं॥ तत्र षडब्दं प्रायश्चित्तं॥ अल्पमूल्यरत्नादौ चांद्रायणत्रयं॥ रूप्ये तु स्वरस्यंतरे॥ स्वल्पत्वाद्धि जोमा
हाश्वे चांद्रायणव्रतं॥ गद्याणदशकादूर्ध्वमाशतात् द्विगुणं भवेत्॥ आसहस्रात्त्रिगुणमूर्ध्वं हेमविधिः
स्मृत इति॥ गद्याणः परिभाषायामुक्तः॥ हेमविधिः सुवर्णस्तेयवत्प्रायश्चित्तमित्यर्थः॥ दशकुंभपरिमि
तधान्यापहरणे सांवत्सरिकं॥ अल्परजतमणिमौक्तिकप्रवालताम्रसीसकांस्यलोहोपलेषु प्राजापत्यं॥
पक्वान्नौषधतैलशय्यावस्त्रापानस्रङ्गोरमधुमांसफलमूलपुष्पसुगंधवर्णादिकेषु कृच्छ्रार्धं॥ कार्पा
सपट्टजीर्णारज्जुपक्षिद्विशफैकशफेषु त्रिरात्रं पयःपानं॥ गजहरणे बाले चांद्रं॥ पौगंडे महाचांद्रं॥

मदोन्मत्ते चांद्रायणत्रयं ॥ अश्वे चांद्रद्वयं ॥ उष्ट्रबाल्ये तप्तं ॥ कौमारे चांद्रं ॥ गर्दभे बाल्ये कौमारे च कार्यं
॥ तरुणे तप्तकृच्छ्रं ॥ अजबस्तयोः प्राजापत्यं ॥ आरण्यमृगपक्षिषु चांद्रं ॥ ग्राम्यमृगपक्षिषु प्राजापत्यं
॥ मार्जारनकुलाद्या ग्राम्यमृगाः ॥ कुक्कुटभारद्वाजाद्या ग्राम्यपक्षिणः ॥ बालकहरणे तप्तकृच्छ्रं ॥
कन्यायां चांद्रं ॥ नारीहरणे संसर्गाभावे चांद्रं ॥ संसर्गे महापापवत् ॥ पुरुषे तप्तकृच्छ्रं ॥ वेश्यायां दास्यां च म
हासांतपने ॥ नरवाश्वयाने प्राजापत्यं ॥ पादुकयोः प्राजापत्यं पंचगव्यं च ॥ उपानहोश्च मतांतरेण पादुका
वत् ॥ छत्रचामरयोः प्राजापत्यं ॥ भोगार्थं सकृत्पुष्पापहरणे प्राजापत्यं ॥ अभ्यासे चांद्रायणद्वयं ॥ दे
वपूजार्थमाहरणे संवत्सरे चांद्रं ॥ बहुफलेषु महाफलेषु वा प्राजापत्यं ॥ ऋतुत्रये पराकः ॥ संवत्सरे
चांद्रं पंचगव्यं च ॥ कंदमूलादौ दशपर्यंतं अष्टोत्तरशतं गायत्रीजपः ॥ दशादिशतपर्यंतं अयुतं जपः ॥ आ
धिक्ये प्रायश्चित्ताधिक्यं ॥ अलाबुवृंताककपित्थादिकोशहरणे एकदिनमुपवासः पंचगव्यप्राशनं म

हाच्चारूत्रिहोमस्त्रं॥ अभ्यासेद्विगुणं॥ ग्राम्याणामारण्यानां शाकानां हरणे अल्पत्वे पंचगव्यं॥ भार
मात्रे प्राजापत्यं॥ संवत्सराभ्यासे चांद्रं॥ कदलीनागवल्लीमधुपलाशादि ग्राम्येष्वारण्येषु पत्रेषु अल्पत्वे
प्राजापत्यं॥ भारमात्रे पराकः॥ संवत्सराभ्यासे चांद्रं॥ त्रिसमिंधनकाष्ठेषु पंचगव्यप्राशनं॥ अभ्यासे प्रा
जापत्यं॥ समिद्दर्भेषु अल्पत्वे अष्टोत्तरशतं गायत्रीजपः॥ पंचगव्यप्राशनं च॥ भारमात्रे प्राजापत्यं॥ देवा
र्थे शाकादि वृक्षस्यार्थे आरामपोषणार्थं वापरकीयजलहरणे एकदिनमात्रे अष्टोत्तरशतं गायत्रीजपः॥ मा
से सहस्रं॥ संवत्सरे अयुतं॥ तृषार्थेनावन्मात्रजलापहरणे त्रिशतं विष्याः शिवस्य वा नाममंत्रजपः॥ भक्ष्या
भोज्येषु अल्पत्वे शतं गायत्री जपः भोजनपर्याप्तेषु सहस्रं॥ अन्नेच्छिन्नान्नेवा अल्पत्वे सहस्रं गायत्रीज
पः॥ भोजनपर्याप्ते नसं॥ रुद्राक्षहरणे शतादल्पेषु सहस्रं गायत्रीजपः॥ शते पराकः॥ शतादूर्ध्वं सहस्रपर्यं
तं चांद्रं॥ तदूर्ध्वं महापापवत्॥ कमुकेषु अल्पत्वे अष्टोत्तरशतं गायत्रीजपः॥ शतेषु सहस्रं॥ शता

दूर्ध्वंसहस्रपर्यंतंप्राजापत्यं ॥ ततदूर्ध्वंपातित्यं ॥ क्रमुकानिपूगफलानि ॥ गुडे अल्पेपराकः ॥ भारेचां
द्रं ॥ वत्सराभ्यासेपातित्यं ॥ सकृत्स्तेयोहरणेएकाहस्तुपवासः परेद्युः पंचगव्यं ॥ अभ्यासेद्विगुणं ॥ संवत्सरे
चांद्रं ॥ दधितक्रयोः एकवारेदशगायत्रीजपः ॥ द्विवारेष्टोत्तरशतं ॥ अभ्यासेसहस्रं ॥ संवत्सरेचांद्रं ॥
माक्षिकनवनीतयोः एकवारेष्टोत्तरशतंगायत्रीजपः ॥ द्विवारेष्टोत्तरसहस्रं ॥ बहुवारेअयुतं ॥ संव
त्सरेमहाचांद्रं ॥ घृतेपलद्वयेसहस्रगायत्रीजपः ॥ दशपलेअयुतं ॥ शतपलादूर्ध्वंलक्षं ॥ संवत्सरा
दूर्ध्वंपातित्यं ॥ कस्तूरयेपलद्वयेमल्पेकंपराकः ॥ दशपलमात्रेप्राजापत्यं ॥ पलशतेचांद्रं ॥ सहस्रपलेसुव
र्णस्तेयवत् ॥ कस्तूर्यंतु ॥ मरीचंपिप्पलीसुंठीकस्तूरपमितीरितं ॥ पूर्णचंद्रोदयवसंतानंदभैरवमृ
गांकराजानंदभैरवादिरसेषु ॥ स्वर्णभस्मादिषुलाक्षातैलादिषुपिप्पलीघृतादिषुपाकावलेहगुटि
काचूर्णादिषुचौषधेषुअल्पेप्राजापत्यं ॥ सुवर्णमात्रेचांद्रं ॥ पलमात्रेभूमदक्षिणाद्विपलादौपाति

(५८)

प्राय·मे·
॥५८॥

त्यं ॥ मतांतरात् धेनुहरणे गोवधप्रायश्चित्तं ॥ गोहरणे चांद्रं ॥ कपिलाहरणे चांद्रायणद्वयं ॥ होमधेनुह-
रणे षडब्दं ॥ वत्सहरणे प्राजापत्यं ॥ पौगंडे चांद्रं ॥ वृषभे [illegible] नस्य कृच्छ्रद्वयं ॥ महिष्यां महिषे च महाचांद्रा-
यणं ॥ पुस्तकहरणे प्राजापत्यं ॥ शालग्रामे चांद्रं ॥ शिवलिंगे चांद्रं ॥ रत्नलिंगे महाचांद्रं ॥ प्रतिमायां म-
हाचांद्रं ॥ चक्रांकिते प्राजापत्यं ॥ धूपकरणेषु प्राजापत्यं ग्रास्त्रेषु यावकं अभ्यासे प्राजापत्यं ॥ उलूख-
लमुसलदृषदुपलासंमार्जनीशूर्पादिगृहोपकरणेषु पुनःसंस्कारः प्राजापत्यं च ॥ अरण्ये मार्गे
देवापाथानां वस्त्रधान्यपात्रादिहरणे एकदिने प्राजापत्यं ॥ मासे चांद्रं ॥ अनंतै महाचांद्रं ॥ वत्सरां-
ते सुवर्णस्तेयवत् ॥ अन्यस्य तडागकूपकासारवनक्षेत्रादिबलादपहरणे न सकृच्छ्रं ॥ संवत्सरे परा-
कः ॥ तदूर्ध्वं सुवर्णस्तेयवत् ॥ सुवर्णनिक्षेपहरणे प्राजापत्यं ॥ स्थापितनिक्षेपं तन्न केचैदत्त्वा निक्षेप-
कर्तुरभावे तत्पुत्रपत्नीमातृपितृभ्रात्रादिभ्यः सर्वाभावेऽग्नौ दत्त्वा चांद्रायणं चरेत् ॥ निक्षेपादाने प्र

चं ०४

॥५८॥

५२

त्किंचित्स्वधर्मकार्यं करोति निक्षिप्तं सर्वं निक्षेपकर्तुरेव ॥ संततिरपि तस्यैव ॥ रजतताम्रकांस्यादिनिक्षेपहरणेन
दर्शप्रायश्चित्तं ॥ कचित्स्तेयापवादः ॥ तदाह गौतमः ॥ अस्तेयमग्नये काष्ठमस्तेयं चतृणं गवे ॥ कन्याह
रणमस्तेयं यो हरत्यं नलं कृतामिति कन्याहरणे राक्षसविवाहपरमिति मयूखः ॥ मनुरपि ॥ द्विजोध्व
गः क्षीणवृत्तिर्द्वाविक्षू द्वे च मूलके ॥ आददानः परक्षेत्रान्न दंडं दातुमर्हति ॥ चणकव्रीहिगोधूमय
वानां मुद्गमाषयोः ॥ अनिषिद्धैर्ग्रहीतव्यो मुष्टिरेकः पथि स्थितैरिति ॥ राजा प्रभुर्वा स्वदत्तां परदत्तां वा भूमिं
हरति तदा तां पुनस्तस्मै दत्वा चांद्रायणत्रयं कुर्यात् ॥ एवं क्षेत्रे षडब्दं ॥ ग्रामे षडब्दं ॥ इदमेकवारहरणे प्राय
श्चित्तं ॥ अभ्यासे प्रायश्चित्ताभ्यासः सोऽभ्यासः संवत्सरात् ॥ मत्स्यबंधफलस्वीकारे ब्रह्महत्याप्रायश्चित्तं ॥ धन
धान्यवस्त्रशालग्रामशिवलिंगगोवृषमहिषीगृहादिस्वदत्तापहरणे जदत्वा चांद्रायणद्वयमाचरेत् ॥ अ
नादिष्टे सामान्यप्रायश्चित्तं ॥ ॥ इति श्रीमच्चित्तपावनकेळकरोपाभिधमहादेवात्मजबापूभट्टविर

(49)

श्चितायामापश्चित्तं मं जयेत्स्तेयप्रायश्चित्तानि ॥ ॥ अथ हिंसाप्रायश्चित्तानि ॥ तत्र ब्रह्महत्यामहापा
तके ॥ तत्प्रायश्चित्तं मरणान्तिकं द्वारशाब्दादि च तदाचरणविधिस्मृत्यंतरेष्ववगन्तव्यः ॥ गोहत्यायां त्रै
मासिकव्रतेन तत्र ग्रंथांतरे द्रष्टव्यं ॥ क्षत्रियादिवधे तु मनुः पूर्वमनुः ॥ क्षत्रियस्य वधं कृत्वा चरेच्चांद्रा
यणत्रयं ॥ वैश्यस्य तु द्वयं कुर्याच्छूद्रस्यैकमेव तु ॥ दुर्वृत्तक्षत्रियादिवधे संवर्तः ॥ निहत्य क्षत्रियं मोहा
त्रिभिः कृच्छ्रैर्विशुध्यति ॥ कृच्छ्रानि कृत्वा तु विनमत नरो वैश्यघातकः ॥ कुर्याच्छूद्रवधे विप्रः कृच्छ्रं सांत
पनं तथेति ॥ सोमयागस्थदीक्षितक्षत्रियवैश्यवधे ब्रह्महत्यासमं ॥ ब्राह्मणस्त्रीवधे षाण्मासिकं ॥ क्ष
त्रियावधे चतुर्मासिकं ॥ वैश्यावधे द्विमासिकं ॥ शूद्रस्त्रीवधे मासिकं ॥ शूद्रयापि त्वध्मा भर्तृघ्नी संकर
कारिणी नावधे नैव किंचित ॥ मद्दुष्टायां न किंचनेति व्यासोक्तेः ॥ वेश्याकर्मणा जीवंती नां वधे किंचिज्जल
दानमित्यन्ये ॥ जलस्पर्शमात्रमित्यपरे ॥ ग्रंथांतरे तु ज्ञानिमात्रक्षत्रियवधे त्रैवार्षिकं ब्रह्मव्रतं ॥ वै

श्यैवार्षिकं ॥ शूद्रे षाण्मासिकं ॥ मत्यादिद्विगुणं ॥ अभिषेक्तनृपनिवधे द्वादशवार्षिकं ॥ प्रयोजककारीनांपा

५२ दपादहानिर्णवतीनां विप्रादिस्त्रीणां वधे क्रमेण षड्वार्षिकत्रैवार्षिकसार्धवार्षिकनवमासिकानि ब्रह्म

हन्नतानि ॥ गर्भिणीनां वधेप्येवमेव ॥ व्यभिचारिणीनामर्धं ॥ चांडालवधे पराकः ॥ अत्यजादौ द्विगुणं

॥ चांडालादिस्त्रीवधे षड्रात्रमुपवासस्तिलदानं च ॥ चांडालादीनां चोराणां वधे एक उपवासो ब्राह्मणभो

जनं च ॥ चिकित्सादिना उपकारे क्रियमाणे विप्रादिमरणे तु नैव प्रायश्चित्तं ॥ एवं सर्वत्र वधप्रायश्चित्त

विषयेषु द्रष्टव्यं ॥ तदाह संवर्तः ॥ दाहच्छेदशिराभेदप्रयोगैरुपकुर्वतां द्विजानां गोहितार्थं तु प्राय

श्चित्तं न विद्यते ॥ यत्र ॥ यंत्रणे गोचिकित्सार्थे मूढगर्भविमोचने यत्ने कृते विपत्तिः स्यान्न स पापे

न लिप्यते ॥ इदमपि यथोक्तचिकित्सादिकरणे ॥ अन्यथा करणे तु दोष एव ॥ उक्तं चायुर्वेदे ॥ प्राय

श्चित्तं चिकित्सां च ज्योतिषं धर्मनिर्णयं ॥ विनाशास्त्रेण यो ब्रूयात्तमाहुर्ब्रह्मघातकं ॥ सप्तवापंचवा

५०

त्तिस्रो योनवैत्तिसुसंहिताः ॥ राज्ञानस्यकुवेद्यस्यपृष्ठेनत्थ्योदक्षिणः करद्गिते ॥ गोविषये त्वाह पराशरः ॥ ग्राम
घातेशरौघेणवेश्मभंगनिपातने ॥ अतिवृष्टिहतानांच प्रायश्चित्तंनविद्यते ॥ कूपेखाते वधर्मार्थे गृहदाहे
चयाम्रताः ॥ ग्रामदाहे तथाघोरे प्रायश्चित्तंनविद्यते ॥ एतच्च बंधनादिरहितदहनादिविषयं ॥ बध्याना
मपिमोचनासाध्यविषयंच ॥ कूपादिकर्तुर्नदोषः ॥ स्वामिनस्तुदुर्मरणनिमित्तंप्रायश्चित्तंभवत्येवेतिमयू
खः ॥ बध्यानांमोचनकरणोपेक्षयामरणेतु ॥ बंधनेयथोक्तवधप्रायश्चित्तपादः ॥ रोधनेपितथैव ॥ अ
न्येतुबंधनेपादद्वयं ॥ नियोजनेपात्त्रदेयं ॥ निपातनेपूर्णं ॥ पराशरोपि ॥ गवांयोक्त्रैर्बंधनेतुभवेन्मृत्युरकामं
तः ॥ अकामहतपापस्यप्राजापत्यंविनिर्दिशेत् ॥ प्रायश्चित्तेततश्चीर्णे कुर्याद्ब्राह्मणभोजनं ॥ अनडुत्स
हितांगांचदद्याद्धिप्रायदक्षिणां ॥ सायंसंगोपनार्थेतुनदुष्येद्रोधबंधने इति ॥ वृषेष्वेवं ॥ यत्तुव्यासः ॥
जलौघपल्वलेमग्नामेघविद्युद्धतापिवा ॥ श्वभ्रेवापतिताकस्मात्कूपदेनापिभक्षिता ॥ प्राजापत्यं

८१

य·मं·
८

घाते॥ विरुँ रज्जुबंधनमरणे त्रिरात्रं गोमूत्रयावकपानं॥ वृषेप्येवं॥ गोविपत्तिं दृष्ट्वोपेक्षायां त्वाहसरवा॥ गोवृषा
णां विपत्तौ यथावत्तः प्रेक्षकाजनाः॥ अनिवारयतां तेषां सर्वेषां पातकं भवेदिति॥ गजवधे पंचनीलवृषाणां दा
नं॥ शुके द्विवार्षिको वत्सः॥ खराज मेषेषु वृषः॥ एकवार्षिको वत्सो वा॥ क्रौंचे त्रिवार्षिको वत्सः॥ अश्वे वा
सः सांतपनं वा॥ महिषे सांतपनं॥ वानरे त्रिरात्रमुपवासः॥ प्राजापत्यमिति निमत्तांतरं॥ तत्र ज्ञाताज्ञातत्वेन
व्यवस्था मार्जारगोधानकुलकुरमं डूकमूषकेषु प्राजापत्यं॥ सर्पाजगरडुंडुभेषु कृसरान्नेन विप्रान्भोजयि
त्वा लोहदंडं दक्षिणां दद्यात्॥ प्राजापत्यं वा॥ क्रव्यादेषु प्राजापत्यं क्रव्यादा अपक्वमांसभक्षकाः सिंहव्या
घ्रादयः॥ बिलेशयजलेशयसर्प वधे समरणं भस्महवनं॥ शुनि त्रिरात्रमुपवासः॥ मयूरचक्रवाकहंस
चाषकाकोलूकादिपक्षिनकुलशशवृकसृगालभासेषु प्राजापत्यं गोदानं धेनुदानं वा॥ अत्यंताभ्यासे षाण्मा
सिकं॥ पराशरस्तु कारंडवचकोराणां पिंगलाकुररस्य च॥ भारद्वाजादिकं हत्वा शिवं पूज्य विशुध्यति॥ या

चौरैस्कंध्रे गोस्वामी त्वन्तमुतमभिजितस्तदुपेक्षाविषयं ॥ अतएवोक्तं ॥ श्री नवान्नहन्तावास्यादुर्दध्वनम्रनापिवा ॥
शून्यागारउपेक्षायां प्राजापत्यं विनिर्दिशेदिति ॥ इदं स्वामिनः पालकस्य च ॥ सत्कार्यो नरक्षाणनोपेक्षायां त्वर्धं
॥ वृषविषये त्वाहापस्तंबः ॥ अतिदाहाग्नि दाहाभ्यां नासिकाच्छेदनेन तथा ॥ नदीपर्वतसंरोधे मृते पादोनमाचरेदि
ति ॥ गोः शृंगभंगे गोवधप्रायश्चित्तपादः ॥ नेत्रघातेनेऽर्धं ॥ लांगूलच्छेदने पादः ॥ अस्थिभंजने द्वौ पादौ ॥ कर्ण
च्छेदे पादत्रयं ॥ कटिभंगे पादद्वयं ॥ तत्र कर्तव्यमाह व्यासः ॥ यवसंचापहर्तव्यं यावद्देहेन तद्व्रणं ॥ संपूर्णे दक्षिणां द

ग ग

द्यात्तः पापात्प्रमुच्यते ॥ अप्यसंपूर्णसर्वांगो हीनदेहो भवेत्तदा ॥ गोघातकस्य तस्यार्धं प्रायश्चित्तं विनिर्दिशेदिति ॥

नि

कूपवाप्यादिस्विनि पानार्थं प्रेरणे च्छेदनादि दुर्गमेषु भक्षणार्थं प्रेरणे तत्र मृते नरो गोमांस भक्षकेषु विक्रयेवा गोव
धप्रायश्चित्तं ॥ स्वयमेव जलार्थं कूपादौ गतेन तत्र मृते तत्र मृते पि न दोषं ॥ तत्राप्युपेक्षायां प्रायश्चित्तं भवत्येव
॥ तत्पूर्वमेवोक्तं ॥ पराशरः ॥ निशि बंधाविरुद्धेषु सर्पव्याघ्रहतेषु च ॥ अग्निविद्युद्विपन्नानां प्रायश्चित्तं न वि

त्वत्कः ॥ किंचित्सास्थिवध्ये देयं प्राणायामस्त्वनस्थिके ॥ किंचिद्दष्टमुष्टिधान्यं ॥ अज्ञानविषये त्वा
हव्यासः ॥ सर्वाश्वप्राणिनः स्थूलान्हत्वा दिनमुपोषणमिति ॥ ज्ञानतः सकृद्वध्ये त्र्यहं क्षीरपानं ॥ पादकृ
च्छ्रं वा ॥ अभ्यासे प्राजापत्यं अनुक्तप्रायश्चित्तेषु अस्थिमतां बहूनां वध्ये त्र्यहं तप्तपावकपानं ॥ सहस्रवध्ये षा
ण्मासिकं शूद्रवधव्रतं ॥ दद्याद्धेनवो वा ॥ कृमिकीटपतंगपिपीलिकाभ्रमरदंशमक्षिकाणां गर्दवप्राय
श्चित्तं ॥ अनस्थिमतां क्षुद्राणां मत्कुणदंशादीनां शाकटपूर्णवध्येप्यन्नदेवफलपुष्पधान्यांतरसंजानप्रा
णिवध्ये दिनमेकं घृताहारः ॥ कृकलासादिसहस्रवध्ये जलुकादिशाकठवध्ये शिशुनसकृच्छ्रं ॥ कोकि
लकपोतकपिंजलटिट्टिभखंजरीटादिपक्षिणां पुरुषभारवधे दशधेनुदानं ॥ उष्ट्ररंजाभारदानं ॥ स्व
र्णगुंजा वा ॥ जलचरप्राणिवधे गोदानं ॥ अश्वव्यादमृगेषु वत्सतरी ॥ वराहे घृतकुंभदानं ॥ तित्तिरौ तिल
द्रोणः ॥ मृतप्रायेषु मत्स्यागजादिवधे प्रास्येकं त्रिरात्रं ॥ हरिणादिषु चतुर्थकालभोजनं त्रिवारं ॥ मार्जारा

रिषूपवासः॥ काकादिषुनक्तं॥ शुकादिष्वेकभक्तं॥ टिट्टिभादिषु जले प्राणायाम ः॥ अवज्ञानसर्वमृगपक्षिषु
प्राजापत्यं॥ स्थावरसरीसृपादीनां वधे कृच्छ्रं हिमो वा॥ बहुभिर्मिलितैर्विप्रैर्हिंसायां न दोषः॥ उक्तं च॥ सिं
हाद्यस्तथा सर्पा राजा विप्रकंटकं॥ नैते लिंपंति दोषेण घ्नतोपि सकलं जगदिति॥ अथ स्थावरहिंसा
याः प्रायश्चित्तानि॥ स्थावराः वृक्षगुल्मगुच्छक्षुपालताप्रतानवीरुदौषधिवनस्पत्यादयः॥ वृक्षा अश्व
त्थाद्याः॥ गुल्मा मालत्याद्याः॥ गुच्छाः कुरंटाद्याः॥ क्षुपाः करवीराद्याः॥ लता द्राक्षाद्याः॥ प्रतान
न्यः सारिवाद्याः॥ वीरुधो गुडूच्याद्याः॥ ओषध्यो व्रीह्यो व्रीह्याद्याः॥ वनस्पतय आमलक्याद्याः॥
एतेषां तृणादीनां च छेदे प्राजापत्यं चैत्यश्मशानसीमादेवालयमार्गपुण्यस्थानजलाशयवृक्षछेदे द्वि
गुणं॥ हारीतस्तु यस्य यस्य प्राणं निमिषपदे जनितिमंत्रेण दोषानुसारतः सहस्रा सुनल सादिसंख्य
याज्यं हुत्वा तिलपात्रं ब्राह्मणाय दद्यादित्याह॥ वंद्रापथमिति हेमाद्रौ॥ महाफलप्रद नालिकेरपन॰

साम्रादिवृक्षछेदेभ्यासेसंवत्सरव्रतं॥वनछेदनेद्वादशाब्दंनवाब्दंवामहापातकसमत्वात्॥इंधना
र्थंद्रुमछेदेजापत्यं॥कृष्यर्थेद्विगुणं॥कृष्यर्थमिंधनार्थंवापह्लिपवृक्षछेदेपराकः॥गवार्थेतृणछे
देहोमार्थंयज्ञार्थंचरसादिछेदेपिनदोषः॥कृत्विकृष्याद्युपकरणादिदृष्टार्थंवल्लीक्षादिछेदेन
दोषः॥अथकेषुचित्सनिपद्योक्तानिप्रायश्चित्तानितान्युच्यंते॥तत्राम्रस्यबिल्वाशोकामलकी
तिंतिणीजंबूकपित्थाम्रादिछेदेचांद्रायणं॥वैकंकतमधूकयोःप्राजापत्यं॥जंबीरमातुलुंगयोर्गीतापाठः
॥पुष्पारामछेदेलक्षंगायत्रीजपः॥बृहत्यर्णभल्लातकयोःकायं॥कोविदारनिंबश्लेष्मातकीशमीदे
वदारुबकमयूरपादेषुतसकृच्छ्रः॥नीवरक्षाणांप्राजापत्यं॥उच्चानांद्विगुणं॥अत्युच्चानांत्रिगुणमि
त्यादिबोध्यं॥ ॥इतिश्रीमच्चित्तपावनकेळकरोपाभिधमहादेवात्मजबापूभट्टविरचितायांप्राय
श्चित्तमंजर्यांहिंसाप्रायश्चित्तानि॥ ॥अथाविक्रेयविक्रयेप्रायश्चित्तानि॥तत्रानापदितनद्वि

ऋयार्जितधनोत्सर्गपूर्वकं प्रायश्चित्ताचरणं॥ अपदिष्टप्रायश्चित्तमात्रं॥ तिलतैलदधिमधुलवणला
क्षामधुमांससिक्थान्नमनुष्यहस्त्यश्ववृषगंधरसक्षौमकृष्णाजिनसोमादकनीलीविक्रयाद्ब्राह्मणः
सद्यः पततीतिमनुर्वदे॥ तत्र संवत्सरं तप्तकृच्छ्रं प्रायश्चित्तं॥ सकृद्विक्रये येवार्द्धं॥ अभ्यासे चान्द्रायणत्र
यमितिप्रायश्चित्तेंदुशेखरे॥ गुडपुष्पमूलफलपक्वान्नक्षीरघृतचर्मवल्कलेषुवार्द्धं॥ पराकं इतिमनोनानरं॥
कस्तूर्यादिगंधेषुप्राजापत्यं॥ कर्पूरे धेनुकृच्छ्रं॥ कदलीना
रिकेलसशर्करास्नोहपक्वगर्दभेषुपराकः॥ कस्तूर्यादिगंधेषुप्राजापत्यं॥ ...
लिकेरनारिंगबीजपूरजंबीरादिफलेषुचूर्णीयांचपादकृच्छ्रः॥ शंरवस्यमतिमनहप्रकरणेडक्तैर्हाघुपक
रणेषुदेवागारेरत्नानिलौकिकाग्निवापतिष्ठाप्यतद्विव्यान्यारिजिमंत्रेणसमिदाज्यचरुमिरष्टोत्तरश
तंहुत्वासायंभुक्त्वादेवसमीपेस्वपेत्॥ एवंमंडलत्रयं॥ कटकभूषणकांचनतुलावेणवभांडकज्ज
लंगंधपात्रचंदनरज्जुदार्वादिभांडनानावस्तुविक्रयेपराकं॥ पाककृच्छ्रं॥ संवत्सरादूर्ध्वं द्विगुणं॥

स्नानादिनित्यकर्मेष्टापूर्तनडागारामश्रौतस्मार्तकाशीयात्रोपोषणव्रतादिधर्मविक्रयेएकैकस्मि
पश्चात्तापेसतिपुनःसंस्कारपूर्वकंचांद्रायणत्रयं॥ श्रुतिस्मृतिपुराणधर्मशास्त्राज्योतिषवैद्यक
काव्यनाटकादिपुस्तकविक्रयेचांद्रायणंपराकश्च॥ अभ्यासेद्विगुणं॥ आत्मनः सुतस्यभार्या
याभ्रातुर्मातापित्रोर्वाधनक्षेत्रधान्यपश्वारामादिग्रहणार्थंनामविक्रयित्वाजीवनंकरोतिसम

हापातकितुः॥ तस्यपश्चात्तापेपुनःसंस्कारपूर्वकंकायकृच्छ्रत्रयं॥ हरिद्राशृंगबेरमूलकमुस्तादि

मूलेषुसूरणादीकंदेषुकमलेषुत्र्यपर्यंतपराकः॥ वर्षेचांद्रायणंकसुककदलीमातुलुंगदाडिमना
लिकेरखर्जूरकपित्थतिंतिणीजंबूफलाम्रपनसजंबीरबदरीफलोर्वारुकादिफलेषुसहस्त्रेषुप
राकः॥ अध्विकेषायश्चित्तनाधिकं॥ कृष्णाजिनव्याघ्रचर्मादिषुसकृद्दत्तानतः प्राजापत्यंपंच
गव्यंच॥ द्विवारेयावकं॥ अभ्यासेद्विगुणं॥ अत्यभ्यासेवर्षादूर्ध्वंपतितत्वंदासीविक्रयेबालापा

लघु:॥

श्लो २

५४

चांद्रं ॥ कौमार्य्यांचांद्रद्वयं ॥ पुंवत्यांषडब्दं ॥ गजदंता देर्व्या घ्रनरवादेश्चतसकृच्छ्रं ॥ गोकेशाद्दिषुमासे
नसं ॥ मासत्रयेचांद्रं ॥ वत्सरे महाचांद्रं ॥ सिस्थानेमासद्वयेषडब्दं ॥ वर्षेद्विगुणं ॥ नदूर्ध्वंपानित्यं ॥ सि
स्वशाखादिषुपावके ॥ गव्येषुपयोदध्यिघृतनवनीतमक्रगोमूत्रगोमयेषुमासपर्यंततसप्तएकस्व ॥
द्विमासपर्यंतचांद्रं ॥ त्रनीयेनद्वयं ॥ षण्मासेषडब्दं ॥ ततः परंपानित्यामितिहेमाद्रिः ॥ शालग्रामप्र
तिमाशिवलिंगादिसकृद्विक्रयेचांद्रं ॥ लक्ष्मीनारायणादेमहाचांद्रं ॥ अभ्यासेपुनः संस्कारपूर्वकंषडब्दं ॥
अस्या भ्यासेपानित्यं ॥ अमूल्यरत्नाविक्रयेप्येवं ॥ साधारणरत्नेनसकृच्छ्रं ॥ रुद्राक्षविक्रयेहेमाद्रौमा
संह्रीसामुपक्रम्यप्रातः स्नात्वायथाविधि ॥ सूर्योदयंसमारभ्ययावदस्तंगतोरविः ॥ तावज्जपंप्रकुर्वीत
संख्यायावत्समाप्यते ॥ प्रत्यहंदशसाहस्रंशोवेमंत्रंषडक्षरं ॥ फलाहारंप्रकुर्वीतपरा[illegible]मंदायनेरविः ॥ संध्या
दिकंसमाप्यैवस्थंडिलेकेवलेस्वपेत् ॥ परेद्युः प्रातरुत्थायपयथापूर्वंसमाचरेत् ॥ मासांतेशिवमामोतिशि

वृद्धोहीसचान्यथेति ।। पनतसहस्त्ररूक्मास्वविक्रये ।। अनऊर्ध्वंमरणांतिकंप्रायश्चित्तं ।। एवमेवपन्नास
विक्रये ।। पुत्रजीवेषुप्राजापत्यं अतिसुगंधिपुष्पेषुएकवारेपराकः ।। अभ्यासेचांद्रं ।। संवत्सरादू
र्ध्वंपातित्यं ।। तुलसीबील्वदूर्वादिविक्रयेप्रत्यहंपराकः ।। संवत्सरादूर्ध्वंपातित्यं ।। सुवर्णरौप्यवविक्र
येअल्पेप्राजापत्यंतत्समकृच्छ्रंचांद्रायणादिप्रायश्चित्तं ।। दशनिष्कमारभ्यशतनिष्कपर्यंतंप्रायश्चित्तंबा
हुल्यं ।। संवत्सरादूर्ध्वंसुवर्णस्तेयवत् ।। ताम्रकांस्यपितलसीसादिविक्रयेशतपलपर्यंतंप्राजापत्यं ।।
तदूर्ध्वंचांद्रं ।। संवत्सरोर्ध्वंरजतस्तेयवत् ।। रत्नकाद्विशस्त्रेषुपण्मा [illegible] रेसपर्यंतं
प्राजापत्यं ।। संवत्सरेतद्रूप ।। तदूर्ध्वंपतितत्वं ।। ग्रहेचांद्रं ।। उलूखलमुसलदृषदुपलासमार्ज
नीशूर्पादिगृहोपकरणेषुप्राजापत्यं ।। संवत्सरेचांद्रं ।। कस्तुरीकुंकुमगंधकर्पूरनागकेसरगोरोचनादि
षुसंवत्सरेपराकः ।। तदूर्ध्वंतंस ।। कार्पासकंबलकौशेयपट्टवस्त्रादिषुअल्पद्रव्यकेषुपराकः ।। बहु

द्व्यके चांद्रं ॥ मनुष्यविक्रयेषडब्दं ॥ ब्राह्मणविक्रयेब्रह्महत्योक्तं प्रायश्चित्तं ॥ पुत्रेअपदिमहासांतपनं
॥ अनापदिपतितव्रतं ॥ आपदिभार्याविक्रयेषडब्दं ॥ अनापदिमहापापवत् ॥ भगिन्यादीनांव्यभिचारा
दिदुष्टानां विक्रयेषडब्दं ॥ निष्कारणत्यागकारीषडाहवधुः ॥ मात्रादीनांव्यभिचारादिदुष्टानामपिविक्र
येपातित्यं ॥ कन्याविक्रयेचांद्रद्वयपराकं ॥ रोहिण्यामतिचांद्रायणं ॥ गौर्यामहासांतपनत्रयं ॥ रजस्वला
यांकारीषडाहवधुः ॥ गजेबालेचांद्रं ॥ पौगंडेचांद्रद्वयं ॥ तरुणेदशतनसकृच्छ्राणि ॥ अनडुद्विक्रयेबाल्यपौ
गंडयोः प्राजापत्यं ॥ तरुणेचांद्रं ॥ स्वयेनूरसंभवेस्वपालितेतुबाल्यत्वेपिचांद्रं ॥ तरुणेनद्वयं ॥ महि
ष्यांप्राजापत्यं ॥ स्वगृहपालितायांचांद्रं ॥ महिषस्याप्येवं ॥ अजबस्तयोःप्राजापत्यं ॥ स्त्रीजात्यो
स्तद्वर्धं ॥ मेषादावप्येवं ॥ गर्दभेबालेप्राजापत्यं ॥ कौमारेनस ॥ तरुणेषडब्दं ॥ उष्ट्रे बालेपराकः ॥
पौगंडेनद्वयं ॥ तरुणेचांद्रं ॥ षडब्दंवा ॥ हरिणीविक्रयेपंचरात्रंनिराहारो होमः ॥ पंचरात्रंप्रसहपंचसहस्र

तिलहोमः ॥ उपवासश्च ॥ लष्णामद्यविक्रये दशरात्रं फलाहारी कूष्माण्डगणहोमैः प्रत्यहं सहस्रं जुहुयात् ॥ त
मेवाग्निं दशरात्रं धारयेत् ॥ स्थंडिलशायी च ॥ वडवायां प्राजापत्यं ॥ अश्वे तु बान्ये पराकः ॥ कौमारे त
मे ॥ तरुणे यावकं ॥ सिंहव्याघ्रमल्लूकतारभादिदुष्टमृगेषु पराकः ॥ अरण्यकशुकसारिकादिपक्षि
षु द्वादशरात्रमुपवासः कुक्कुरमूषकमार्जारनकुलसर्पवानरश्वादिषु प्राजापत्यं ॥ गोविक्रये सल्ल
क्षापदि बालायां चान्द्रं ॥ तदधिकवयस्कायां महाचान्द्रं ॥ युवत्यां महाचान्द्रायणत्रयं ॥ अनापदि अभ्या
से वा पातित्यं ॥ आत्मविक्रये हिरण्यगर्भमहादानं ॥ आत्मविक्रये नाममन्त्रं रणंकृत्वा घृतभोजनं गं
धपुष्पताम्बूलादिभोगकरणं ॥ अथ धान्यविक्रये ॥ नत्वदर्शपूर्णमासाग्रयणपशुपित्र्याब्दिकादि
नित्यकर्मणां द्रव्याभावतो लोपप्रसंगे धान्यविक्रयेन दोषः ॥ द्रव्यसंचयार्थं भोगार्थं वा विक्रये स्वक
षिजातेषु गोधूमेषु प्राजापत्यं ॥ माषेषु तप्तं ॥ तिलेषु चान्द्रं ॥ तंदुलेषु प्राजापत्यं ॥ मुद्गेषु तप्तं ॥ व्रीहिच

प्राय०मे०
५२

णक श्यामाककोद्रवप्रियंगुकुलित्थयावनालादिषु चांद्रं ॥ कर्पासविक्रये वार्धुषिकत्वं ॥ उक्तं च ॥ समर्घं पण्यमाहृत्य महार्घं यः प्रयच्छति ॥ स वै वार्धुषिको नाम यश्चवृद्ध्या प्रयोजयेत् ॥ तस्य चांद्रायणं प्रायश्चित्तं ॥ अभ्यासे प्रायश्चित्ताभ्यासः ॥ गुडे शतपलपर्यंतं प्राजापत्यं ॥ शतपलादूर्ध्वं सहस्रपर्यंतं चांद्रं ॥ तदूर्ध्वं महापापवत् ॥ शुष्ठ्यर्थं चांद्रायणद्वयमिति केचित् ॥ लवणे प्रस्थमात्रेपि चांद्रायणं [illegible] त्वं ॥ नवपक्षपर्यंतं विक्रयेत सकृच्छ्रं ॥ मासपर्यंतं तप्तकृच्छ्रचतुष्टयं ॥ ऋतौ चांद्रं ॥ ऋतुद्वये चांद्रद्वयं ॥ संरेपा नित्यं ॥ तस्य पश्चात्तापे पुनरुपनयनं पतितप्रायश्चित्तं च कार्यं मांसे लवणवत् ॥ नील्या विक्रये पातित्यं ॥ पश्चात्तापे पुनः संस्कारपूर्वकं पतितव्रतं ॥ कलंजरंजनपलांडुलशुनविक्रयेपि तथैव ॥ रंजनं वीर्यजनकपर्णचूर्णविशेषतः ॥ कलंजं सुरालेपाद्युन्मादजनकावटकविशेषा इति हेमाद्रिणा व्याख्यातं ॥ पिप्पलीजातीपत्रलवंगोलाजमोदसर्षपादिसूक्ष्मद्रव्यविक्रये मासेन मं ॥ द्विमासे पराकः ॥ ऋतुत्रये का

वसम

यवसंतानंद ४

यं॥ वत्सरेचांद्रं॥ अभ्यासेचांद्रद्वयं॥ द्विगुस्वर्णबंधयोः पलद्वयेपराकः॥ पलचतुष्टयेप्राजापत्यं॥ पलदशकेचां
द्रं॥ आधिक्येप्रायश्चित्ताधिक्यं॥ अभ्यासेप्रायश्चित्ताभ्यासः॥ अत्यंताभ्यासेपातित्यं॥ स्वर्णबंधनंना
मसुवर्णादिपाके स्पर्शमात्रेणसर्वेजलप्रायंभवतितत्स्वर्णबंधनं॥ पारदगंधकसिंदूरहरितालाभ्रका
दिविक्रयेपूर्णचंद्रोदभैरवमृगांकरसादिरसानांस्वर्णाभ्रकादिभस्मनांलाक्षादितैलानांपिप्पल्यादि
घृतानांनापाकावलेहगुटिकाचूर्णादिऔषधानांविक्रयेसद्यःपातित्यं॥ तत्प्रायश्चित्तंहेमाद्रौ॥ असंभा
ष्यो स्वपंक्तेयः सर्वकर्मबहिष्कृतः॥ पश्चात्तापसमायुक्तोविप्रोयदिकृताजभीः मंडलंनियमंकृत्वाप्रातः स्ना

स्त२

त्वायथाविधि॥ यो रयादास्तमयाडुपविश्यकुशासने॥ ध्यानंततः कृत्वाजपेन्मंत्रंत्र्यंबकं॥ मध्याह्नेपूर्वं
वत्स्नात्वामाध्याह्निकमथाचरेत्॥ पुनरागत्यतत्स्थानंजपकर्मसमारभेत्॥ सायंकालेफलाहारः स्वपेद्भू
मौनिशिद्धियः॥ ततः प्रातः समुत्थायपूर्ववज्जपमाचरेत्॥ लक्षत्रयंयथाभूयान्मंडलेराजवत्शुभ॥ ततः शुद्धि

प्रा० ३

मवाप्नोतिरसविक्रयजादिह ॥ नान्यथा श्रुतिस्थितिः ॥ दिनापूर्वजैर्बहुविनमेरीति ॥ आरामतडागोदपान
पुष्करिणीदेवालयपाषाणमयप्रदंमेला द्विपुण्यविक्रये त्रिषवणस्नायी अधःशायी चतुर्थकाल
आहारो गायत्रीदशसहस्रमष्टसहस्रं जपन् अब्देन शुध्येत् ॥ निगडे प्रोंपत्य ॥ सभाप्रपादिषु तप्तकृच्छ्रं
॥ एकाहं विषविक्रये वृद्धे चांद्रायणं ॥ गाथां गोषु पराकः ॥ स्मृतिषु प्राजापत्यं ॥ इतिहासपुराणे
षु सांतपनं ॥ रहस्यादिषु प्राजापत्यं ॥ नीतिशास्त्र सर्वप्राकृतविद्यासु पादकृच्छ्रः ॥ विद्याविक्र
यो ऽध्यापनमहेण पठनं ॥ तत्पुण्य विक्रयो वा ॥ अभ्यासे पातित्यं ॥ कालिकापुराणे ॥ विक्रयं सर्ववि
स्तूनां कुर्वन्शूद्रो न दोषभाक् ॥ मधु चर्म सुरां लाक्षां त्यक्त्वा मांसं च पंचमं ॥ शंखः ॥ धारयित्वा
तुलां चक्रां विषमां धारयेद्वणिक् ॥ सुरालवणमधानां कृत्वा सोऽस्य विक्रयं ॥ लाक्षायाश्चैव
मांसस्य कुर्याद्वै द्वादशाब्दिकमिति ॥ सात्रियस्यापदि मध्यादि पंचकत्यानि विक्रयेन सो

जा०२

षः ॥ अनापदि तु विप्रो नक्तार्धं प्रायश्चित्तमिति दिप्रसंगादागतं ॥ मारुते तु सर्वत्र प्रायश्चित्ता नादेशे
प्राजापत्यं चांद्रायणं त्रिषवनाराणं तस्यैतयोऽन्यमिति दिक् ॥ ॥ इति श्रीमत्स्वितपानेकल्ककरोपाभिध्यमहादे
वात्मजबापूभट्टविरचितायां प्रायश्चित्तमंजर्यां विक्रयप्रायश्चित्तानि ॥ अथ मिश्रप्रकरणं ॥ तत्र सुरा
पानं महापातकं ॥ तत्र मरणांतिकं दाहशाब्दादिप्रायश्चित्तं ग्रंथांतरतोऽवसेयं ॥ औषधार्थं तत्पानेन त
सकृत्कृच्छ्रपराकं चांद्रायणं पुनः संस्कारश्च ॥ अज्ञानात्सकृत्पाने कृच्छ्रं ईनं समुद्रगानदीस्नानं चांद्राय
णं शक्त्या ब्राह्मणभोजनं अनडुत्सहितगोप्रदानं पुनः संस्कारश्च ॥ अथ संसर्गप्रायश्चित्तं ॥ तत्र सं
सर्गभेदानाह बृहस्पतिः ॥ एकशय्यासनं पंक्तिर्भांडपंक्त्यन्नमिश्रणं ॥ याजनाध्यापने योनिस्तथा
च सहभोजनं ॥ नवधा संकरः प्रोक्तो न कर्तव्योऽधमैः सहेति ॥ योनिः पातकिने कन्यादानं तत्कन्यापरि
णयनं चेति ॥ छागलेयः ॥ आलापाद्गात्रसंस्पर्शान्निःश्वासात्सहभोजनात् ॥ सहशय्यासनात्याप

पा। ना १

प्रा॰ य॰ श्चि॰ मे॰ ॥५८॥

संक्रमतेन्नरणाग्मिति॥ अन्ये वतस्मातिनुहाद्यनेकविधाः संसर्गा आकरतो वगंतव्याः॥ विस्तरभयान्ने
हो च्यंते॥ पतितेन सहैकशय्यासनादिभिः संवत्सरेण पतति॥ भोजनाध्ययनाध्यापनयोनिसंबं
धैः सद्यएव॥ अन्ये संसर्गिणः प्रायश्चित्तपानकिवत्॥ संसर्गिसंसर्गेतु प्रायश्चित्तमल्पं योजनीयं
॥ अत्यंतापदि पंचमहायज्ञादियाजने अंगाध्यापने व्यवहितविवाहसंबंधे वा संवत्सरेण पातित्यं॥
षण्मासिकसंसर्गे प्रायश्चित्तार्धं॥ अस्य विस्मृत्योत्पन्नस्य पुत्रस्य नरनीयांशः प्रायश्चित्तं॥ क
न्यायास्तु नत्वनीयोंशः॥ जनकप्रायश्चित्तमौलिकनवमांशादस्यार्थः॥ अल्पदोषयुक्तस्या
ल्पसंसर्गे त्यप्रायश्चित्तं॥ अल्पदोषयुक्तस्य बहुकालसंसर्गे तदुक्तं प्रायश्चित्तं॥ एतत्कलौ कृतै
वत्तिष्यतरतिव्यासवचनं तस्यायमर्थः॥ संसर्गदोषः कलौ पातित्योत्पादको न। किंतु पापमात्रो

त्पादक इति॥ अयं चापरो विशेषः॥ पतितयुगे संभाषणमात्रादेव पातित्यं॥ त्रेतायां स्पर्श ॥५८॥

प्रा॰ २

मात्रा न ॥ द्वापारे तदन्त्यमनि त्यहात् ॥ कलौ तु रूस्त्रेन समुदितेनैव कर्मणेति ॥ ततश्च किंचित्का
लं महापातकिसंसर्गिणो न द्वादशाब्दादि ॥ एकदेशासंसर्गेप्यपूर्वोक्तचंडालस्पर्शादिप्रायश्चित
वद्योज्यं ॥ बहुसंसर्गे प्रायश्चित्तमुक्तमपूर्वे ॥ तद्यथा ॥ पंचाहे त्रिरात्रं ॥ दशाहे प्राजापत्यं ॥ द्वादशा
हे सांतपनं ॥ मासार्धे दशरात्रं मासमात्रे पराकः ॥ मासत्रये चांद्रायणं ॥ षण्मासे चांद्रायणद्वयं ॥
संवत्सरे षाण्मासिकं ॥ अब्दे किंचिन्न्यूने अब्दं चांद्रायणं च ॥ पूर्णे संवत्सरे द्वादशाब्दमिति ॥ अज्ञा
नात्षडब्दं ज्ञानतो द्वादशाब्दमिति केचिदाहुः ॥ अथ गृहे चंडालादिसंसर्गे हि माधवः ॥ गृहस्थो देह
शुद्ध्यर्थं प्राजापत्यं चरेद्द्विजः ॥ वर्षादूर्ध्वं ततो ज्ञात्वा पृथक् चांद्रायणं स्मृतं ॥ कुट्येषु सालनं के

ल्मा२

त्वाम्लमयानि विसर्जयेत् ॥ गृहे पानीहद्रव्याणि ओ[illegible] निर्वविसर्जयेत् ॥ पात्रे तरेषु निनयेद्दधि
का निपथाविधीति ॥ ऊर्ध्वं संवत्सरपर्यंतसंसर्गे ॥ तदूर्ध्वं गृहदाहादि ॥ पंचगव्येन शुद्धाः स्युर्नम

59

स्नानादिसंगात् ॥ क्वचित्संबंधात्संसर्गं विना विदोषः श्रूयते ॥ पत्नी पापं पतिर्भुंक्ते शिष्यपापं गुरुस्तथा ॥ राजा
राष्ट्रकृतं पापं राजपापं पुरोहितः ॥ अचार्यमृत्विजां पापं नाममण्णीर्नामिसंभवमित्यादि ॥ ननु कलौ
कर्त्रैव लिप्यत इति वचनात् ॥ कथं भर्त्रादीनां पापं ॥ उच्यते ॥ इदं वचनं युगांतरविषयं ॥ कलौ तु पत्नी
पापं ज्ञात्वा तस्याः संभोगादिसंसर्गकृते भर्तुः पापं ॥ शिष्यपापं ज्ञात्वा तदध्यापने गुरोः पापं ॥ राष्ट्रकृ
तं पापं ज्ञात्वा द्रव्यलोभादिना यथोक्तदंडाकरणे राज्ञः पापं ॥ राजपापं ज्ञात्वा यथोक्तोपदेशाकरणे पुरो
हितस्य पापं ॥ ऋत्विजां पापं ज्ञात्वा तैः सह कर्मकरणे आचार्यस्य पापं ॥ नाममंत्रेस्तु राजवदित्यवि
रोधः ॥ क्वचित्संसर्गाभावः ॥ यथाह शातातपः ॥ अशुचिर्विसंस्पृष्टस्तु एक एव संदुष्यति ॥ तत्स्पृष्टस्त्वान्यो
न दुष्यते सर्वद्रव्येष्वयं विधिरिति ॥ अशुचिर्विलशुनपलांडुगादिद्रव्यं ॥ तथा वसिष्ठ एवाह ॥ संहतानां तु पात्राणां
यद्येकमुपहन्यते ॥ तस्य तत्स्पर्शनं प्रोक्तं न तु तत्स्पर्शिनामपीति दिक् ॥ अथाग्नित्यागो ॥ तत्र श्रौता

ग्नित्यागेमासत्रयेचांद्रं ॥ अभ्यासेप्रायश्चित्ताभ्यासः ॥ आपन्नोसंवत्सरेचांद्रं ॥ वर्षद्वयेचांद्रायणंसो
मायनंच ॥ वर्षत्रये छं ॥ एवंप्रायश्चित्तंकृत्वापुनराद‌ध्यात् ॥ तदभावेपातित्यं ॥ स्मार्ताग्नित्यागे
अब्दपर्यंतंप्रतिमासमुपवासः ॥ अब्देचांद्रायणंआपन्नोअब्देप्राजापत्यं ॥ द्वितीयेतिकृच्छ्रः ॥ तृ
तीयेचांद्रं ॥ सत्यधिकारेग्न्याध्यानाकरणेब्दपर्यंतंप्रतिमासंत्रिरात्रं ॥ ततःपरंचांद्रायणं ॥ अना
संपदि त्रैमासिकं ॥ अनाश्रमेसंवत्सरेप्राजापत्यं ॥ द्वितीयेतिकृच्छ्रं ॥ तृतीयेकृच्छ्रातिकृच्छ्रं ॥ तदूर्ध्वंचांद्राय
णं ॥ प्रायश्चित्तंकृत्वाश्रममुपेयात् ॥ इदमपिसत्यधिकारे ॥ विधुरस्यप्रतिमासंप्राजापत्यमितिकेचि
त् ॥ ब्राह्मणस्यापत्काले क्षत्रियवृत्याजीवनेसंवत्सरेचांद्रं ॥ वैश्यवृत्तौद्विमासेचांद्रं ॥ शूद्रवृत्तौमा
सद्वयेपुनरुपनयनपूर्वकंचांद्रं ॥ अभ्यासेप्रायश्चित्ताभ्यासःसर्वत्र ॥ अनापदिभोगार्थेसेवयार्थेवाकृषि
कारणेसंवत्सरेचांद्रं ॥ द्वितीयेद्विगुणं ॥ तृतीयेपतितवत् ॥ आपदिस्वाहारूणः ॥ प्रतिग्रहात्तुषा

प १ (६०)

रंभात्रि ज्या स्वृत्तनीयकं॥ क्षेवेंविंशतिमंभागंस्यजनोनास्तिपातकमिति॥ त्यागाभावेयथोक्तंप्रायश्चित्तं॥ नाध्य
नक्ष्मकसैन्यचिकरनक चित्रकर्तृकुलालादिकर्मकरणे अकामतश्चांद्रं॥ मत्याभ्यासेपातित्यं॥ स्त्रीध्येनोप
जीवनेचांद्रं॥ अधीतवेदस्यशास्त्रादिगर्वेणाभिमानेनरोगस्त्वयमदाविस्मृतौमासमात्रेपराकः॥ मासत्रयेत
सकृच्छ्रं॥ ऋतुत्रयेचांद्रं॥ अब्दे॥ वर्षद्वयेद्विवार्षिकं॥ तदूर्ध्वंमहापापवत्॥ नत्त्रमायाश्विनं कृत्वागुरवेद
क्षिणांदत्वापुनर्यथाक्रममभ्यस्येत्॥ विष्णुस्तु॥ वेदाग्नस्तुत्साही त्रिषवणस्नायी अधः शायी संवत्स
रंभैक्ष्येणवर्तयेदित्याह॥ रोगादि[illegible]ना अशक्ततयानिरोधादिनावा विस्मृतौ मासजापत्यादिसा
मान्यं॥ वेदविप्लावनेत्रिरात्रमुपवासः॥ अभ्यासेकृच्छ्रं॥ अत्यभ्यासेकृच्छ्रत्रयं॥ कामतोत्यंताभ्यासेसं
वत्सरंयवौदनभोजनं॥ वेदविप्लावनंनाम अशुचिनाध्ययनं॥ चांडालादिश्रोत्रावकाशेध्ययनं॥ अ
नध्यायेष्वध्ययनं॥ धर्मरहिताध्ययनं॥ पतितादिसकाशादध्ययनं॥ मतिविरुध्याध्ययनमित्यादि॥ म

पूर्वेतु॥ वेदस्य यावान्भागः श्वंगाल्यादिभिः श्रुतस्तावंतं भागं सहस्रं कृत्वा जपेदित्युक्तं॥ ज्ञानान्तरे अ
मितिकानध्यायेष्वध्ययने प्रायश्चित्तार्थं॥ अध्ययनकाले गुरुशिष्ययोर्मध्ये महाध्यायिनो मध्ये वा
काककुक्कुटमूषकमंडूकादेरंतरागमने ध्ययनविरामः नक्तं प्रायश्चित्तं॥ एवमुत्तरत्रापि अंतरागम
नेतदानीमेवाध्ययनविरामे कृत्वा प्रायश्चित्तमाचरेत्॥ स्त्रीशूद्रगवाश्वमहिषवार्दभादिपश्वंतरा
गमने तूपवासः॥ मार्जारसर्पनकुलपंचनखास्यादेस्त्रिरात्रमुपवासः॥ त्रिषवणंस्नानं वा॥ जानुभ्यो
रनाभ्यां तरे गमनं वा॥ श्ववर्कवृकशृगालवानररजकादीनामंतरागमने कार्यं॥ गर्दभोष्ट्रादिवेसाल्लरज
स्वलाद्यंतरागमने कायत्रयं॥ गोमवधराजादिब्रह्मोद्भक्षनास्तिकादीनामंतरागमने त्रैमासिकं
॥ वेदोत्सादीब्रह्मोऽस्तः॥ ग्रामेषश्वपाकादिषु षाण्मासिकं आद्यमहापातकिकृतन प्राद्यंतरागमने
द्वं॥ अज्ञानात्प्रायश्चित्तार्थं॥ केचिदेतदंतरागमनोत्तरमध्ययने प्रायश्चित्तं॥ तदानीमेवाध्ययनविरामे प्रा

(6)

यश्चित्तं नास्तीत्याहुः॥ वेदशास्त्रादिनिंदने माजापत्यं॥ अथ स्वदारपरित्यागो॥ तत्र सद्धस्त्वप्रियवादिनी
मिति गोतमवाक्यं पुनस्यार्थमाह हेमाद्रिः॥ अप्रियवादो नाम कलियुगे सा श्वाध्यभिचारएवाप्रियवाद
ः ननु दुर्भाषणादि॥ अतः सा श्वाद्यभिचारेत्याग इति॥ अनएवाह गोतमः॥ व्यभिचाराद्दते पत्नीयो विप्रः
संपरित्यजेत्॥ मूलगृहसाम वामी निष्कर्तुकाल व्यतिक्रमात्॥ नत्र प्रायश्चित्तमाह स एव॥ खराजिनं बहि
र्लोमपरिध्याय समंततः॥ शरावपात्रमादाय भिक्षार्थं नाममाविशेत्॥ दारव्यतिक्रमिणो मे भिक्षां
देहीति याचयेत्॥ सप्तागाराण्यटित्वाथ भोजयेत्सा यमादरात्॥ षण्मासमेवं कृत्वा च शुद्धिमाप्नोति
देहीति॥ ... नत्र खरचर्म विनाभिसार्थं पर्यट
पो विंक्रिमिति॥ निष्कारणमपास्त्रीणं भर्तृत्यागेप्येवमेव प्रायश्चित्तं॥ नत्र खरचर्म विनाभिसार्थं पर्यट
नमिति विशेषः॥ चांद्रायणादि शक्त्यनुसारेणेति शास्त्रांतरे॥ स्त्रियः क्रोधद्वारिद्यमात्सर्यादिभिर्भर्त्रीति
क्रमे अतिकृच्छ्रं॥ पितृमातृसुतत्यागेप्येवं॥ सर्वथा त्यागे पातित्यं॥ तत्र पतितवत्प्रायश्चित्तं॥ कारणं हानिवा

त्तिनां मासे प्राजापत्यं ॥ संवत्सरे चांद्रं प्राजापत्यं च ॥ अभिशस्तस्य प्रायश्चित्तमुक्तं हेमाद्रौ ॥ मिथ्यापवादे
यो बध्यः सोभिशस्त इतीरितः ॥ पापमस्ति सदा लोके वार्त्ता सर्वत्र चेद्यदि ॥ तद्दोषपरिहारार्थं प्राजापत्यद्वयं
चरेद्विति ॥ अस्मिन्नेव प्रतिपदोक्तं प्रायश्चित्तं मिथ्याभिशंसिनस्तप्तकृच्छ्रं ॥ साधुषु विप्रेषु स्तेयपत्यभिचारहत्या
दिमरणादेशारोपं वदेत् ॥ अपि वा नादशानां विप्राणां सभायां गुणानाच्छादयन् मिथ्यादोषारोपरूपं वाचं च
देत् स मिथ्याशंसी मिथ्यावादी च ॥ कुग्राम वासे मासमात्रे पराकः ॥ षण्मासे प्राजापत्यं ॥ वर्षे चांद्रं ॥ विद्वद्
स्नानशिवविष्णुआलयादिरहितः कुग्रामः ॥ कुत्सितसेवायां दिनमात्रे पराकः ॥ पक्षे नसं ॥ मासे प्राजापत्यं ॥ वर्षे
चांद्रं ॥ वर्षद्वयोर्ध्वे पानित्यं ॥ कुत्सिताश्च देवलेनोक्ताः ॥ मूर्खश्च पिशुनश्चैव मत्पापो दुर्जनस्तथा ॥ स्तेयी च वञ्चित
वश्चैव समसैने कुत्सिताः स्मृताः ॥ सेवाप्रकारमाह गोतमः ॥ शौचार्थमृत्तिकानोदकमत्यहं पच्चनक्रिया ॥ तदाक
मनुस्त्यैव हस्तपादविमर्दनं ॥ उच्छिष्टमार्जनं तेषां पाने चैलादिधारणमित्यादि ॥ अविधिना अजादिप

७भि ५

ग्रा.यम.
॥ ५८ ॥

क्षुधाते प्राजापत्यं चांद्रं वा ॥ वानिनस्त्वाहमनुः ॥ अनुमंता विशसिता निहंता क्रयविक्रयी ॥ संस्कर्ता चोपहर्ता च
खादकश्चेति घातकाः ॥ व्यवहारे कलहे प्रायश्चित्तादिषु वा क्रूरसाक्षित्वे तु द्विजवादे माहाचांद्रं ॥ दूतरत्नकायकृ
च्छ्रं ॥ धर्मशास्त्रपुस्तकदाने प्राजापत्यं ॥ गृहस्थस्यानापद्यपि सिद्धान्नभिक्षाकरणे वज्रकृच्छ्रं ॥ यमः ॥ नपंक्त्यां
विषमं दद्यान्न याचेन्न दापयेत् ॥ याचको दापको दाता नानवै स्वर्गगामिनः ॥ प्राजापत्येन कृच्छ्रेण मुच्यंते कर्मण
स्ततद्वति ॥ स्वस्थपराशरः ॥ पादमतापनं कृत्वा कृत्वा वाग्नितथाप्यथ ॥ कुशैः प[illegible]ज्यपादैस्तु दिनमेकं व्रतं चरेदि

कृ.५

ति ॥ विप्रादिवधयुक्तरुषा शपथकारणे चांद्रं ॥ देवादिशपथेप्येवं ॥ लोभान्मोहाद्वा गृहीतव्रतस्यागे मुंडनपू
र्वकमुपवासत्रयं ॥ प्रमादाद्विघ्नवशाद्वा भंगे उपवासत्रयमेव ॥ पुनर्व्रतग्रहणं च ॥ विप्रयोर्विप्राग्न्योर्दंपत्योर्गो
विप्रयोर्विप्रपिंडयोर्गोवृषयोर्विष्णुगरुडयोर्वृषशिवयोः श्रौताग्न्योः पितृपुत्रयोर्भ्रात्रोर्मूषकगणपत्योरि
त्याद्यंतरागमने अज्ञानात् सांतपनं ॥ ज्ञानतश्चांद्रायणं ॥ वेदाध्ययनहोमसान्ध्यांगदोहविवाहकालेषु ॥ ५८ ॥

विप्रादीनामंतरागमने अज्ञानतोपि वा द्वंद्वं ॥ ज्ञानतो महाद्वंद्वं ॥ क्षुत्वा जृंभित्वा निष्ठीव्य वा अनृतभाषणे प
तितादिसंभाषणे वा जलं दक्षिणं श्रवणं वा स्पृष्ट्वा सूर्यं चंद्रमसं वन्हिं वा दृष्ट्वा ब्रह्मविष्णुमहेश्वरान्स्मरेत् ॥
दक्षिणश्रवणस्पर्शो जलाभावे कर्मणि व्याप्रतो वा ॥ गुरुं न त्वं कुर्यात् ॥ न हुं कुर्यात् ॥ नोदासीन्यं कुर्यात्
॥ नैकवचनेन नाम गृह्णीयात् ॥ नोपेक्षां कुर्यात् ॥ न द्रुह्यात् ॥ न धिक्कारं कुर्यात् ॥ एतदज्ञानात्सकृत्करणे शी
घ्रं तेन नत्वा विगतकोपं कृत्वा नक्तं भुंजीत ॥ उपवासो वा ॥ ज्ञानतस्त्रिरात्रमुपवासः ॥ अत्यंताभ्यासे षडब्दं
प्रायश्चित्तमिति हेमाद्रिः ॥ गुरवश्चोक्ताः शूलपाणिना ॥ आचार्यस्तु पिता ज्येष्ठो भ्राता चैव महीपतिः ॥
मातुलः श्वशुरश्चैव मातामहपितामहौ ॥ वर्णश्रेष्ठः पितृव्यश्च पुंस्येते गुरवो मताः ॥ उपनेतान्न
दाता च भयत्राता धनप्रदः ॥ धर्मशास्त्रोपदेष्टा च गीताशास्त्रोपदेशकः ॥ बुद्धिमदुपाध्यायश्चैते पितु
रवो मता इति ॥ पराशरः ॥ राजान्नदाता पितरावाचार्यर्त्विक्पुरोहिताः ॥ एतेषामप्रातिकूल्ये तु प्रसादयेद्वि

शुध्यन्ति॥ अन्नदोऽभयदश्चैव तथार्त्विक्पुरोहितः॥ एतेगुरुसमाज्ञेयानेषुप्रतिसुखश्चरेत्॥ यथा यावद्गुरुर्ब्रूयात्तत्कार्यमविशंकया॥ निग्रहे नुग्रहे वापिगुरुः सर्वत्रकारणमिति॥ हिंसायंत्रविधाने संवत्सरे पराकद्वयं॥ द्विवर्षपर्यंतं चांद्रद्वयं॥ नवृध्वें पतितवत्॥ हिंसायंत्रविधानस्वरूपं यथा॥ गज बंधने भुवः खननं॥ अश्वपशुमनुष्यादीनां बंधने श्रममार्गनिर्माणं॥ अरण्येपशुहिंसार्थं जालापास्तरणं॥ पर्वतेषु व्याघ्रादिहिंसनार्थं द्रोहः॥ गृहे मूषकहननार्थं फलकादिभिर्यंत्रनिधानं॥ वृक्षेषु शुकसारिकचटकादिहननेऽग्नीवारज्जुपाशादिकरणमित्यादि॥ अथाज्ञानिनः प्रायश्चित्तं॥ उक्तो यथा॥ अयंगुरुरयंलघुः॥ इदंज्ञास्त्रमिदमशास्त्रं॥ इदंतीर्थमिदं नदी॥ अयंधर्मोऽयमधर्मः॥ इदंसदिदमसत्॥ इत्यादिविवेकशून्यः॥ शीघ्रविस्मरणमादुन्मत्तत्ववर्तनं तत्॥ तस्यात्यन्तविवेकस्याभ्यासानुसारेण चांद्रं पराकमित्यादि योजनीयं॥ बहुकालनिरंतराभ्यासे पातित्यं॥ आत्मघातकानां शवः स्पर्शे वहने दहने च ततकृच्छ्रं विंशति गोदानं च॥ दुर्मरणमृता

के २

नोन्नावृस्यशीहोप्राजापत्यं॥ दारान्नधनादिलाभानांविघ्नकरणेप्रतिनिमित्तंवार्षिकं॥संक[illegible]त्विन
द्य[illegible]नयागाद्यकरणेविप्रसंमतिंकृत्वात्रिरात्रंमहानदीसंगमेत्रिषवणस्नानपूर्वकमुपवासंकृत्वातदंते
गोदानंदशब्राह्मणभोजनंच॥वपनसमयेप्रमादाच्छिखावापनेखल्वाटत्वादिनावासर्वथाकेशाभावेप्रा
यश्चित्तंविनसशिखवापनेवापुनरुत्पत्तिपर्यंतंसोवाल्लोमभिःशिखांकृत्वानादक्षिणकर्णेधृत्वाकर्मकु
र्यात्॥कौशीशिखाब्रह्मसंग्रथितुनादक्षिणकर्णेस्थाप्येतिदिवोदासः॥नष्टभावेकार्यंकृच्छ्रः॥यज्ञो
पवीतस्यसदाधारणपक्षेअंसात्रुत्तरंअंगुलमात्रेभ्रष्टेपुनर्निधायप्राणायामत्रयंकुर्यात्॥कूर्परंप्रा
प्यामशतं॥मणिबंधेसहस्त्रप्राणायामाः॥वामहस्तादधःपतनेनत्यक्त्वानवंधृत्वासूर्यदृष्ट्वासह
स्त्रंगायत्रीजपः॥यज्ञोपवीतनाशेतु॥उपवीतंयदानष्टंगायत्र्याष्टशतंहुनेत॥प्राजापत्यंचरेद्वापिपद्
गोदानमिष्यते॥अथमन्त्रप्रयोगक्रमः॥कर्त्तालौकिकंत्रिवृत्सूत्रंयज्ञोपवीतार्थंधृत्वास्नात्वादेशकालौ

65

प्राय० मं
६०

संकीर्णयज्ञोपवीतनाशजन्यदोषपरिहारद्वारा श्रीपरमेश्वरप्रीत्यर्थं यज्ञोपवीतनाशप्रायश्चित्तं करिष्ये ॥ ए
के आचार्यवरणमित्युक्तं ॥ यज्ञोपवीतधारणं विनाधिकाराभावात् ॥ स्थंडिलाद्यग्निप्रतिष्ठापनांतं कृ
त्वान्वाधाने सवितारमष्टोत्तरशतसंख्याकतिलैः आज्येन वेत्युक्त्वा हवने सवित्र इदं न ममेत्युद्देशत्या
गपूर्वकं गायत्र्याहुत्वा स्विष्टकृदादिहोमशेषं समाप्याचार्यायवरं दत्वा नूतनानि यज्ञोपवीतानि मंत्रेण ध
त्वा क्रमप्राप्तमाह्निकं कुर्यात् ॥ प्राजापत्यपक्षे तद्दानीमेव न तु अन्याम्नायत्वेन द्रव्यं दत्वा गोदानं वा कृत्वा यज्ञोप
वीतं धारयेदिति ॥ खरेण वा उष्ट्रेण वा युक्तं यानमारुह्याध्वगंता सचेलस्नानपूर्वकं प्राणायामेन शुध्येत् ॥ म
त्या त्रिरात्रमुपवासः ॥ सासान्नरोह्रोहिणोद्धिशुणं ॥ आहिताग्निर्विषमेत्वाह पेठीनसिः गजोष्ट्रवृषभं ना
रीसमारुह्याध्यवाप्नुमान् ॥ भोजने याजने कृच्छ्रमात्मविश्वापि विनश्यतीति ॥ भार्यया सहैकपानेन गमने प्राजा
पत्यं ॥ कृत्विरपवादः ॥ तदाह मनुः ॥ महारण्ये च यात्रायां पथि चोराकुलेषति ॥ असहायो भवेद् द्विजस्तदा भार्यं

द्विजन्मभिः ॥ एकत्र पानमारोहे देकपात्रे च भोजनं ॥ भार्यासहपरान्नुक्त्वा विप्रस्नस्य न दोषभागिति ॥
विप्रस्य कंठबंधनेत्रणे नापि वा तस्य गाढने मे शीघ्रं नत्वा विगतकोपं कृत्वा उपवासं कुर्यात् ॥ अज्ञानात्पादे
न स्पर्शे तु नमस्कारः प्रसादने च ॥ ज्ञानतउपवासः ॥ मत्या विप्रं हत्तुं दंडोद्यमे कृच्छ्रः ॥ अमत्यार्धकृच्छ्रः ॥ म
त्यानिपातने तिकृच्छ्रः ॥ अमत्या कृच्छ्रः ॥ अमत्यारुधिरस्रावे तिकृच्छ्रः ॥ मत्या कृच्छ्रातिकृच्छ्रः ॥ अत्यंत
रक्तोत्पादने त्वाभेदेंगाकर्तने नैवापराकः ॥ अंगच्छेदे द्वगोदानं ॥ कामतो द्विगुणं ॥ पादप्रहारेतमपि प्रत्यप्र
सावस्नात्वाहोरात्रमुपोषणं कुर्यात् ॥ मार्गादौ निरोधकरणेन प्रवर्तनहरणे वा चांद्रायणं ॥ तत्रभेस्या
न्नेनेनि स्मरस्य सारे ॥ जीर्णादिवस्त्रधारणे मलवद्वस्त्रधारणे वा उपवासः ॥ अष्टोत्तरशतं गायत्रीजपो
वा ॥ वा कूपाणिपादनापल्यकौरेण प्रयोजनं विनान्नभाषणे ष्टोत्तरशतं गायत्रीजपः ॥ अभ्यासे उपवासत्र
यं ॥ कामतोभ्यासे तप्तकृच्छ्रं ॥ सकृदज्ञानात् अनृतवदने जलस्पर्शः ॥ तदभावे दक्षिणकर्णस्पर्शः ॥ पादुकोपान

65

सहितपादेन शय्यारोहणे कच्छ्रार्धं॥ समितुष्यकुशांबुगंधाक्षता त्रिभैस्यचरनान्नहस्तं देवपूजाकर्तारं जपकर्मारं वा नाभिवादयेत्॥ तेनान्यस्याभिवादनं न कर्तव्यं॥ तत्कारणे त्रिरात्रमुपवासः॥ केचिद्दोषाभावं वदंति॥ तदुक्तमाह्निकरत्ने॥ सर्वैवापि नमस्कार्याः सर्वावस्थासु सर्वदेति॥ अत्रयथाचारं व्यवस्था॥ पलाशकाष्ठनिर्मितशयनासनपादुकारोहणे त्रिरात्रं यावकपानं॥ केशनिर्मितवस्त्रधारणेउपवासः॥ केशास्तत्रमनुष्याश्वमदीनां निषिद्धाःस्युरितिशेयाः॥ नीलीवस्त्रधारणे नीलीरजसा दंतधावने चोपवासः॥ पंचगव्यपानं हिरण्योदकपानं च॥ नीली क्षेत्रमध्यगमने प्राणायामत्रयं॥ रोमकूपेषु नीलीरजःसंयोगे न सकृच्छ्रं॥ नीलीविक्रयेपालने नहृत्या जीवनेच पतितः स्यं॥ नीलीदारुभेदने चांद्रं॥ विधवाया नीलीवस्त्रधारणे तद्भर्तुर्नरकः॥ नीलीं धृत्वा स्त्रजः षष्टिवर्षसहस्राणि विष्ठायां क्रिमिर्भवतीति पुराणेउक्तं॥ तत्र चांद्रायणादिप्रायश्चित्तमभ्यासानुसारेण योजनीयं॥ कश्चिन्नीलीवस्त्रधारणे दोषाभावमाह॥

स्त्रीणां क्रीडार्थसंभोगे शयनीये न दुष्यति ॥ कंबले पट्टसूत्रे च नीलीसंयोगो न दुष्यतीति ॥ शूद्राभिवादने त्रिरात्रमुपवासः ॥ वमने बस्तिकर्मणि प्रच्छर्दने विरेके च स्नानं पंचगव्यप्राशनं च ॥ माषमसूरादिवमने स्नानमुपवासत्रयं प्राणायामत्रयं घृतप्राशनं च ॥ दिवास्वापे श्मशानाक्रमणे हयारोहणे पुज्यातिक्रमे वा स्नानं ॥ आक्रोशे एकउपवासः ॥ कामतस्त्र्यहः ॥ अभ्यासे नसकृच्छ्रं ॥ निषिद्धकाष्ठदंतधावने गोदर्शनं ॥ श्राद्धोपवासादिनिषिद्धदिने षु दंतधावने गायत्र्या शतवारमभिमंत्रितजलपानं ॥ तैलाभ्यक्तस्य श्मश्रुकर्म वमनः स्नानात्पूर्वं मूत्रपुरीषोत्सर्गे त्रिरात्रमुपवासः ॥ अभ्यासे सांतपनं ॥ शूद्रेण यज्ञोपवीते छिन्ने स्नात्वान्यस्य स्वाष्टोत्तरशतं गायत्रीजपउपवासश्च ॥ ज्ञानतो द्विगुणं ॥ अज्ञानात् क्षिप्रेण छिन्ने मनस्तापात् शुद्धिः ॥ ज्ञानतस्तूपवासः ॥ श्वचांडालादिच्छिन्ने महासांतपनद्वयं ॥ शूद्रेण सह स्वापे सांतपनं ॥ चंडालादिना विप्रस्य व्रणबंधने अभ्यंजने रुधिरो[illegible]त्पादने तोयेप्राजापत्यं

66

प्राय सं.

॥ ६२ ॥

॥भैषज्यक्रियायामुपवासद्वयं॥ शूद्रयाजकब्राह्मणस्य निंत्यमहाशिमिलतथुक शरणागतघातिनां त्रै
मासिकं॥ ज्ञानतः षाण्मासिकं॥ अभ्यासे कृच्छ्राब्दं॥ गुरौ टिस्य आत्मार्थपाकारंभे देवताराधनादिरहि
हीनव्रतलोपेन्यव्रतलोपेच चांद्रायणं समुद्रयाने शूद्रसेवायां च चांद्रं पुनःसंस्कारश्च॥ असच्छास्त्राभ्यासे
चांद्रं त्रैमासिकं वा॥ दक्षिणाभिमुखेनाचमने कृते स्नानं॥ पश्चिमाभिमुखेन पुनराचमनं॥ हस्तच्युत
पवित्रेण जपमालापतने वा स्नानमघमर्षणं प्राणायामत्रयं वा॥ शेके जाते अनुपनने वा स्नानं॥ देवतापति
मंत्रिदंडिनं पतिं वा दृष्ट्वा नमस्काराकरणे उपवासः॥ यतिब्रह्मचारिणोर्भिक्षार्थं गृहमागतयोर्भि
क्षादानं विना भोजने चांद्रायणं॥ ज्ञानात पः॥ एकवृक्षसमारूढे चांडालब्राह्मणो यदि॥ फलं भक्ष
यतस्तत्र प्रायश्चित्तं कथं भवेत्॥ ब्राह्मणानामनुज्ञाप्य सवासा जलमाविशेत्॥ अहोरात्रोषितो भूत्वा
पंचगव्येन शुध्यतीति॥ ज्ञानतस्त्रिरात्रमुपवासः॥ कौपीनाआत्मस्याप्यध्यवसायमात्रे उपवासत्रयं

त्रप५

कौ २

॥ ६२ ॥

दि

॥ अध्यवसायकृतिपयव्यापारं कृत्वास्वमएवनिवृत्तो द्धृताभ्युक्तो मौनी प्राणायामं कृत्वा गायत्रीं जपन् त्रिरा

त्रमुपवसेत् ॥ न्येन निवर्तिनस्य द्विगुणं ॥ अध्यवसायपश्चात्पूर्वदिक्षुतकरणे प्राजापत्यं ॥ द्वादशते चांद्रं ॥

प्राशस्तु ॥ प्राजापत्यद्वयेनैव तीर्थाभिगमनेन च ॥ वृषेकादशदानेन वर्णाः शुध्यंति ते त्रयः ॥ ब्राह्मण

स्य प्रव्रज्यामिगत्वारण्य चतुष्पथे ॥ सशिखं वपनं कृत्वा प्राजापत्यद्वयं चरेत् ॥ गोद्वयं दक्षिणां दद्यात् सु

ध्दिं पाराशरो ब्रवीत् ॥ मुच्यते तेन पापेन ब्राह्मणत्वं च गच्छतीत्याह ॥ प्रयागादौ वैधमरणमध्यवसायस्य

जतः पुनर्गृहस्थाश्रमेच्छोः प्रायश्चित्तं तु ॥ वनं गत्वा चतुष्पथे सशिखं वपनं कृत्वा वने वसन् सहं त्रिसं

ध्यमवगाह्याष्टोत्तरसहस्रं गायत्रीं जप्त्वा मध्याह्ने भिक्षार्थं ग्रामं प्रविश्य सप्त गृहेषु भिक्षामटित्वा पुन

र्वनं गत्वा तां धौतां भिक्षामश्नीयात् ॥ एवं षण्मासात्शुद्धिः ॥ सहगमनार्थं गतानां प्रायश्चित्तं भृगुपातादौ ॥ प्रा

जापत्यं ॥ संन्यस्तस्य गृहस्थाश्रममिच्छतः प्रायश्चित्तं द्विमितास्वरादौ द्रष्टव्यं ॥ गुरुदेवविप्राचार्यमा

त्पित्रनरेंद्रागणां प्रति आभिमुख्येन निष्ठीवने प्रतिवादे आक्रोशने निक्रमे पैशुने वासचैलस्नानपूर्वकं प्राजापत्यं कृत्वा गुर्वादिप्रसादात्पूतो भवति॥ स्नानतोभ्यासे जीवनाविरोधेन जिह्वां दहेत्॥ हिरण्यं वदघात॥ तटाककूपजलाशयादिभंगेन त्पूर्ववद्दंडं कृत्वा कायकृच्छ्रमाचरेत्॥ एतदल्पतटाकविषयं॥ महातटाके ब्रह्महत्याव्रतं॥ स्तनकाध्यापिनः अब्दं चांद्रं॥ अब्दद्वये चांद्रायणचतुष्टयं॥ अब्दत्रये षट्चांद्रायणानि॥ तदूर्ध्वं ब्रह्मघ्नव्रतं॥ स्मृतिरहीत्वा शिष्यान्वेदमध्यापयति स स्तनकाध्यापी॥ व्रतिनो नियमलोपे प्रायश्चित्तं निर्णयामृते॥ स्तेनहिंसकयोः सख्यं कृत्वा स्तेन्यं वा हिंसनं॥ प्रायश्चित्तं व्रती कुर्याज्जपेन्नाम शतत्रयं॥ यद्दुद्देशो न व्रताचरणं तद्देवतायाः शतत्रयं नाममंत्रं जपेदित्यर्थः॥ इदमुपलक्षणं॥ ते नानादेशे दोषांतरेपीदं प्रायश्चित्तं बोध्यं॥ तथा चतत्रैव॥ मिथ्यावादे दिवास्वापे बहुशोंबुनिषेवणे॥ अष्टाक्षरं व्रती जप्त्वा शतमष्टोत्तरं शुचिः॥ ॐ नमो नारायणायेत्यष्टाक्षरः॥ कदर्यवार्धुषिकयोः अन्या- ॥ ६३॥

सानुसारेण चांद्रं त्रैमासिकं षण्मासिकमित्यादि ॥ बहुकालमत्यंताभ्यासेपानित्यं ॥ कद्रपलक्षणमुक्तं पारि
जाते ॥ आत्मनो धर्मकृत्यं च पुत्रदारांस्तथैव च ॥ लोभाद्यः पितरौ त्यक्त्वा सकदर्य इति स्मृतः ॥ स एव लुब्ध
॥ वार्धुषिकलक्षणं वचनत्रैव ॥ यस्तु निर्देसरां नित्यं प्रकुत्सत्यात्मनो गुण्यान् ॥ सवैवार्धुषिको नाम हव्यकव्ये
षु गर्हितः ॥ अन्यदप्युक्तं बैध्यायनेन ॥ यः समर्घमृणं गृह्य महर्घं संप्रयोजयेत् ॥ सवैवार्धुषिको नाम सर्व
कर्मसु गर्हितः ॥ निषिद्धवृत्त्युपजीवी सोपि वार्धुषिकः ॥ भुक्त्वा जिनः सोमविक्रयिणः कौमारदारत्यागि
नो वृषलीपतेश्च अमत्सा त्रैमासिकं ॥ मत्या षाण्मासिकं ॥ अभ्यासेब्दं वृषलीपतिलक्षणं तु पारिजाते ॥ पि
तुर्गेहे तु या कन्या रजः पश्यत्यसंस्कृता ॥ सा कन्या वृषली ज्ञेया तत्पतिर्वृषलीपतिः ॥ कन्यैव विवाहात्पूर्वं रजया
जो दर्शनेन तु सिता [illegible] तदनंतरं पिता तावत्संरक्ष्य पाणिग्रहनानि कृत्वा अन्यस्मा एव कन्या स्वर्णशृंगादिभूष
णयुक्ता यथोक्तविधिना गां दत्वा तत्राप्यशक्तो यथाशक्ति सदक्षिणमन्नं विप्रेषु दत्वा त्रिदिनमुपोषिता च

प्रायसं·
॥६८॥

नुर्थैहिताव्यपयोमात्ताहारां कन्यां निघ्नन्रजस्कांभूषितां कृत्वान च्छुध्येकृश्मांड होमं कृत्वा वरायदद्यात्
नः॥प्रारब्धे विवाहेरजोदर्शनेतुप्रयोगरत्नादौ विर्द्ध ष्टव्यः॥ करणानपाकरणेभ्यासवशेन चांद्रायणादियो
जनीयं॥परिवित्त्यादिप्रायश्चित्तं ग्रंथांतरेद्रष्टव्यं॥देवलकस्य अल्पाभ्यासे चांद्रायणादि॥वर्षत्रयोर्ध्वं पानि
सं॥उक्तंच॥देवार्चनपरो विप्रो वित्तार्थं वत्सरत्रयं॥सवैदेवलकोनाम हव्यकव्येषु गर्हितः इति यमः॥सूर्याभ्युदयेनु
यः शेतेसम्सूर्योदितउच्यते॥अस्तमयेतुयः शेतेसूर्याभिनिर्मुक्तएवसः॥तस्यात्स्नानम्॥स्नानं॥स्नानम
सुसूर्योदयेस्वापेतुस्थापस्नानादिनित्यक्रियांविधायानश्नन्सावित्रीं जपन्नस्तमयपर्यंतंब्रह्मचारीतिष्ठेत्
॥अस्तमयसमयेस्वापेतथैवसूर्योदयपर्यंतंतिष्ठेत्॥व्याख्यातानुरस्यैनेवकिंचित्॥आश्वलायनस्तु
नेतु॥अभ्युदितंचेत्स्वपंतमादित्योभ्यस्तमियाद्वाग्यतोनुपविशन्रात्रिंशेषं भूत्वा येनसूर्ये ज्योतिषा
बाधसेतमइतिपंचभिरादित्यमुपतिष्ठेतान्युदियाच्चेदहकर्मश्रांतमनभिरूपेणकर्मणावाग्यतरूजिसमा ॥६८॥

नमुत्तराभिश्चतस्रभिरुपस्थानमिति ॥ निषिद्धकर्मश्रांतनिद्रितस्य सूर्ये उदिते सति प्रायश्चित्तं ॥ विहितक
र्मश्रांतस्य न प्रायश्चित्तमित्यर्थः ॥ मार्कंडेयपुराणे ॥ उलूखलं च मुसलं तथा चैव घरट्टकं ॥ पादसंक्रम
णं त्यापीतान्युपादुत्तमांगानि ॥ द्रष्टमुपलक्षणं ॥ तत्रश्चदृषदुपलौ संमार्जन्यादिष्वपि पादसंक्रमणं नैव
कार्यं ॥ अत एवोक्तं ॥ मार्जनी चुल्लिकां पीठं दृषदं चोपलां तथा ॥ नाक्रामेदंघ्रिणा जातु पुत्रदारधनक्ष
याद्धिति ॥ एतत्करणे अज्ञानादष्टोत्तरशतं गायत्रीजपः ॥ ज्ञानतो दशसहस्रं ॥ आपस्तंबः ॥ अग्न्यागारे ग
वां गोष्ठे देवब्राह्मणसन्निधौ ॥ आहारे जपकाले च पादुके परिवर्जयेत् ॥ आरुह्य पादुके यस्तु गृहात्सर्वा
गृहं व्रजेत् ॥ छेत्तव्ये चरणे तस्य नान्यो दंडो विधीयते ॥ अत्रापि पूर्ववत्प्रायश्चित्तं ॥ यत्क्वचि ... क्षणे आच
मनाच्छुद्धिः ॥ कश्चिदपवादः ॥ आचारसारे ॥ अपो जग्ध्वौषधं जग्ध्वा कृत्वा तांबूलचर्वणं ॥ सौगंधि
कानि सर्वाणि नाचामेत् विचक्षणः इति ॥ कर्म कुर्वन्नाचमनं भवत्येव ॥ देवागारशिलादिनास्वगृहकर

दृ २

६९

मायमं ॰ ३

उ १

णेश्वांद्रं॥ अथ दंशनप्रायश्चित्तं॥ तत्र श्वसृगालखरनराश्वोष्ट्रवराहपुंश्चलीवानरकुक्कुटवायसमृगाजमहिषावि
हस्तिनकुलमार्जारमूषिकाप्लवङ्गव्याघ्रादिप्राणिभिर्नाभेरधस्ताद्दंशे स्नानं प्राणायामश्च॥ किंचिदधिकदंशे आ
पोहिष्ठीयाभिर्मार्जनं घृतप्राशनं चाधिकं॥ सम्यग्दंशे षोडश प्राणायामाश्चाधिकाः॥ नाभेरूर्ध्वं ईषद्दंशे समुद्र
गानदीस्नानं शतं प्राणायामाश्च॥ सम्यग्दंशे त्रिरात्रमुपवासश्चाधिकः॥ मुखे द्विगुणं॥ [illegible]
शिरसि चतुर्गुणं॥ क्रव्यादा अपक्वमांसभक्षकाः॥ शुनादंशे तु विशेषः॥ गोशृङ्गोदकेन स्नानं॥ अपि
वा वृषभपदक्षुण्णीकृत्य स्नानं॥ हिरण्योदकसहितघृतप्राशनं वा॥ समुद्रतीरवासिना समुद्रदर्शनं वा॥ आहि
ताग्नेः श्वसृगालादिसम्यग्दंशे नाभेरधश्चेद्देवरात्रं सायं पयःपानं॥ नाभेरूर्ध्वं द्विरात्रं॥ वक्त्रे त्रि
रात्रं॥ मस्तके चतूरात्रं॥ ईषद्दंशे तु पूर्ववत्॥ स्त्रीणां शुनादिदंशे तु दिवा चेत्नक्षत्रदर्शनाच्छुद्धिः
॥ रात्रौ दंशने सूर्यदर्शनात् इति मिताक्षरायां॥ मयूरे चेतु॥ रात्रौ दंशने चंद्रमसं पश्येत्॥ कृष्णपक्षादौ चंद्रदर्

प्रा ३

र्गेनाभावेयांदिशंव्रजानितंा दिशमवलोकयेत्॥ दुर्दिनेंगनहनक्षत्रंवापश्येदित्युक्तं॥ पंचगव्यप्राशनंचेतिकेचि
त्॥ व्रतस्थायास्त्रिरात्रंसचूतनयावकपानं॥ रजस्वलायाःपंचरात्रमुपवासः॥ पंचगव्यपानंचेति॥ स्वादि
भिरा[illegible]णेवल्मीकेनेनरवैर्विलेखनेवानदंशस्यादिः॥ प्रक्षालनमग्निनाप्रतापनंच॥ अथप्रसंगाद्वृश्चिकदं
शफलं॥ उक्तंच॥ दंशनंवृश्चिकानांतुमनुष्याणांशुभप्रदं॥ इंद्रशीर्षाग्निपुच्छास्तेतस्मादिंद्राग्नसंतका
ः॥ निर्मितादेवतैःपूर्वंनानारूपधरास्तुते॥ फलानिदृष्टरूपाणिज्ञातव्यानिहितेच्छुभिः॥ दक्षभागेना
डिनेतुपुंसांत्तेयंफलंयथा॥ पादांगुष्ठसमारभ्यनाभिपर्यंतदेशके॥ दंशनंस्यान्मुनिश्रेष्ठाभ्यानव्याणां
विनाशनं॥ नाभिमूलंसमारभ्यकेशपर्यंतदेशके॥ पुत्रपौत्रादिभाग्यानांवृद्धिःस्यादिंद्रगुरुणास्मृतं॥
वामभागप्रधानानांवामभागेफलंभवेत्॥ वामभागप्रधानास्त्रियः॥ पुरुषाणांवामभागेस्त्रीणांदक्षि
णभागेचफलाभावः॥ प्रायश्चित्तंतुपूर्वोक्तंभवत्सेवेति॥ श्वादिदंशजनितव्रणेयस्मिन्बालस्युत्पन्नोनाभेर

२०

धस्तात्स्वेत् त्रिदिनं पंचगव्ये॥ स्नानं पंचगव्यप्राशनं चेति मयूखे॥ त्रिरात्रं गोमूत्रगोमयाभ्यां त्रिसंध्यं स्नानं पं
चगव्यप्राशनं चेति मिताक्षरायां॥ नाभिमारभ्य कंठपर्यंतं द्विगुणं॥ शिरसि प्राजापत्यं॥ अथ रजस्वलाप्राय
श्चित्तं॥ तत्र रजस्वलयोः सपत्न्योर्मिथः स्पर्शे मत्यामत्या वा उभयोरपि सद्यः स्नानेन शुद्धिः॥ रजस्वलयोर्ब्रा
ह्मण्योर्यातिगोत्रसंबंधयोरमत्यास्पर्शे स्ना[illegible]नमात्रं॥ मत्या त्वेकउपवासः॥ पंचमेन्हि पंचगव्यपानं च॥ अ
संबंधयोर्मत्यास्पर्शे अशुद्धेरनशनं॥ अमत्यास्पर्शे स्नानमुपवासश्च॥ तन्मध्ये तु कोपि आशुद्धेरनश
नं॥ कामतः सहशयने द्विर्वा स्पर्शे त्रिरात्रमुपवासः॥ ब्राह्मण्या रजस्वलायाः क्षत्रियारजस्वला
स्पर्शे त्रिरात्रमुपवासः॥ वैश्यारजस्वलास्पर्शे पंचरात्रं॥ शूद्रारजस्वलास्पर्शे षड्रात्रं॥ ब्राह्मण्या रजस्व
लायाः पतितचंडालांत्यजादिस्पर्शे तद्दिनात्प्रहात्युपवासे नातिकृच्छ्रप्रायश्चित्तं चरेत्॥ तत्र प्रथ
मेन्हि स्पर्शे त्रिरात्रमुपवासः॥ द्वितीये द्विरात्रं॥ तृतीये एकरात्रं॥ चतुर्थे नक्तमिति॥ सर्वत्र त्रिरात्रमि

९२

ति केचित् ॥ कामत इत्यन्ये ॥ अशक्तायाः अकामतश्चंडालादिस्पर्शे शुद्धिपर्यंतमुपवासः ॥ बालापत्यायाः गर्भिण्या
व्याधिग्रस्ताया वा उपवासस्थाने तत्प्रत्याम्नायः कर्तव्यः ॥ रजस्वला चंडालादिस्पर्शानंतरं परिभुंक्ते तदा प्रथमेऽह्नि
चांद्रं ॥ द्वितीये पादोनं ॥ तृतीयेऽर्धं ॥ चतुर्थे चांद्रायणपादः ॥ रजस्वलायाः श्वचंडालादिना एकवृक्षारोहणे उपवासः पं
चगव्यं च ॥ रजःस्वलायाः श्वादिस्पर्शे शुद्धिपर्यंतमुपवासः ॥ रजस्वलाया उच्छिष्टायाः श्वकुक्कुटसूकरग्रामचां
डालादिस्पर्शे पतितादिस्पर्शवत् ॥ भुंजानाया उच्छिष्टाया वा पतितचांडालादिस्पर्शे शुद्धिपर्यंतमुपवासः ॥ त
दनंतरं षड्रात्रं गोमूत्रयावकाहारः ॥ उच्छिष्टयोर्मिथःस्पर्शे प्राजापत्यं ॥ सावित्र्यादिस्पर्श एकैकस्य प्राजापत्य
स्य वृद्धिः ॥ रजस्वलायामलाघेन श्वस्पर्शेन सा च भुंजानातिक्रम्य प्रथमदिनस्पर्शे उपवासः ॥ द्वितीये नक्तं
॥ तृतीये एकभक्तं ॥ सर्वत्र पंचगव्यपानं च ॥ स्पर्शानंतरं भोजने प्रथमाहादिक्रमेण त्रिरात्राद्विरात्रैकरात्रनक्ता
नि रजस्वलाया भोजनकाले रजस्वलांतरदर्शने शुद्धिपर्यंतमुपवासः ॥ तदुत्तरं पंचगव्यप्राशनं च ॥ एक
॥

त्रिनवोपवासः ॥ चंडालादिदर्शनेउपवासस्तत्पमेकोवाकामतःप्राजापत्यं ॥ श्वादिदर्शनेप्येवं ॥ भोजनका
लेत्वजादिशब्दश्रवणेतुवेस्त्रंग्रासंसस्नकवाचामेत् ॥ भोजनेशुद्धिपर्यंतमुपवासः ॥ रजस्वलाया
आशौचि[illegible]स्पर्शेस्नानात्प्रागन्नजोदर्शनेशुद्धिपर्यंतमुपवासः ॥ भोजनेचांद्रायणं ॥ बालापत्या
याःस्नानंकृत्वाभोजनं ॥ उपवासमप्याम्नायः ॥ रजस्वलायाबंधुमरणश्रवणेदोषशुद्धिपर्यंतमुपवास
ः ॥ अशक्तायाःस्नानंकृत्वाभोजनंसपिंडाशौचेप्येवं ॥ सपत्नीरजस्वलास्पृष्टाःस्नानात्प्राक्रजोद
र्शनेस्नानोत्तरंभोजनाधिकारः ॥ अन्यस्यामकराओपवासः ॥ हीनवर्णायाशुद्धिपर्यंतमुपवासःपंचग
व्याशनंच ॥ चंडालादिसूतिकाशवादिस्पर्शेस्नानात्प्राग्रजोदर्शनेशुद्धिपर्यंतमनशनंततश्चांद्राय
णं ॥ मृतकसूतकवत्यारजोदर्शनेआस्नानमनशनं ॥ भुक्त्वाचांद्रायणं ॥ प्रारब्धेदीर्घव्रतेरजोदर्शनेपि
लोपोनास्ति ॥ पूजान्येनकारयेत् ॥ हविष्यभोजनादिकुर्यात ॥ व्रतस्थायारजस्वलायारजस्वलांतरसंभाषणे

ग्रा ३

उपवासः ॥ रजस्वलायाः पुनर्भोजने शुद्धिपर्यंतमुपवासः ॥ रजस्वलायाश्चतुर्थेऽह्नि स्नानं विना भोजने कार्यं ॥ प्र
त्यावोद्धं ॥ अत्र कश्चिद्विशेष उच्यते ॥ तत्र रात्रौ रजोदर्शने रात्रिं त्रिभागां कृत्वा आद्यभागद्वये पूर्वदिनं मालंब
॥ परस्मृतः ॥ यस्यास्तु पूर्वरजसो विंशतिदिनोत्तरं रजोदर्शनं भवति तस्याः सप्तदशदिनपर्यंतं पुना रजोदर्शने स्नान
मात्रं ॥ अष्टादशे एकरात्रमशुचित्वं ॥ ऊनविंशे द्व्यहं ॥ विंशतिप्रभृति त्रिरात्रं ॥ यस्यास्त्वष्टादशदिनोत्तरं
प्रायशो रजोदर्शनं भवति तस्या दशरात्रपर्यंतं स्नानं ॥ एकादशे एकरात्रं ॥ द्वादशे द्विरात्रं ॥ ऊर्ध्वं त्रिरात्रमिति ॥ रोग
जेन्वहे रजोदर्शने तु नाशुचित्वं ॥ तत्राप्यविकर्माधिकारो रजोरजोनिवृत्तावेव ॥ भोजनादिकं तु दैवं कृत्वा कर्तव्यं
॥ एवं दशरात्रपर्यंतं ॥ एकादशदिने अशुचित्वं ॥ द्वादशे स्नानं ॥ एवमुत्तरत्रापि नितरमप्यूह्यं ॥ रजस्वलायाने ं
मित्तिकस्नानप्रसंगात्साह पराशरः ॥ स्नाने नैमित्तिके प्राप्ते नारी यदि रजस्वला ॥ पात्रांतरितनोयेन स्नानं कृत्वा व्रतं
चरेत् ॥ सिक्तगात्रा भवेदद्भिः सांगोपांगा कथंचन ॥ न वस्त्रपीडनं कुर्यान्नान्यद्वासश्च धारयेदिति ॥ अशक्ता चेदन्य

स्ना प्रा ४

72

हस्तेपि धारयेत्‌ ॥ ज्वरेण शनाः ॥ ज्वराभिभूता यानारी रजसा च परिप्लुता ॥ कथं न स्याभवेच्छौचं शुद्धिः स्यात्केन कर्म
णा ॥ चतुर्थेहनि संप्राप्ते स्पृशेदन्यातु तां स्त्रियं ॥ सा सचैला वगाह्यापः स्नात्वा पुनः स्पृशेत्‌ ॥ दशद्वादशकृत्वो
वाचामेच्च पुनः पुनः ॥ अंते च वाससां त्यागस्ततः शुद्धा भवेत्तु सा ॥ ज्वराभिभूते सूपलक्षणं ॥ तेन व्याध्यन्त
राभिभूतायाः स्नानाशक्तावप्येवमेव विधिः ॥ अयमेव विधिरातुरस्नानमात्रेनुसरणीयः ॥ तत्र पुंसि आशौच
निरस्तोहैः आतुरं स्पृष्ट्वान्यः पूर्ववद्दशकृत्वो द्वादशकृत्वो वा स्नात्वातुरं मंत्रैर्मार्जयेत्‌ ॥ ते च मंत्राः ॥ समुद्रज्येष्ठा इ
ति चतस्रः ऋचः ॥ आपोहिष्ठेति तिस्रः ॥ शुचीवो हव्येति तिस्रः ॥ एतोन्विंद्रमिति तिस्रः ॥ अन्यैश्च पवित्रैर्मार्जयित्वा सर्वा
गो विभूतिं धारयेदिति ॥ ॥ इति श्रीमत्त्रिपथगापावनकैवल्यकरोपाभिध महादेवात्मज बापूभट्टविरचितायां प्रायश्चित्तमंजर्यां
मिश्रप्रकरणं ॥ ॥ अथ देवतापराधप्रायश्चित्तं ॥ ते चापराधाः ॥ देवं गुष्ठेन मर्दनं १ अधः पुष्पसमर्पणं २ अंगुल्यग्रे
जलप्रक्षेपः ३ अमौने ४ व्यग्रचित्तता ५ देवागारे अप्रक्षालितपादप्रवेशः ६ पलाशादिपुष्पैः पूजनं ७ अनुचित ॥ ६८ ॥

मंत्रै

कालेपूजनं ८ अभक्ष्यान्नादिनिवेदनं ९ घर्मसहितांगेनपूजाकरणं १० आसनेस्थित्वापूजनं ११ आसनंविना पूजनं १२ कंबलेप्रास्तपूजनं १३ ताम्रपपात्रेणधूपदीपनिवेदनं १४ स्यूतवस्त्रधारेणपूजनं १५ आर्द्रवस्त्रधारेणपूजनं १६ भस्मरश्यस्पृष्टपूजनं १७ अन्नंसंभोज्यपूजनं १८ मंत्रतंत्ररहितपूजनं १९ अजीर्णान्नेसतिपूजनं २० दक्षिणामुखेनपूजनं २१ तीर्थग्रहणंविनाभोजनं २२ त्वरयापूजनं २३ पाचितसंभारैः पूजनं २४ एकवस्त्रधारेणपूजनं २५ उत्थायोत्थायपूजनं २६ व्यापारांतरयुक्तेनपूजनं २७ देवसमीपंगत्वानमस्कारकरणं २८ एकहस्तेननमस्कारकरणं २९ उच्छिष्टेनअस्पृश्यविनावानमस्कारकरणं ३० देवताग्रेपादप्रसारणं ३१ देवताग्रेअंकबंधनं ३२ देवताग्रेशयनं ३३ मिथ्यासंभाषणं ३४ उच्चैर्भाषणं ३५ वृथाजल्पनं ३६ रोदनं ३७ निग्रहानुग्रहो ३८ विग्रहः ३९ कंबलास्तरणं ४० परनिंदा ४१ परस्तुतिः ४२ आत्मस्तुतिः ४३ शक्तौ सत्यांगौणोपचारकरणं॥ ४४॥ अनिवेदितभक्षणं ४५ तत्तत्कालोद्भवफलानामनिवेदनं ४६ देवतानिर

(73)

४७ गुरौ मौनं ४८ एवमादयः ॥ एषामन्यतमेपराधे गीतापारायणं ॥ अथवा सहस्रनामपाठः ॥ अथवा तुल
सीपूजनमिति ॥ तथान्य ॥ यः कृतमैथुनः स्नानं विना देवतां स्पृशति सः त्रिदिनं यावकपानं ततस्त्रिदिनं
पिण्याकभक्षणं ॥ ततः एकदिनं वायुभक्षणमिति सप्तरात्रं प्रायश्चित्तलेनव्रतं चरेत् ॥ यः श्मशानं गत्वा स्नानं विना
देवतां स्पृशति सः क्षेत्रतुर्थकालाशनं कृत्वा षोडशेन्हि आकाशे कुशासने एकभक्तः शयनं कृत्वा ससद
शेन्हि मध्याह्ने पंचगव्यं पिबेत् ॥ आकाशे नावरणप्रदेशः ॥ यः पिण्याकं भक्षयित्वा देवतार्चनं करोति स दि
नमेकं यावकाहारं कृत्वा द्वितीयेन्हि वीरासनं कृत्वा सीतरात्रावाकाशशयनं कृत्वा तृतीयेन्हि मध्याह्ने यावकं पं
चगव्यं च पिबेत् ॥ यो जीर्णान्ने देवता र्चनं करोति स त्रिदिनं यावकाशनः त्रिदिनं मूलाशी त्रिदिनं फलभुक्
त्रिदिनमाकाशशायी सप्तदशेन्हि पंचगव्यं पिबेत् ॥ अविहितेनैव पददेवतार्चने महासांतपनं ततः कृच्छ्रं च ॥ मा
यः सोपानत्को देवतालयं प्रविशति स दिनं यावकभक्षी त्रिदिनमक्षारालवणाशी त्रिदिनं पायसभक्षी त्रि ॥ ६६ ॥

दिनं सक्तुभक्षी त्रिदिनं वायुभक्षी त्रिदिनं कुशोषाकाशशायी चेति ॥ यस्तु नित्यं विना भेर्यादिवाद्यं विना च दे
वतां प्रबोधयति सः यस्यां कस्यांचित्कुत्कार्यादादश्यामुपोष्य समाहित आकाशशयनं कुर्यात् ॥ देव
तास्पर्शकाले अधोवायुविसर्जने त्रिदिनमनशनं पावकपानं वा ॥ यः पुरीषोत्सर्गं विना देवतार्च
नं करोति सप्ताहं देवगायत्रीस्मरन्नेकाहं जले स्वपेत् ॥ तथाभूतो हि नी यदि ने आकाशे स्वपेत् ॥ स्कंदिला हे
देवतावाहने कृते विसर्जनात्पूर्वं प्रमादादुपघाते न देवतामूलमंत्रेण पंचशतसमाज्याहुतीर्जुहुया
त् ॥ अथवा तन्मंत्रं पंचसहस्रं जपेत् ॥ यः क्रुद्धः सन्देवतार्चनं करोति चलितचित्तो वा देवस्पर्शनं समा
सं वैष्णवगृहेभ्यो भैक्षं आनीय षष्ठकाले भुंजानः शुध्येत् ॥ यः पूजाकाले मंत्रं त्यक्त्वा लौकि
कानि वाक्यानि वदेत् स पंचदशदिनान्याकाशशयनं कुर्यात् ॥ येन नीलवस्त्रं धृत्वा देवतार्चनं करोति स
चांद्रायणं चरेत् ॥ यः कौसुंभरक्तवस्त्रं धृत्वा देवतार्चनं [illegible] करोति स पंचदशदिनान्येकाहा

प्रायश्च:
॥७०॥

रं दिनमेकं जपानं दिनत्रयं वायुभक्षणमिति ॥ एकोनविंशति दिनं व्रतं कुर्यात् ॥ यः कृष्णवस्त्रधरो देवतार्च
नं करोति स सप्ताहं यावकपानं त्रिरात्रं सक्तुपिंडाशनं त्रिदिनं पिंड त्रयाशनं त्रिरात्रं वायुभक्षणमिति
षड्विंशदिनात्मकं व्रतं कुर्यात् ॥ यः परवस्त्रधरो देवतार्चनं करोति देवतास्थानिवासे स्वगृहे भिक्षाशनं
कृत्वा माघशुक्लद्वादश्यां जितेंद्रियो देवं ध्यायन्नाम्नो जलेस्थित्वा परेद्युः सूर्योदये पंचगव्यं पिबेत् ॥ यः पा
देन देवोपकरणं स्पृशति स पंचसहस्रं मूलमंत्रं जपेत् ॥ अर्घ्यपात्रं पतितेऽयुतं मूलमंत्रं जप्त्वो
पोष्य पंचगव्यं पिबेत् ॥ यो गंधपुष्पदानं विना धूपं प्रयुक्ते स पाकृ वि रु कृत्वा द्वादशीमुपोष्य त
दादितो दशदिनानि चतुर्थकालभक्ताशी एकादशेह्नि सूर्योदये पंचगव्यं पिबेत् ॥ यस्तु स्नानं
अयोग्यपुष्पैर्देवार्चनं करोति सः मासमेकाहारं कृत्वा नक्तं सप्तरात्रं चीरासनं नैकाहं चतुर्थ
कालेष्वक्तं पायसं भक्षयित्वा दिनत्रयं यावकान्नं दिनत्रयं वायुभक्षणं कुर्यात् ॥ यः कौसुंभादिदुष्ट

॥७०॥

न्नेन देवायोपहारं कल्पयन्ति स चान्द्रायणं परं कृच्छ्रं दिनमेकं मासकाशमग्ग्यं नं च कुर्यात् ॥ यो देवाय नवान्नम
हृत्वा स्वयं भुंक्ते स दिनत्रयमुपवासं मासकाशशयनं च कृत्वा चतुर्थेन्ह्नि दिने सूर्ये पंचगव्यं पिबेत्
॥ यो देवाय वायसोच्छिष्टवस्तु निवेदयति स दिनत्रयं यावकभक्षी त्रिदिनं पिण्याकभक्षी त्रिदिनं कृ
णभक्षी त्रिदिनं पायसभक्षी त्रिदिनं पयोभक्षी त्रिदिनं वायुभक्षी एवमष्टादशदिनात्मकं व्रतं चरेत् ॥
यो देवाय शुनोच्छिष्टं निवेदयति स त्रिदिनं मूलभक्षी त्रिदिनं फलभक्षी त्रिदिनं शाकभक्षी त्रिदिनं गो
मूत्राशी त्रिदिनं पयोभक्षी त्रिदिनं गोमयाशी त्रिदिनमुपवासी एवमेकविंशतिदिनात्मकं व्रतं चरेत्
॥ यो रात्रौ दीपं विना देवं स्पृशति सोक्षिणी बध्वा पंचदशदिनान्येकाहारी नक्तयाचिता द्वादशीमुपो
ष्य ततः एकरात्रं जलभक्षणं ततः एकदिनं गोमूत्रपयोयुक्तयवान्नाशनं कुर्यात् ॥ यो दीपं स्पृष्ट्वा अप्रक्षा
लितकरो नाचान्तो देवं स्पृशेत् स यावकं त्रिकृच्छ्रं द्वादशीमुपोष्य ततो मासमेकं चतुर्थकालाशनः पञ्चगव्या

कांशेस्वपेदिति॥ एतन्मूलेपारिजातेस्पष्टं॥ तथाचतंत्रेपि॥ अन्यस्यापिव्रतिसस्यकर्मणोयस्यकस्यचि
त्पुनः॥ न्यूनातिरिक्तपूर्त्यर्थमष्टोत्तरशतंजपेत्॥ मूलमंत्रेणेतिशेषः निर्माल्यलंघनेनैवप्रायश्चित्त
मिदंस्मृतं॥ अभक्तस्यापिदानेनजपंतद्द्विगुणंचरेत्॥ दानेनतिर्माल्यदानेन॥ तल्कसेपंचसाहस्रंमू
लमंत्रंजपेद्बुधः॥ यात्रायांप्रथमेरोहेवाहनेशिथिलेपदा॥ तदानंत्रैवहस्तंतु डिलंपरिकल्पयेत्॥
कृत्वानुतंदुलैःपुष्पैर्मूलेनाष्टसहस्रकं॥ हुत्वानंतरंचरूपनत्वातेचहुतेनांतःसंख्यया॥ तत्रैवसस्तधा
न्योश्वतंदुलैः पायसंपचेत् नाष्टलोकपालेभ्यःकुमुदादिभ्यएवच॥ ॥न्येभ्यःपरिवारेभ्यःसर्वभूतेभ्य
एवच॥ ततस्तास्माबलिंदत्वापूजापितायदेवतां॥ अस्यद्वाहनमारोप्यदृढमंचैर्नयेत्पुनः॥ अर्चाप्र
तिमा॥ यात्रायांप्रतिमायांतुपतितायद्यधोमुखी॥ उत्थाप्यप्रतिमांतत्रमंडपंविपुलंततः॥ कारयित्वाप्र
कुर्वीतस्नापनंपूर्वभाषितं॥ कुंभेरष्टशतैश्चाथसंपूज्याचार्यप्रधूप्यच॥ अन्येनाष्टसहस्रंतुमूलेनजुहुयात

स्क॰४

अ॰४

च १ न २

नः॥ शान्त्यादौ नं तु विप्रेभ्यस्तदा शीः परिगृह्य॥ पूर्वं वत्स बलिं दत्वा देवमारोप्य वाहनं॥ भ्रामयेन्नृपथा दे शं प्रमले
न विचक्षणः॥ पूजाकाले न्यकाले वापत्तिनैमित्तिकवर्जिते॥ अष्टोस्मिनैव स्पष्टे मूलमंत्रायुतं जपेत्॥ पंचग
व्यादिना भक्त्या देवं संस्नाप्य शान्तिजः॥ विशेषपूजां कुर्वित ततः संपूजयेत्सदा॥ उपवासो जपो होमः पंचग
व्यं तथैव च॥ स्नानं वैकल्पदोषोपशान्तये स्यादिदं ध्रुवं॥ सर्वत्रावृत्तिपूर्वोक्तद्विगुणं वृत्तिपूर्वके॥ सकृत्कृताब्
द्विगुणमभ्यासे व्रतमाचरेत्॥ अभ्यासे वृत्तिपूर्वे तु प्रपश्चिमं चतुर्गुणमिति॥ तथा अपराधाः पतितेषु ग्रः प्र
तिमा धर्वने सदा॥ शालग्रामे च चक्रांके पूजायां नेन संनिहि॥ न पूजयेद्युएकाहं देवेशं सन्निरात्रके॥ कुर्या
स्नानि दिनं मूलमंत्रं तु त्रिशतं जपेत्॥ मंत्रे शेषतु [illegible] ॥ दिने चोक्तं पञ्चगुणं तदूर्ध्वेच्यतः॥ होमः पं
चसहस्रं स्यान्मूलेनाज्येन शान्तितः॥ ईशं सूर्यं गणाध्यक्षं क्षेत्रपालं च पार्वतीं॥ आराध्यावमनं कार्यं
प्रारब्धे लन्यकर्मण इति॥ स्नानमप्रतिमामेदैस्य जापत्यं॥ ॥ इति श्रीमच्छ्विनपावनकेच्छकरोपामि

७८

प्रा.य.मं

॥७२॥

धर्ममहादेवात्मजबापूभट्टविरचितायांप्रायश्चित्तमंजर्यांदेवतापराधप्रायश्चित्तानि ॥ ॥ अथरह
स्यपातकप्रायश्चित्तं ॥ रहस्यकर्तृनिरिक्तेनाज्ञातं ॥ अगम्यागमनेचद्वयोः कर्तृत्वं ॥ तदतिरिक्तेनाज्ञा
नेरहस्यत्वं ॥ रहस्यपातकेप्रायश्चित्तमपिरहस्यमेवकुर्यात् ॥ तत्रपर्षदुपस्थानंनास्ति ॥ स्वयमेवधर्मशा
स्त्रपर्यालोचनेनप्रायश्चित्तमाचरेत् ॥ तत्रकर्मोपदेशनभिज्ञस्तदासुकरहस्यपापेकिंप्रायश्चित्तमितिव्याजां
तरेणधर्मशास्त्रज्ञंप्रतिपृष्ट्वातत्कुर्यात् ॥ तत्ररहस्यकृतमहापातकप्रायश्चित्तंमिताक्षरादौस्पष्टं ॥ अनु
क्तोपपापानुसारेणसामान्यंप्रायश्चित्तमाचरणीयं ॥ अतएवाहमनुः ॥ एतैर्द्विजातिभिःशोध्याव्रतैराविष्कृतैन
सः ॥ अनाविष्कृतपापानिमंत्रैर्होमैश्चशोधयेत् ॥ संवर्तोऽपि ॥ दानैर्होमैर्जपैर्नित्यंप्राणायामैर्द्विजातयः ॥ पा
तकेभ्यःप्रमुच्यंतेवेदाभ्यासात्तुसंशयः ॥ मनुः ॥ सव्याहृतिकाःसप्रणवाःप्राणायामास्तुषोडश ॥ अपि
भ्रूणहनंमासात्पुनंत्यहरहःकृताः ॥ यमः ॥ सहस्रपरमांदेवींशतमध्यांदशावरां ॥ गायत्रींसजपे

नित्यंमहापातकनाशिनी॥ विरजेन्द्रिगुणंजप्त्वातरन्देहेवविसुध्यति॥ वामदेव्यद्विरावर्त्यनरन्देहेवविसुध्यति
॥ पुरुषंसूक्तमावृत्यमुच्यतेसर्वकिल्बिषात्॥ ऋषभंशतशोजप्त्वानरदेहेवविशुध्यति॥ वेदमेकगुणंकृत्वा
नरन्देहेवविशुध्यति॥ रुद्रैकादशिनीजप्त्वानरन्देहेवविशुध्यति॥ वामदेव्यंबृहत्सामजप्त्वापापैःप्रमुच्यते
॥ यज्ञायज्ञीयमादित्यंज्येष्ठसामन्वरान्वरं॥ पारुच्छेपंचसामानिजप्त्वामुच्येतकिल्बिषात्॥ आथर्वणा
श्चयेकेचिन्मन्त्राःकामविवर्जिताः॥ तेसर्वेपापहन्तारोयाज्ञवल्क्यवचोयथा॥ ऋग्वेदमभ्यसेद्यस्तुयजु
ःसामान्यथापिवा॥ सामानिसरहस्यानिअथर्वांगिरसस्तथा॥ ब्राह्मणानिचकल्पांश्चषडङ्गानितथैवच॥
आख्यानानितथान्यानिजप्त्वापापैःप्रमुच्यते॥ इतिहासपुराणानिदेवतास्तवनानिच॥ जप्त्वापापैःप्रमुच्यत
धर्मशास्त्रैस्तथापरैः॥ जपेद्धाप्यस्यवामीयंपावमानीरथापिवा॥ कुन्तापंवालखिल्यांश्चनिविन्मैषान्वृषा
कपिं॥ होतॄन्रुद्रान्सकृज्जप्त्वामुच्यतेसर्वपातकैः॥ मनुः॥ एनसांस्थूलसूक्ष्माणांचिकीर्षन्नपनोदनं॥

(71)

अवेक्ष्य वं जपेद्दर्शं पर्लिं वेदस्मितीतिच ॥ अवेक्ष्य वस्त्रं वनेहे कइति । आहिताग्नेरिष्टयुक्ष्वा गाम्यनुर्विंशनिम
ते ॥ मृगारेष्टिः पवित्रेष्टिस्त्रिहविः पावमान्यपि । इष्टयः पापनाशिन्यो वैश्वानर्या समन्विताः ॥ कूर्मपुरा
णे । जपस्तपस्तीर्थयात्रा देवब्राह्मणपूजनं ॥ ग्रहणादिषु कालेषु महापातकशोधनं ॥ पुण्यक्षेत्राभि
गमनं सर्वपापप्रणाशनं ॥ देवताभ्यर्चनं पुंसामशेषाघविनाशनं ॥ कृष्णाष्टम्यां महादेवं तथा कृष्णचतु
र्दशी ॥ संपूज्य ब्राह्मणांस्तोष्य सर्वपापैः प्रमुच्यते ॥ कृष्णचतुर्दशीम्नि निर्दिष्टी यासद्गम्यर्थे त्रयोदश्यां
तथा रात्रौ महादेवं त्रिलोचनं ॥ दृष्ट्वेशं प्रथमे यामे मुच्यते सर्वपातकैः ॥ एकादश्यां निराहारः समभ्यर्च्य ज
प नार्दनं । द्वादश्यां शुक्लपक्षस्य सर्वपापैः प्रमुच्यते ॥ उपोषितश्चतुर्दश्यां कृष्णपक्षे समाहितः ॥ यमाय ध
र्मराजाय मृत्यवे चांतकाय च ॥ वैवस्वताय कालाय सर्वभूतक्षयाय च ॥ प्रत्येकं तिलसंयुक्तान्दद्यात् सप्तो
दकांजलीन् ॥ स्नात्वा नद्यां तु पूर्वाह्ने मुच्यते सर्वपातकैः ॥ यमः ॥ गायत्र्या लक्षहोमेन मुच्यते सर्वपातकैरिति ॥ ७३ ॥

५अ

॥ बौधायनश्चाह ॥ शोचितमनसा नित्यं दुष्कृतान्यनुचिंतयेत् ॥ तपस्वी चाप्रमादी च ततः पापात्प्रमुच्यत इत्य-
लं बहुना ॥ ॥ इति श्रीमद्विज्ञानपावनकेवलकरोपाभिधमहादेवात्मजबापूभट्टविरचितायां प्रायश्चित्तमंजर्यां र-
हस्यपातकेषु सामान्यप्रायश्चित्तानि ॥ ॥ अथ द्रव्यशुद्धिप्रकरणं ॥ तत्रादौ भूशुद्धिरुच्यते ॥ अल्पोपहतां
भूमिं गोमयोदकेन लेपयेत् ॥ मूत्रादिभिरुपहतं भूप्रदेशं दृष्ट्वा चेन्मूत्रादिकमपनीय गोमयादिरूपलेपयेत् ॥ अदृ-
ष्टमार्द्रं चोपहतं चेत्तत्प्रदेशस्थां मृदमुद्धृत्य पूर्वत आहृतया शुद्धया मृदाभिपूर्य दृढं कृत्वोपलेपयेत् ॥ चंडाल-
शवाद्युषिताया अत्यंतोपहतायाः शुद्धिमाह यमः ॥ खननात्पूरणाद्दाहाद्वर्षणाल्लेपनात् ॥ गोभिराक्रमणा-
त्कालात् भूमिः शुध्यति सप्तभिः ॥ कालादिति यावता कालेनामेध्यगंधलेपादिक्षयो भवति तावता कालेनेत्य-
र्थः ॥ अन्यैरपि निमित्तैरुपहताया दोषतारतम्येन क्वचिद्वर्षणगवाक्रमणखननदहनसेचनसूर्यांशुमा-
रुतैः क्वचित् क्रमणसेकोल्लेखनैः क्वचित्सेकोल्लेपनाभ्यामिति शुद्धिः कार्या ॥ मलिनायां भूमेरुल्लेखनेनैव शु-

यर्म
७७॥

ष्ट्रिः॥ बौधायनीयधर्मसूत्रे॥ भूमेस्तु संमार्जनप्रोक्षणोपलेपनावस्तरणोल्लेखनैर्यथास्थानं दोषविशेषात्प्राशस्त्य
म् यथाप्युदाहरंति गोचर्ममात्रमब्बिंदुर्गोः शोधयति पातितः समूढमसमूढं वा यत्रामेध्यं न लक्ष्यत इति समूढं
कृतसंमार्जनं असमूढमकृतसंमार्जनं वा गोः पृथिव्याः गोचर्ममात्रं प्रदेशं पातितअब्बिंदुरुदकबिंदुः शोधयती
त्येकोर्थः अथवा गोरब्बिंदुः गोपुच्छस्पर्शोदकसेचनेकृते एकेन बिंदुना गोचर्ममात्रम्भूभागः शुद्धो भवत्यतीत्यर्थः
यत्रैकादशगावउपविशंति तावान्भूभागो गोचर्मसंज्ञकः इति भूशुद्धिः अथ गृहशुद्धिः सा चोक्ता संवर्त्तेन
गृहशुद्धिं प्रवक्ष्यामि अंतःस्थशवदूषणे प्रोत्सृज्य मृन्मयं भांडं सिद्धमन्नं तथैव च गृहादपास्य तत्सर्वं गोमयेनो
पलिप्य च भित्तीनां तक्षणं कृत्वा लेपनं कारयेद्बुधः आलपे मंत्रपूतेन हिरण्यकुशवारिणा सर्वमभ्युक्षयेद्वेश्म तत
तः शुध्येदसंशयमिति अनुपहतायाः अपि गृहस्य भूमेः प्रतिदिनं संमार्जनोपलेपनाभ्यां शुद्धिः चिरकालं चंडा
लादिसंसर्गादिनाऽत्यंतोपहतस्य दहनाच्छुद्धिरित्यन्यत्र विस्तरः इति गृहशुद्धिः अथ जलशुद्धिः तत्राह व्यासः ॥७७॥

::॥ भूमिष्ठमुदकं मेध्यं वैतृष्ण्यं यत्र गोर्भवेत्॥ अव्याप्तं यदमेध्येन तद्वद्देवशिलागतं॥ महाजलाशयविषये त्वाह देवलः॥
अक्षोभ्याणि तडागानि नदीवापीसरांसि च॥ चंडालादिस्पर्शे तीर्थं च परिवर्जयेत्॥ तीर्थमुदकावतरणमार्गः॥ य
स्मिंस्तीर्थे चंडालादिस्पर्शस्तद्वर्जयित्वान्यतो जलं गृह्णीयादित्यर्थः॥ वापीकूपादिविषये तु हारीतः॥ वापीकूप
तडागेषु मानुषं शीर्यते यदि॥ अस्थिचर्मविनिर्मुक्तैर्दूषितं खरवराहादिभिः॥ उद्धृत्य तज्जलं सर्वं शोधनं परिमार्ज
नमिति॥ चर्मविनिर्मुक्तैः चिरकालवशेन विशीर्णैरित्यर्थः॥ देवलोपि॥ उद्धरेदुदकं सर्वं पंचपिंडान्नरस्तथा॥ बृह
स्पतिना तु विशेष उक्तः॥ मृताः पंचनखाः कूपे अत्यंतोपहते सति॥ अपः समुद्धरेत्सर्वाः शेषं वस्त्रेण शोधयेत्॥ वह्निं
प्रज्वालनं कृत्वा कूपे पक्वेष्टकान्वितं पंचगव्यं न्यसेत्तस्मान्नवनोपसमुत्थवह्निति॥ सर्वजलोत्सरणासंभवे अल्पो
पहतौ वा प्रायश्चित्तमाह हारीतः॥ घटानां शतमुद्धृत्य पंचगव्यं क्षिपेत्ततः॥ अस्थिश्वपाकचांडाले दूषितेषु विशोधनमि
ति॥ आपस्तंबश्चाह॥ उष्णश्लेष्मविण्मूत्रस्त्रीरजो मद्यमेव च॥ एभिर्विदूषिते कूपे कुंभानां षष्टिमुद्धरेदिति॥ स्थावर

79

कु २

प्रायश्च
॥ ७५ ॥

जलाशयेषु कूपवद्देवशुद्धिः ॥ तदाह विष्णुः ॥ जलाशयेषु सर्वेषु स्थावरेषु महीतले ॥ कूपवत्कथिता शुद्धिर्महत्सु च
न दूषणमिति ॥ यमेन च विशेष उक्तः ॥ चांडालभांडसंस्पृष्टं पीत्वा कूपगतं जलं ॥ गोमूत्रयावकाहारस्त्रिरात्रेण विशु
ध्यतीति ॥ कूपाद्वावुत्पन्नं नवोदकं दशरात्रेण नरं शुध्यति ॥ तदुक्तं निर्णयामृते ॥ अजागावो महिष्यश्च ब्राह्मण्य
श्च प्रसूतिकाः ॥ दशरात्रेण शुध्यंति भूमिष्ठं च नवोदकमिति ॥ जलपानं च स्वस्य स्वकीयमेव शुद्धं ॥ तदाह बौधा
यनः ॥ आत्मशय्यासनं वस्त्रं जाया पत्यं कमंडलुः ॥ शुचीन्यात्मन एतानि परेषामशुचीनि चेति ॥ स्वीयत्र्या
लाभे तु परकीया शुद्धेन कंबलादिनां तद्द्रियोपयोक्तव्येति निर्णयामृते ॥ उद्धृतं जलं त्वेकरात्रपर्यंतं शुचि ॥ तदा
ह देवलः ॥ उद्धृता वामशस्ता स्युः शुद्धैः पात्रैर्यथाविधि ॥ एकरात्रोषितास्तास्तु त्यजेदापः समुद्धृता इति ॥ निर्णया
मृतकारस्तु ॥ बहू[illegible]दकानां तडागादेरुद्धृतानामपर्युषितोदकाभावे न दोषः ॥ अपर्युषितसद्भावे पर्युषितानां क
र्मयोग्यत्वं नास्तीत्याह ॥ गंगाजले तु उद्धृते बहुकालोषितेपि न दोषः ॥ तदुक्तं नारदेन ॥ त्यजेत्पर्युषितं पुष्पं

॥ ७५ ॥

त्यजेत्स्पर्शदुषितं जलं ॥ न त्यजेज्जान्हवीतोयं तुलसीपत्रबिल्वकमिति ॥ जान्हवीत्युपलक्षणं ॥ तेन गौतम्या
दिगंगावान्यजलेपि पर्युषितत्वं नास्तीति सिद्धं ॥ नदीनां चंडालादिस्पर्शेपि न दोषः ॥ नदीवेगेन शुध्यतीति व
चनात् ॥ इति जलशुद्धिः ॥ अथ पात्रशुद्धिः ॥ तत्र सर्वेषामुपहतानां पात्राणामद्भिः प्रक्षालनं नित्यं ॥ विशेष
स्तूच्यते ॥ तत्र ताम्रमयाणां पात्राणामुपहतौ अम्लघर्षणेन शुद्धिः ॥ तदाम्लघर्षणोत्तरमद्भिः प्रक्षालनं
॥ एवमुत्तरत्रापि ज्ञेयं ॥ कांस्यमयानां भस्मना ॥ तैजसानामश्ममयानां च शकृत्स्वाभ्यां ॥ बिल्वकपित्थाला
बुमयानां वेणुपत्रकुशादिनिर्मितानां च गोमयेन ॥ राजतकांचनयोरद्भिः ॥ शंखशुक्तिनामपि तथैव ॥ वेण
वानां गोमयोदकाभ्यामुपलेपनं ॥ इदमत्योपहतौ ॥ उच्छिष्टस्नेहोपलिप्तानां तदपनयनपर्यंतं यवादिधान्य
चूर्णैर्गोमयेन वा घर्षणं ॥ मूत्राद्युपहतानामग्नौ प्रतापनमधिकं ॥ बौधायनीयधर्मसूत्रे तु ॥ तैजसा
नामुच्छिष्टानां गोशकृन्मृत्स्वाभिः परिमार्जनमन्यतमेन वा ॥ ताम्ररजतसुवर्णानामम्लैरमत्राणामश्म

प्रायमं·
॥७६॥

यानां दहनं दारवाणां तक्षणं वैणवानां गोमयेन फलसंभवानां चेति॥ तथा॥ तैजसानां मूत्रपुरीषास्रक्शुक्रकु
णपघेरत्युक्तोपहतानामावर्तनमल्पसंसर्गे तु परिलेखनं स्पर्शमात्रे धावनं त्रिः सप्तकृत्वो भस्मना परिमार्जनं मतै
जसानामेवंभूतानामुत्सर्ग इति॥ अग्निसंयोगेन द्रवीकरणमावर्तनं॥ कांस्यस्य भस्मना परिमार्जनं नियतं॥ अन्ये
षामपि सौवर्णादितैजसानां याज्ञवल्क्येन वारिणा शुद्धिरिष्यत इति कृत्वा बौधायनेन भस्मना परिमार्जनमित्यु
क्त्वाम्लभस्मादिसहितेनैव वस्तु शुद्धिर्ज्ञातव्या॥ तथा च बौधायनीये॥ तैजसानां मूत्राद्युपघाते पुनः करणं गोमू
त्रे वा सप्तरात्रं परिवासनमिति॥ लेपनहरणासंभवे पुनः करणं अन्यथा गोमूत्रे परिवासनमिति व्यवस्थेयं स्मृत्यं
तरेपि॥ भस्मना शुध्यते कांस्यं सुरया यन्न लिप्यते॥ सुरामूत्रपुरीषैस्तु शुध्यते तापलेखनैरिति सुरादिग्रहणं शु
क्रशोणितादीनामप्युपलक्षणं॥ ताम्रमयादीनामप्येवं॥ तत्र ताम्रमम्लेनेत्यादि तत्तच्छुध्युक्तद्रव्येणेति विशेषः
॥ शंखेपि॥ सूतकोच्छिष्टभांडस्य सुरामद्यहतस्य च॥ त्रिः सप्तमार्जनाच्छुद्धिर्न तु कांस्यस्य तापनमिति॥ अस्या ॥७६॥

र्थे:त्रि:सप्तसेक [illegible] विंशति:॥ अथवासूतकोच्छिष्टोपहतानांतैजसानापूर्वोक्तद्रव्यैःप्रत्येकंत्रिर्मार्जनाच्छु

द्धि:॥सुराद्युपहतानांसप्तवारंमार्जनात्॥ कांस्यस्यतुनकेवलमार्जनात्॥ किंतुतस्यमार्जनातापनाद्वेशु

द्धि:॥ प्रतिमार्जनमुदकप्रक्षालनमप्यवर्तते॥ इदमल्पोपहतौ॥ अधिकोपहतेषुतुविशेषः स्मृत्यंतरे प्रोक्त

:॥ रजस्वलासूतिकादिविण्मूत्रोपहतानिच॥ प्रक्षेप्तव्यानि तान्यग्नौयच्चघावत्सहेदपीति॥ यद्द्रव्यं यावदग्नि

प्रक्षेपंसहतेतावत्प्रक्षेप्तव्यमिति॥ अग्निपुराणेतु॥ सुवर्णशंखवाश्मस्फुक्तिमुक्तारत्नमयानिच॥ कांस्यायस्ता

म्ररौप्याणित्रपुःसीसमयानिच॥ निर्लेपानिचशुध्यंतिकेवलेनजलेनवै॥ शूद्रोच्छिष्टानिशोध्यानित्रिधाक्षाराम्ल

वारिभिरिति॥ अत्रापिक्षाराम्लवारिभिर्दशकृत्वोमार्जनंकार्यं॥ शुध्यंतिदशभिः क्षारैरितिशातातपोक्तेः॥ द्विजा

तिभुक्तोच्छिष्टसंस्पर्शेतुशंखवचनंविशेषउक्तः॥ ब्रह्मक्षत्रविशांवापिसकृत्संमार्जनाच्छुचिः॥ चतुर्थेनतुपस्पृष्टं

चतुर्भिस्तत्रमार्जनं॥ अग्नौप्रक्षिप्यगृह्णीयात्पश्चात्प्रक्षाल्यमूलतः॥ गोश्रृंगेनतुसंस्पृष्टंतत्यात्रंशुध्यतामि

नतु॥ ४

(८७)

याश्चिति ॥ चतुर्थेन शूद्रेण ॥ कांस्यपात्रे गंडूषादिकरणे त्वाहांगिराः ॥ गंडूषपादशौचं च यः कुर्यात्कांस्यभाजने
॥ षण्मासं भुवि निक्षिप्य पुनराकारमादिशेत् ॥ अत्र षण्मासं भुवि निक्षिप्येत्युक्त्वा त्वननमपि कांस्यस्य शु
द्धिहेतुः अतश्चापहतकांस्यदोषानुसारेण सप्ताहादिकालं भुवि रक्षित्वा ततस्तु भस्मना मार्जितं शुध्यतीति नि
र्णयान्नतकारः ॥ तथा च ॥ लोहानां दहनाच्छुद्धिर्भस्मना गोमयेन वा ॥ दहनात्खननाद्वापि शेलानां भस्मापि
वा ॥ काष्ठानां तक्षणाच्छुद्धिर्मृद्गोमयजलैरपीति ॥ याज्ञवल्क्यश्चाह ॥ तक्षणं दारुशृंगास्थ्नां पुनः पाकान्म
हीमयं ॥ रत्नमयानां मध्यास्तु पहतौ तुल्यागएव ॥ तद्दाह मनुः ॥ मद्यैर्मूत्रैः पुरीषैर्वा ष्ठीवनैः पूयशोणितैः ॥ संस्पृष्टं
नैव शुध्येत पुनः पाकेन मृन्मयमिति ॥ आपस्तंबः ॥ गवाघ्रातानि कांस्यानि शूद्रोच्छिष्टानि यानि वा शुध्यंति
दशभिः क्षारैः श्वकाकोपहतानि च ॥ क्षारेर्भस्म स्त्रिवारं भस्मना मार्जितानि शुध्यंतीत्यर्थः यज्ञपात्रेषु
अग्निहोत्रहवण्यादीनां स्रुचां मुच्छिष्टसमन्वारब्धानां तूच्छिष्टोपहतानां वादर्भैः प्रक्षालनाच्छुद्धिः ॥ ॥ ७७ ॥

मूत्राद्युपहतोनुत्सर्ग एव॥ पात्रांतर परिणहः॥ गवहवमसादीनां लेपैर्हितस्य शर्ममात्रोपहतानां प्रक्षालनाच्छु
द्धिः॥ अत्यंतोपहतानां त्याग एव॥ स्नेहोपलिप्तानामुष्णोदकप्रक्षालनाच्छुद्धिः॥ काकमुखावस्पृष्टानां त
रुमयाणां तक्षणं॥ श्वमुखावस्पृष्टानां त्यागः॥ कृष्णाजिनस्योष्णोदकप्रक्षालनाच्छुद्धिः॥ इति पात्रशुद्धि
॥ अथ धान्यशुद्धिः॥ तत्र व्रीह्यादीनां सतुषाणां चंडालादिस्पर्शोपहतानां द्रोणान्न्यूनपरिमाणानां प्रक्षा
लनावशेषाभ्यां शुद्धिः॥ द्रोणादधिकानां प्रोक्षणान्न॥ तंडुलानां रजस्वलादिस्पृष्टानां द्रोणान्न्यूनाना
मुत्सर्गः॥ द्रोणादधिकानां स्पृष्टदेशस्थपरित्यागात्प्रोक्षणाच्छुद्धिः॥ तानपि पक्ति पञ्चरु पुरोडाशादौ
नोपयुंज्यात्॥ विष्णुस्तुसतुषाणां कंडनप्रक्षालने कुर्यादित्याह॥ बहुद्रव्यविषये तु कश्यपेन विशेष उक्तः
॥ प्रोक्षणपर्यग्निकरणावगाहनेर्व्रीहियवगोधूमानां विमर्शनप्रोक्षणैः फलीकृतानां विमर्शनप्रोक्षणैः
॥ ग्रामीधान्यानां चेति। अस्यार्थः॥ प्रोक्षणादीनां सर्वाणि सर्वत्र दोषाल्पत्व महत्वापेक्षया योज्यानि॥ नय

82

प्रायुमं॰
॥७८॥

धासंरवं॥ कुंडनेन शुक्लीकृतानि रस्ताः क्षुद्रकण्यस्तंदुलाः फलीकृताउच्यंते॥ तेषामस्यानां विमुशर्नेपाणि
भ्यां निर्मलीकरणं॥ बहूनां प्रोक्षणं॥ शमीधान्यानि मुद्गादीनि शिंबीधान्यानि॥ तेषां बहूनां प्रोक्षणमद्भि
रेव॥ अल्पत्वे पूर्ववत्॥ गृहदाहोपहतानां विशेष उक्त आदित्यपुराणे॥ गृहदाहे समुत्पन्ने दग्धे च पशुमा
नुषे॥ अभोज्यस्तु कृतो व्रीहिधान्यद्रव्यस्य संग्रहः॥ अत्रापवाद उक्तस्तत्रैव॥ गृहं येन नावबद्धानामधो
मुखिवनिष्ठना॥ यवमाषतिलादीनां न दोषं मनुरब्रवीत्॥ तत्र संक्रममाणेग्नौ स्थानस्थानं च दृश्यते॥ न च
मणिवधोपनके वलं गृहदीपनं॥ तत्र द्रव्याणि सर्वाणि गृहीयाद विचारयन् इति धान्यशुद्धिः॥ सिद्धान्नविषये

धर्मप्र२

तु मनुना विशेष उक्तः॥ पक्षिजग्धं गवाघ्रातमवधूतं॥ दूषितं केशकीटैश्च मृत्प्रक्षेपेण शुध्यति॥ पक्षिजग्धं प
क्षिभक्षितं॥ अवधूतं यस्योपरि वासो वधूतं॥ अवक्षुतं यस्योपरि क्षुतं कृतं॥ सर्वत्र तावन्मात्रस्योपहतस्य त्या
गः॥ शेषस्य शुद्धिकरणं॥ केशकीटादिदूषि तस्य शुद्धिः पाकानंतरमेव॥ पाककाले केशाद्युपहतस्य त्या ॥७८॥

गएव ॥ पाशव ल्कास्तु ॥ सलिलेन भस्मना द्वापि प्रक्षेप्तव्यं विशुद्धये ॥ इत्याह ॥ वसिष्ठेन शेषकुक्तः ॥ देवद्रोण्यां वि
वाहेषु यज्ञेषु प्रासवेषु च ॥ काकैः श्वभिश्च संस्पृष्टमन्नं तन्न विसर्जयेत् ॥ तस्मान्नमन्नमुद्धृत्य शेषं संस्कारमर्ह
तीति ॥ देवद्रोण्यां देवयात्रोत्सवादौ ॥ संस्कारः प्रोक्षणभस्मप्रक्षेपादिः ॥ इदमपि द्रोणाधिकान्नविषये वे
दितव्यं ॥ तन्न्यूनस्य तु त्याग एव ॥ अत एवाह पराशरः ॥ पक्वं द्रोणाधिकं न्नं वा काकश्वाद्युपघातितं ॥ तास
मुद्धृत्य तन्मात्रं यत्तु लालाहतं भवेत् ॥ प्रोक्षितं ब्रह्मघोषेण पूतं भोज्यं च तद्भवेत् ॥ द्रोणप्रमाणं तु परिभा
षायामुक्तं ॥ संस्कारविषये विशेषश्च वसिष्ठेनोक्तः ॥ द्रवाणामाप्लवेनैव घनानां प्रोक्षणेन च ॥ छागादि
मुखसंस्पृष्टमन्नं तच्छुचितामियात् ॥ घनाः पर्पटवटकादयः ॥ द्रवा गोरसाः ॥ इत्यन्नशुद्धिः ॥ अथ व
स्त्रशुद्धिः ॥ तत्र रेतोमूत्रपुरीषरुधिरादिभिरुपहतवस्त्रस्य मृज्जलाभ्यां प्रक्षालनाच्छुद्धिः ॥ अत्यंतोपहतस्य
त्यागः ॥ अत्यंतदुर्लभोत्तमवस्त्रस्य तु अत्यंतोपहतोऽपहतप्रदेशस्य छेदनं दाहो वा ॥ हारितस्यानुत्तमे स्वपि छेदद

ायमं॰
।७६।।

सादिनाशुद्धिः॥ चांडालादिस्पर्शे तु प्रक्षालने राशीकृतानां वस्त्राणां मध्ये यावंति वस्त्राणि चांडालादिभिः स्पृष्टानि स्पृ
ष्टापेक्षयाल्पानि चेत्तान्युद्धृत्य प्रक्षालयेत्॥ शेषाणां प्रोक्षणं॥ बहूनि स्पृष्टानि चेत्सर्वेषां प्रक्षालनं॥ यद्वा राशीकृ
तानि बहूनि सर्वाण्यपि स्पृष्टानि तदा प्रोक्षणादेव शुद्धिः॥ अल्पानि चेत्तदा प्रक्षालनेन॥ राशेर्बहुत्वं च पुरुषग्रा
ह्यभाराधिकत्वं॥ आविकादिविषये तु याज्ञवल्क्यः॥ सोषैरुदकगोमूत्रैः शुध्येदाविककौशिकं॥ श्रीफलैरंशु
पट्टं च सारिष्टैः कुतपं तथा॥ सगौरसर्षपैः क्षौममिति॥ सोषैः सक्षारमृत्तिकैः॥ कौशिकं पट्टवस्त्रं॥ अंशुपट्टं वल्क
लनिर्मितं॥ कुतपश्छागलोमनिर्मितः॥ एतेषामल्पोपघाते प्रोक्षणमेव॥ बौधायनीये तु॥ बिल्वतंडुलैः कुतपानाम
रिष्टैरौर्णानामादित्येन क्षौमाणां गौरसर्षपकल्केन मृद्वा चैलानां चैलवच्चर्मणामिति॥ देवलः॥ और्णकौशेयकुतप
पट्टक्षौमदुकूलजाः॥ अल्पशौचा भवंत्येते शोषणप्रोक्षणादिभिः॥ तान्येवामेध्ययुक्तानि क्षालयेच्छोधनैः स्व
कैरिति येषां रक्तांबरादीनां प्रक्षालनेन रागस्वरूपनाशो भवति तेषामातपशोषादिना शुद्धिः॥ यन्मांजिष्ठादि ॥७६॥

८२

गं क्षालनेन विनश्यति तत्क्षालयेत्॥ यच्चोतीर्णानां प्रोक्षणेन शुद्धिः॥ मनुः॥ चैलवच्चर्मणां शुद्धिर्वैदलानां
तथैव चेति॥ वैदलानि तालपत्रनिर्मितानि॥ तूलिकादिविषये त्वाह देवलः॥ तूलिकामुपधानं च पुष्परक्ताम्बरं त-
था॥ शोषयित्वातपे किंचित्करैः संमार्जयेन्मुहुः॥ पश्चाच्च वारिणा प्रोक्ष्य विनियुंजीत कर्मणि॥ तान्यप्यतिमलि-
नानि यथावत्परिशोधयेदिति॥ संहतानां तु यावन्मात्राणामुपहतिस्तेषामेव प्रक्षालनं॥ अन्येषां प्रोक्षणं रजकृ-
धौतानां प्रोक्षणाच्छुद्धिः॥ सा चास्पर्शमात्रविषयिका॥ न तु कर्मार्हेति इति वस्त्रशुद्धिः॥ अथ नानावस्तुशु-
द्धिः॥ तत्राशुचिनास्पृष्टं सर्ववस्तुप्रायः प्रोक्षणाच्छुध्येत्॥ मूत्रपुरीषलोहितरेतोभिरुपहतं द्रव्यं रसादिः
प्रक्षालनाच्छुध्येत्॥ आपणस्थद्रव्याणां विक्रयणाच्छुद्धिः॥ हस्तोस्थिते द्रव्ये उच्छिष्टादिस्पर्शे तद्द्र-
व्यसहितेनाचमनाच्छुद्धिः॥ न द्रव्यमुपस्थे कृत्वा चामेदिति पयोदध्यादीनामुच्छिष्टसमन्वारब्धपात्रमात्रो-
पहतानां शुद्धिः पात्रांतरे स्रावनयाच्छुद्धिः॥ उच्छिष्टोपहतानां त्यागः॥ शूद्रभांडस्थितानां पयोदध्यादीनां

च्छि

भाषमं॰ ॥८०॥ नी५

शुल्वपात्राणां तरणं वनयनाच्छुद्धिः ॥ होमाद्यर्थं घृतपयोदध्यादीनां तु उ[illegible]ष्ट समन्वारब्धे पात्रान्तरे स्वनीयोदके नि
धायकर्मार्थमुपयुञ्ज्यात् ॥ शंखः ॥ अपण्यघृततैलानां प्लावनं गोरसस्य च ॥ भांडानि लावयेदद्भिः शाकमूल
फलानि चेति ॥ तथा ॥ द्रवाणां चैव सर्वेषां शुद्धिरुत्पवनं स्मृतं ॥ प्रोक्षणं संहतानां च दारवाणां च तक्षण
मिति ॥ प्रस्थप्रमाणादधिकानामुत्पवनादिना शुद्धिः ॥ ततो न्यूनपरिमाणानां त्याग इति निर्णयास्ते ॥
बहूनां कुसुमकार्पासगुडलवणानां सर्वेषां काष्ठीभूतानां चंडालादिस्पर्शे प्रोक्षणेनेव शुद्धिरिति बौधायन
॥ अल्पानां त्वाह शंखः ॥ निर्यासानां गुडानां च लवणानां तथैव च ॥ कुसुमकुंकुमानां च ऊर्णाकार्पासयो
स्तथा ॥ शोषात्तु कथिता शुद्धिरित्याह भगवान्मनुः इति निर्यासा हिंगुप्रभृतयः ॥ विष्णुः ॥ मृत्पर्णलवणकाष्ठा
नां च भिक्षुंगलवासेः ॥ स्पर्शने विहितं शौचं सोमसूर्याग्निमारुतैरिति ॥ शंखोपि ॥ पुष्पफलानां विष्करावधूता रु
नां प्रोक्षणमस्पृश्यमद्भिः प्रक्षालनं सकृदुपयुक्तानामुत्सर्ग इति ॥ विष्करो नाम कुक्कुटादिभिरवधूतं ॥ ॥८०॥

पद्मावकीर्णमित्यर्थः ॥ तत्राल्पोपहतानां प्रोक्षणं ॥ अधिकोपहतानामभ्युक्षणं ॥ अत्यंतोपहतानां प्रक्षाल
नं ॥ बौधायनोपि ॥ असंस्कृतायां भूमौ न्यस्तानां प्रक्षालनं ॥ लेपादिभिरुपहतायां भुवि निहितानां कुशसमिदा
दीनां प्रक्षालनाच्छुद्धिः ॥ शूद्रादिभिराहृतानां काष्ठानामभ्युक्षणाच्छुद्धिः ॥ समिध्मादीनामल्पोपहतौ प्रोक्ष
णाच्छुद्धिः ॥ अत्यंतोपहतौ त्यागः ॥ मनुः ॥ शाकमूलफलादीनां धान्यवच्छुद्धिरिष्यत इति ॥ बौधायनः ॥ आ
सनं शयनं यानं नावः पंथास्तृणानि च ॥ चंडालपतितस्पर्शं मारुतेनैव शुध्यतीति ॥ इति नानावस्तु शुद्धि
॥ अथाशुध्यपवादः ॥ तत्र श[illegible]नातपः ॥ गोकुले कुंडशालायां तिलयंत्रेक्षुयंत्रयोः ॥ अमीमांस्या
नि शौचानि स्त्रीषु बालातुरेषु च ॥ कुंडशालायज्ञशाला ॥ बृहस्पतिः ॥ पादौ शुची ब्राह्मणानामजा
श्वस्य मुखं शुचि ॥ गावां पृष्ठानि मेध्यानि सर्वगात्राणि योषितामिति ॥ अनुपहतं ब्राह्मणचरणस्पर्शं व
स्तु शुध्यमित्यर्थः ॥ अत एव ब्राह्मणव्यतिरिक्तचरणस्पर्शे दोषउक्तो भवति ॥ तथा च ॥ अंगुष्ठासंनताधा

(85)

रावानोरूताश्वरेणव:॥स्त्रियोरथाश्ववालाश्वनदुष्यन्तिकर्हाचन॥ब्रह्मचारिभिक्षुकयोर्हस्तान्नेनैवदुष्यन्ति॥ब्रह्मचारिभिक्षुकयोर्हस्तस्थितं सिद्धान्नं रथ्योपसर्पणे पद्घाते नाशुद्धं न भवतीत्यर्थः॥तथा च॥अपूपाः सक्तवो धाना स्तक्रं दधि घृतं पयः॥एतत्सर्व्यगतं भोज्यं भांडलेपो न चेद्यदि॥शंख:॥नारीणां चैव वत्सानां शकुनीनां शुनां मुखं॥रतौ प्रस्नवने वृक्षे मृगयायां सदा शुचि॥पैठीनसिः॥आकराः शुचयः सर्वे वर्जयित्वा सूराकरा॥यमः॥अदूष्यं कांचनं गावः स्त्रीमुखं कुतपं स्रुवं॥न दूष्यंति विद्वांसो यज्ञेषु चमसं तथा॥मुखतो गौरमेध्यातु मेध्या जा मुखतस्तथा॥पृष्ठतो गौर्गजः स्कंधः सर्वतो श्वः शुचिस्तथा॥तथा च॥मक्षिका विप्रुष श्छाया गौरश्वः सूर्यरश्मयः॥रजो भूर्वायुरग्निश्च स्पर्शे मेध्यानि निर्दिशेत्॥अन्नमक्षिकाग्रहणमवर्जनीयानां दंशादीनामुपलक्षणार्थं॥विप्रुषः अविज्ञाताकारादुष्टजलादिबिंदवः॥अत्रिः॥मधुपर्के च सोमे च अप्सु प्राणाहुतीषु च॥नोच्छिष्टस्य भवेद्दोषो स्त्रेः श्वन्यवनस्य च॥मत इति शेष॥अशितिभोजनानंतरं दंतलग्ना

पोप्मानमंत्रोच्चारणेमधुपर्कमंत्रोच्चारविषयेवृद्धोबोनास्तीत्यर्थः ॥ षट्त्रिंशन्मतेपि ॥ तांबूलेचफलेचैवभु
क्तस्नेहावशिष्टके ॥ दंतलग्नस्यसंस्पर्शेनोच्छिष्टस्तुभवेन्नरः ॥ लाभिः पत्रैर्मूलफलैस्तृणकाष्ठमयैस्त
था ॥ सुगंधिभिस्तथाद्रव्यैर्नोच्छिष्टस्तुभवेद्द्विजः ॥ याज्ञवल्क्यः ॥ मुखजाविप्रुषोमेध्यास्तथाचमनबिंदवः
॥ बौधायनः ॥ वत्सः प्रस्नवनेमेध्यः शकुनिः फलपातने ॥ स्त्रियश्चरतिसंसर्गेश्वामृगग्रहणेशुचिः ॥ अ
मेध्येषुचयेवृक्षाउप्ताः पुष्पफलप्रदाः ॥ तेषामपिनदुष्यंतिपुष्पाणिचफलानिच ॥ खलक्षेत्रेषुयत्धान्यंकू
पवापीषुयज्जलं ॥ अभोज्यादपितद्भोज्यंयच्चगोष्ठगतंपयः ॥ आपः पवित्राभूमिष्ठागोतृप्तिर्यासुजायते ॥
अव्याप्ताश्चेदमेध्येनगंधवर्णरसान्विताइति ॥ इत्यशुध्यपवादः ॥ अथदेहशुद्धिः ॥ तत्रमनुः ॥ क्षांत्याशु
ध्यंतिविद्वांसोदानेनाकार्यकारिणः ॥ प्रच्छन्नपापंजप्येनतपसावेदवित्तमाः ॥ विद्यातपोभ्यांभूतात्माबुद्धि
र्ज्ञानेनशुध्यति ॥ मनः सत्येनशुध्येनसंन्यासेनद्विजोत्तमाइति ॥ तथाचोक्तं ॥ अपवित्रः पवित्रोवासर्वावस्थां

५४

प्रायमं॰
॥८२॥

गतोपि वा ॥ यः स्मरेत्सुंदरीकाक्षं स बाह्याभ्यंतरः शुचिः ॥ निःसर्वे शिवं ॥ ॥ इति श्रीमच्चित्पावनकेळकरोपा
भिधमहादेवात्मजबापूभट्टविरचितायां प्रायश्चित्तमंजर्यां द्रव्यशुद्धिप्रकरणं ॥ समाप्ता चेयं प्रायश्चित्तमंजरी
॥ ॥ ग्रंथेस्मिन्मलिखितं न्यूनमधिकं वा प्रमादतः ॥ तद्दोषपरिहारार्थं वासुदेवं नमाम्यहं ॥ १ ॥ क्षेत्रे भार्गव
निर्मिते बुधितटे राजापुरप्रांते केवाड्रनामसमीपवर्ति कणशीसंज्ञो लघुरनामकः ॥ तत्स्थः केळकरोपनामक
महादेवात्मजः शांडिल्यो बापूभट्ट इमं निबंधमकरोत्तेनाच्युतः प्रीयतां ॥ २ ॥ नामूलं लिखितं किंचित्क्वचि
द्दृष्टं प्रसंगतः ॥ धर्मशास्त्रनिबंधेषु मूलवाक्यानि संति च ॥ तानि दृष्ट्वा निर्मितेयं प्रायश्चित्ताख्यमंजरी ॥ वि
चार्य सद्भिः सत्सर्वमस्यां शोध्यं बुधैः स्तुततः ॥ ३ ॥ विष्णोः प्रीतिकरा नित्यं तुलसीमंजरी यथा ॥ तथास्तु वि
दुषां प्रीत्यै प्रायश्चित्ताख्यमंजरी ॥ ४ ॥ ॥ श्रीशालिवाहने शाके रसाग्निमुनिभूमिते ॥ भावाख्यवत्सरे पौ
षे मंजरीयं समाप्तिता ॥ ५ ॥ ॥ यन्नामोच्चारणान्नूनं पापनश्यंति गुर्वपि ॥ तन्नमामि महाविष्णुं शिवं चाविमले ॥ ८२ ॥

प्राय. मं.
॥८३॥

स्वरं॥७॥ ॥इति श्रीमद्वितपावनकेळकरोपाभिध्यमहादेवात्मजबापूभट्टविरचितायामायश्चित्तमंजरीसमाप्ता॥ ॥श्रीविश्वेश्वरार्पणमस्तु॥ संवत् १८८० शके १७४५॥ कार्तिकशुद्ध ५ कार्ये इदं पुस्तक नामक शिवरामभट्टात्मजेन लक्ष्मीधरेण लिखितं॥ स्वार्थं परोपकारार्थं च॥ श्रीभवानीसोमेश्वरार्पणमस्तु॥
ग्रंथसंख्या १८००॥

87

८८४८

इतिप्रायश्चितमंजरीसमाप्तः॥ ग्रंथसंख्या अठरासै॥१८००॥

[OrderDescription]
,CREATED=14.09.20 11:11
,TRANSFERRED=2020/09/14 at 11:27:22
,PAGES=175
,TYPE=STD
,NAME=S0003604
,Book Name=M-916-PRAYSHCHIT MANJIRI
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF

FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF

FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF

FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF

FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF

FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF

FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
,FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF

FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF

FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
,FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,FILE103=00000103.TIF
,FILE104=00000104.TIF
,FILE105=00000105.TIF
,FILE106=00000106.TIF
,FILE107=00000107.TIF
,FILE108=00000108.TIF

FILE109=00000109.TIF
,FILE110=00000110.TIF
,FILE111=00000111.TIF
,FILE112=00000112.TIF
,FILE113=00000113.TIF
,FILE114=00000114.TIF
,FILE115=00000115.TIF
,FILE116=00000116.TIF
,FILE117=00000117.TIF
,FILE118=00000118.TIF
,FILE119=00000119.TIF
,FILE120=00000120.TIF
,FILE121=00000121.TIF

FILE122=00000122.TIF
,FILE123=00000123.TIF
,FILE124=00000124.TIF
,FILE125=00000125.TIF
,FILE126=00000126.TIF
,FILE127=00000127.TIF
,FILE128=00000128.TIF
,FILE129=00000129.TIF
,FILE130=00000130.TIF
,FILE131=00000131.TIF
,FILE132=00000132.TIF
,FILE133=00000133.TIF
,FILE134=00000134.TIF

FILE135=00000135.TIF
,FILE136=00000136.TIF
,FILE137=00000137.TIF
,FILE138=00000138.TIF
,FILE139=00000139.TIF
,FILE140=00000140.TIF
,FILE141=00000141.TIF
,FILE142=00000142.TIF
,FILE143=00000143.TIF
,FILE144=00000144.TIF
,FILE145=00000145.TIF
,FILE146=00000146.TIF
,FILE147=00000147.TIF

FILE148=00000148.TIF
,FILE149=00000149.TIF
,FILE150=00000150.TIF
,FILE151=00000151.TIF
,FILE152=00000152.TIF
,FILE153=00000153.TIF
,FILE154=00000154.TIF
,FILE155=00000155.TIF
,FILE156=00000156.TIF
,FILE157=00000157.TIF
,FILE158=00000158.TIF
,FILE159=00000159.TIF
,FILE160=00000160.TIF

FILE161=00000161.TIF
,FILE162=00000162.TIF
,FILE163=00000163.TIF
,FILE164=00000164.TIF
,FILE165=00000165.TIF
,FILE166=00000166.TIF
,FILE167=00000167.TIF
,FILE168=00000168.TIF
,FILE169=00000169.TIF
,FILE170=00000170.TIF
,FILE171=00000171.TIF
,FILE172=00000172.TIF
,FILE173=00000173.TIF

FILE174=00000174.TIF
,FILE175=00000175.TIF
,